७.	शकुनिः	←	मातुलः	→	मद्रराजः
८.	गान्धारी	←	राज्ञी	→	द्रौपदी
९.	द्यूतः	←	क्रीडा	→	आखेटः
१०.	नारदः	←	ऋषिः	→	व्यासः

यथा - **१. वाद्यस्य नाम वंशी। वाद्यस्य नाम वीणा।**

२. -- ।

३. -- ।

४. -- ।

५. -- ।

६. -- ।

७. -- ।

८. -- ।

९. ---।

१०. ---।

६. कोष्ठके लिखितानां सङ्ख्यानाम् आधारेण गीतायाः दशमाध्यायस्य श्लोकान् परिशील्य रिक्तस्थानानि पूरयत -

यथा - **आदित्यानाम्** अहं विष्णुः। (१०.२१)

१. -- शशी। (१०.२१)

२. -- सामवेदः। (१०.२२)

३. -- वासवः। (१०.२२)

४. -- मनः। (१०.२२)

५. -- चेतना। (१०.२२)

६. -- शङ्करः। (१०.२३)

७. -- पावकः। (१०.२३)

८. -- स्कन्दः। (१०.२४)

९. -- भृगुः। (१०.२५)

१०. -- जपयज्ञः। (१०.२५)

११. -- हिमालयः। (१०.२५)

१२. -- अश्वत्थः। (१०.२६)

१३. -- नारदः। (१०.२६)

१४. -- चित्ररथः। (१०.२६)

१५. -- कपिलः मुनिः। (१०.२६)

१६. -- ऐरावतम्। (१०.२७)

१७. -- नराधिपम्। (१०.२७)

१८. -- वज्रम्। (१०.२८)

१९. -- कामधुक्। (१०.२८)

२०. -- वासुकिः। (१०.२८)

२१. -- अर्यमा। (१०.२९)

२२. -- मृगेन्द्रः। (१०.३०)

२३. -- मकरः। (१०.३१)

२४. -- कुसुमाकरः। (१०.३५)

२५. -- व्यासः। (१०.३७)

एतेषां गुणानां परिचयः

षष्ठीविभक्तिः (सर्वनामशब्दाः) **१०**

एतत् सम्भाषणं सावधानं पठत -



छात्रः नमस्ते महोदय !

आचार्यः : स्वागतम् । अद्य कः विशेषः ?

छात्रः काचन शङ्का अस्ति । गुणाः कतिविधाः ?

आचार्यः : गुणाः त्रिविधाः भवन्ति । ते च - सात्त्विकः, राजसः तामसः इति । भगवता गीतायाम् उक्तम् अपि यत् -

सत्त्वं रजस्तम इति गुणाः प्रकृतिसम्भवाः ।
निबध्नन्ति महाबाहो देहे देहिनमव्ययम् ।। (१४.५)

छात्रः **एतेषां** परिचयः कथं भवति ?

आचार्यः : **अस्माकं** जीवने सर्वत्र वयम् **एतेषां** लक्षणानाम् अनुभवं कुर्मः ।

छात्रः अहं बहुवारं शृणोमि - '**एतस्य** आहारः राजसः । **तस्य** प्रवृत्तिः सात्त्विकी । **कस्य** दानं तामसम् ?' इति । किन्तु **एतेषां** वाक्यानाम् अर्थं न जानामि । कृपया विस्तरेण वदति वा ?

आचार्यः : जनानां स्वभावानुगुणं जीवनपद्धत्याः अनुसारं वा **तेषां** वर्गीकरणं भवति ।

छात्रः तत् कथम् ?

आचार्यः : **येषां** देवे श्रद्धा भवति, ये सर्वदा परोपकारं मितभाषणं च कुर्वन्ति ते जनाः सात्त्विकाः । **येषां** भोगविलासे एव अधिका रुचिः **तेषां** नाम राजसाः । ये पुनः दम्भ-अहङ्कारादिगुणयुक्ताः **तेषां** नाम तामसाः ।

छात्रः एतेषु **कस्य** आहारः कीदृशः भवति ?

आचार्यः : **यस्य** आहारः आयुर्वर्धकः, आरोग्यवर्धकः, शक्तिवर्धकः स्वादयुक्तः च भवति सः जनः सात्त्विकः । यः अतीव उष्णम्, अतिकटुः, अत्यन्तं लवणयुक्तम् आरोग्यनाशकं भोजनं करोति **तस्य** नाम राजसः । यः तामसः जनः **तस्य** आहारः सारहीनः, पर्युषितः उच्छिष्टः च भवति ।

छात्रः **एतेषां** तपस्या अपि त्रिप्रकारका भवति वा ?

आचार्यः : आम् । फलस्य आशां विना एकाग्रचित्तेन या तपस्या भवति **तस्याः** नाम सात्त्विकी । **यस्याः** आचरणं दम्भभावेन भवति सा राजसी । अविवेकेन अन्यस्य विनाशार्थं या तपस्या भवति **तस्याः** नाम तामसी तपस्या । **एतस्य सर्वस्य** वर्णनं भगवद्गीतायाः सप्तदशे अध्याये अस्ति । अतः गीतायाः सम्यक् अध्ययनं करोतु ।

छात्रः आम् । तथैव करोमि । धन्यवादः ।

एतानि वाक्यानि परिशीलयत -



एतस्य नाम एकलव्यः ।	**एतस्याः** नाम गान्धारी ।	**एतस्य** नाम गाण्डीवम् ।
एतस्य नाम कृष्णः ।	**एतस्य** नाम अर्जुनः ।	**एतस्य** नाम रथः ।
एतस्य नाम भीमः ।	**एतस्य** नाम युधिष्ठिरः ।	**एतस्य** नाम कुरुक्षेत्रम् ।

अवधेयम्

(सर्वनामशब्दानां षष्ठीविभक्तेः रूपाणि)

सर्वनामशब्दाः	एकवचनम्	द्विवचनम्	बहुवचनम्
एतद् - (पुंलिङ्गे नपुंसके च)	एतस्य	एतयोः	एतेषाम्
एतद् - (स्त्रीलिङ्गे)	एतस्याः	एतयोः	एतासाम्
तद् - (पुंलिङ्गे नपुंसके च)	तस्य	तयोः	तेषाम्
तद् - (स्त्रीलिङ्गे)	तस्याः	तयोः	तासाम्
अस्मद् - (त्रिषु लिङ्गेषु)	मम	आवयोः	अस्माकम्
युष्मद् - (त्रिषु लिङ्गेषु)	तव	युवयोः	युष्माकम्
किम् - (पुंलिङ्गे नपुंसके च)	कस्य	कयोः	केषाम्
किम् - (स्त्रीलिङ्गे)	कस्याः	कयोः	कासाम्

अभ्यासः

१. **चित्राणि दृष्ट्वा यथोदाहरणं वाक्यानि लिखत -**

यथा - १. एषः अर्जुनः । **एतस्य** गाण्डीवम् अस्ति ।

----

२. सः कर्णः । **तस्य** कवचम् अस्ति ।



३. एषा सभा । **एतस्याः** सञ्चालकः अस्ति ।

----

४. सा गान्धारी । तस्याः पुत्रः दुर्योधनः अस्ति ।



५. मम माला ।



६. तव शङ्खः ।

----

२. गीतातः श्लोकान् परिशील्य यथोदाहरणं रिक्तस्थानानि पूरयत -

यथा - **तव** शिष्येण व्यूढां महतीं चमूं पश्य । (१.३)

१. -------------------- तु ये विशिष्टाः तान् निबोध । (१.७)

२. -------------------- भीष्माभिरक्षितं तद् बलम् अपर्याप्तम् । (१.१०)

३. पितामहः ----------------- हर्षं सञ्जनयन् उच्चैः शङ्खं दध्मौ । (१.१२)

४. यः इन्द्रियाणि इन्द्रियार्थेभ्यः संहरते ----------------- प्रज्ञा प्रतिष्ठिता । (२.५८)

५. ----------------- वशे इन्द्रियाणि ----------------- प्रज्ञा प्रतिष्ठिता । (२.६१)

६. यः आत्मतृप्तः ------------------ कार्यं न विद्यते। (३.१७)

७. ----------------- वशं न आगच्छेत्। (३.३४)

८. बहूनि मम ------------------ च जन्मानि व्यतीतानि। (४.५)

९. --------------------- यत् श्रेयः तत् सुनिश्चितम् एकं ब्रूहि। (५.१)

१०. -------------------- कर्मसंन्यासात् कर्मयोगः विशिष्यते। (५.२)

११. ------------------- तत् ज्ञानम् आदित्यवत् प्रकाशयति। (५.१६)

१२. ----------------- अहं न प्रणश्यामि। (६.३०)

१३. मनसः चञ्चलत्वात् --------------------- स्थिरां स्थितिम् अहं न पश्यामि। (६.३३)

१४. अहं ----------------- निग्रहं वायोः इव सुदुष्करं मन्ये। (६.३४)

१५. ----------------- नित्ययुक्तः एकभक्तिः ज्ञानी विशिष्यते। (७.१७)

१६. सः तया श्रद्धया युक्तः ------------------- राधनम् ईहते। (७.२२)

१७. नित्याभियुक्तानां ------------------- योगक्षेमम् अहं वहामि। (९.२२)

१८. अथवा एतेन बहुना ज्ञातेन ------------------- किम् ? (१०.४२)

१९. ---------------- न आदिं, न मध्यं न पुनः अन्तं पश्यामि। (११.१६)

२०. अहं मृत्युसंसारसागरात् ------------------ समुद्धर्ता भवामि। (१२.७)

२१. ----------------- गुणप्रवृद्धाः विषयप्रवालाः शाखाः अधः ऊर्ध्वं च प्रसृताः। (१५.२)

२२. मोहात् ----------------- परित्यागः तामसः परिकीर्तितः। (१८.७)

२३. ------------------ इमं संवादं धर्म्यम् अध्येष्यते। (१८.७०)

२४. --------------- वचनं करिष्ये। (१८.७३)

३. मञ्जूषायां प्रदत्तैः उचितपदैः रिक्तस्थानानि पूरयत -

यथा - तस्य **हरिणस्य** वर्णः सुवर्णमयः।

१. एतस्य -------------------- विषयः कः ?

२. अस्माकं ---------------------------------- मातृभाषा संस्कृतम्।

३. तासां ------------------------ काचित् राधा।

४. तयोः --------------------------- पिता वसुदेवः।

५. तेषां ------------------- शुण्डा दीर्घा।

६. मम --------------------- नाम अदितिः।

७. एतयोः ------------------ नीडं कुत्र ?

भगिन्याः
गोपिकानाम्
हरिणस्य
गजानाम्
पुस्तकस्य
कृष्णबलरामयोः
खगयोः
भारतीयानाम्

४. यथोदाहरणं कोष्ठके दत्तानां सर्वनामशब्दानां षष्ठीविभक्त्यन्तानि रूपाणि लिखित्वा रिक्तस्थानानि पूरयत -

यथा - **एतस्य** मूल्यं किम् ? (एतद्)

१. अहं ------------ निग्रहं मन्ये। (तद्) (६.३४)

२. ---------- सर्वे समारम्भाः। (यद्) (४.१९)

३. ---------- आत्मा भूतभावनः। (अस्मद्) (९.५)

४. ---------- योनिः महद्ब्रह्म। (तद्) (१४.४)

५. ---------- लोक इमाः प्रजाः। (यद्) (१०.६)

६. ---------- के योगवित्तमाः। (तद्) (१२.१)

७. ---------- प्रज्ञा प्रतिष्ठिता। (तद्) (२.५७)

८. ---------- शिष्येण धीमता। (युष्मद्) (१.३)

९. देहे ------------------------ भारत। (सर्व) (२.३०)

१०. त्वम् -------------------- पूज्यः च गुरुः गरीयान्। (इदम्) (११.४३)

११. ------------------------ बुद्धिः न लिप्यते। (यद्) (१८.१७)

१२. ------------------------ दिव्यानाम् अन्तः नास्ति। (अस्मद्) (१०.४०)

१३. ------------------------ हि पितरः पतन्ति। (इदम्) (१.४२)

१४. ------------------------ उत्सादनार्थं वा। (पर) (१७.१९)

१५. ------------------------ तु इदं पर्याप्तम्। (एतद्) (१.१०)

५. बन्धुवाचकपदानि पठत वाक्यानि रचयत च -

यथा - **पितुः** पिता - पितामहः	व्यासः - शक्तिः	**व्यासस्य** पितामहः शक्तिः।
१. पितुः माता - पितामही	धृतराष्ट्रः - सत्यवती	--।
२. मातुः पिता - मातामहः	कृष्णः - देवकः	--।
३. मातुः माता - मातामही	अभिमन्युः - देवकी	--।
४. पितुः भ्राता - पितृव्यः	युधिष्ठिरः - विदुरः	--।
५. मातुः भ्राता - मातुलः	दुर्योधनः - शकुनिः	--।

६. पुत्रस्य पुत्रः - पौत्रः	शूरसेनः - कृष्णः	-- ।
७. पुत्र्याः पुत्रः - दौहित्रः	कुन्तिभोजः - भीमः	-- ।
८. दुहितुः (पुत्र्याः) पतिः - जामाता	देवकः - वसुदेवः	-- ।
९. भगिन्याः पुत्रः - भागिनेयः	कृष्णः - अभिमन्युः	-- ।
१०. भगिन्याः पतिः - आवुत्तः	धृष्टद्युम्नः - युधिष्ठिरः	-- ।
११. सहोदरस्य पत्नी - भ्रातृजाया	बलरामः - रुक्मिणी	-- ।
१२. पत्युः सहोदरः - देवरः	गान्धारी - पाण्डुः	-- ।
१३. पत्न्याः सहोदरः - श्यालः	विराटः - कीचकः	-- ।
१४. जेष्ठपितृव्यस्य पत्नी - पितृव्या	नकुलः - गान्धारी	-- ।
१५. मातुलस्य पत्नी मातुलानी	बलरामः - प्राप्तिः	-- ।

स्वाभ्यासः

६. स्वबान्धवानां परस्परसम्बन्धम् अधिकृत्य पञ्च वाक्यानि रचयत -

१. -- ।

२. -- ।

३. -- ।

४. -- ।

५. -- ।

बालकः ध्रुवः

पुरतः/पृष्ठतः/वामतः/दक्षिणतः/उपरि/अधः/अन्तः

११

उच्चैः पठत जानीत च -



बालकः ध्रुवः वने तपः करोति। सः एकस्य वृक्षस्य **अधः** उपविशति। वृक्षस्य **उपरि** खगाः कूजन्ति। ध्रुवस्य **दक्षिणतः** अनेके वृक्षाः सन्ति। तस्य वामतः अनेके पशवः सन्ति। तस्य पृष्ठतः पर्वताः सन्ति। परं सः **वामतः दक्षिणतः पृष्ठतः पुरतः** कुत्रापि न पश्यति। तस्य **अन्तः** केवलं श्रीविष्णोः चिन्तनम् अस्ति। अतः सः अन्यत् किमपि न पश्यति। एकाग्रतया केवलं विष्णोः चिन्तनम् एव करोति। प्रसन्नः श्रीविष्णुः तस्य **पुरतः** आगच्छति कथयति च - "ध्रुव ! अहं सन्तुष्टः अस्मि। तव **पुरतः** उपस्थितः अस्मि। वरं ददामि" इति।

अभ्यासः

१. पाठं पठित्वा पुरतः/पृष्ठतः/वामतः/दक्षिणतः/उपरि इत्येतैः यथोदाहरणं वाक्यानि पूरयत -

यथा - ध्रुवस्य **अन्तः** श्रीविष्णोः चिन्तनम् अस्ति।

१. ध्रुवस्य --------------------- वृक्षाः सन्ति।

२. पशवः ध्रुवस्य --------------------- सन्ति।

३. ध्रुवस्य -------------------- पर्वताः सन्ति।

४. खगाः वृक्षस्य -------------------- सन्ति।

५. श्रीविष्णुः ध्रुवस्य -------------- आगच्छति।

२. पुरतः/पृष्ठतः/वामतः/दक्षिणतः/उपरि/अधः/अन्तः इत्येतेषाम् उचितं प्रयोगं कृत्वा रिक्तस्थानानि पूरयत -



यथा - कृष्णस्य **पुरतः** अश्वाः सन्ति।

१. अर्जुनस्य -------------- श्रीकृष्णः अस्ति।

२. श्रीकृष्णस्य ------------ सेना अस्ति।

३. श्रीकृष्णस्य ------------- पाण्डवाः सन्ति ।

४. श्रीकृष्णस्य ------------- कौरवाः सन्ति ।

५. रथस्य ------------- भूमिः अस्ति ।

६. रथस्य ------------- ध्वजः अस्ति ।

७. रथस्य ------------- शस्त्राणि सन्ति ।

३. मञ्जूषाद्वयात् एकैकं शब्दं चित्वा वाक्यनिर्माणं कुरुत -

धृतराष्ट्रस्य, मेघस्य, शरीरस्य, मन्दिरस्य, शिक्षकस्य, **कुन्त्याः**	नदी, खगाः, **पाण्डुः**, छात्राः, सञ्जयः, आत्मा

यथा - कुन्त्याः **दक्षिणतः** पाण्डुः अस्ति ।

१. -------------- अधः -------------- डयन्ते ।

२. -------------- पुरतः -------------- सन्ति ।

३. -------------- पृष्ठतः -------------- प्रवहति ।

४. -------------- वामतः -------------- अस्ति ।

५. -------------- अन्तः -------------- भवति ।

४. श्लोकं पठित्वा कः कुत्र अस्ति इति लिखत -

दक्षिणे पाण्डवाः यस्य वामे च कौरवास्तथा ।
पुरतस्त्वर्जुनो यस्य तं वन्दे यदुनन्दनम् ॥

दक्षिणे = दक्षिणतः, वामे = वामतः, यदुनन्दनम् = श्रीकृष्णम्

१. श्रीकृष्णस्य ------------------ पाण्डवाः सन्ति ।

२. श्रीकृष्णस्य ------------------ कौरवाः सन्ति ।

३. श्रीकृष्णस्य ------------------ अर्जुनः अस्ति ।

४. अर्जुनस्य ------------------ श्रीकृष्णः अस्ति ।

अवधेयम्

वयम् **अर्जुनः, भीमः, हरिः, कविः, साधुः, पिता** इत्येतानि पुंलिङ्गपदानि **गीता, लता, गतिः, मतिः, स्त्री, दैवी, नारी, माता** इत्येतानि स्त्रीलिङ्गपदानि **अस्त्रम्, फलम्, वचनम्, वारि** इत्येतानि नपुंसकलिङ्गपदानि च ज्ञातवन्तः । इदानीं वयं पदानां वर्णविच्छेदं पश्यामः । यथा -

भीमः - भ् + ई + म् + अः

साधुः - स् + आ + ध् + उः

माता - म् + आ + त् + आ

सेना - स् + ए + न् + आ

हरिः - ह् + अ + र् + इः

दैवी - द् + ऐ + व् + ई

भीमः इति प्रथमाविभक्तेः एकवचनस्य रूपम् अस्ति । अस्य मूलशब्दः तु **भीम** इति प्रातिपदिकसंज्ञकः अस्ति । एवमेव अन्यानि अपि अवधेयानि सन्ति ।

अधः लिखितानां पदानां प्रातिपदिकं प्रथमाविभक्तेः एकवचनान्तानि रूपाणि च सावधानतया परिशीलयत -

प्रातिपदिकम्	**एकवचनान्तम्**	**प्रातिपदिकम्**	**एकवचनान्तम्**
१. महाभारत	महाभारतम्	६. ग्लानि	ग्लानिः
२. मातृ	माता	७. युद्ध	युद्धम्
३. प्रकृति	प्रकृतिः	८. विष्णु	विष्णुः
४. मोह	मोहः	९. ध्रुव	ध्रुवः
५. ईश्वर	ईश्वरः	१०. राज्य	राज्यम्

५. यथोदाहरणं प्रातिपदिकानां वर्णविच्छेदं लिखत -

यथा - **पशु** = प् + अ + श् + उ ।

१. कृष्ण = -- ।

२. महाभारत = -- ।

३. मातृ = -- ।

४. प्रकृति = -- ।

५. मोह = -- ।

६. ईश्वर = -- ।

७. ग्लानि = -- ।

८. युद्ध = -- ।

९. विष्णु = -- ।

१०. ध्रुव = -- ।

११. राज्य = -- ।

कस्यापि प्रातिपदिकस्य अन्ते यः वर्णः भवति सः प्रातिपदिकः तदन्तः भवति । यथा -

- **मुनि** - म् + उ + न् + इ' अत्र अन्तिमवर्णः 'इ' अस्ति । अतः **'मुनि'** शब्दः **इकारान्तः** ।
- **साधु** - स् + आ + ध् + उ' अत्र अन्तिमवर्णः 'उ' अस्ति । अतः **'साधु'** शब्दः **उकारान्तः** ।
- **पितृ** - प् + इ + त् + ऋ' अत्र अन्तिमवर्णः 'ऋ' अस्ति । अतः **'पितृ'** शब्दः **ऋकारान्तः** ।

६. अधः दत्तानां प्रातिपदिकानां वर्णविच्छेदं कृत्वा 'सः शब्दः किमन्तः' इति यथोदाहरणं लिखत -

यथा -	कर्ण	=	क् + अ + र् + ण् + अ।	अकारान्तः।
१.	राजविद्या	=	--	------------------- ।
२.	कौरव	=	--	------------------- ।
३.	राजसी	=	--	------------------- ।
४.	कुलस्त्री	=	--	------------------- ।
५.	पणवानक	=	--	------------------- ।
६.	विधातृ	=	--	------------------- ।
७.	प्रवृत्ति	=	--	------------------- ।
८.	ऐरावत	=	--	------------------- ।
९.	भ्रातृ	=	--	------------------- ।
१०.	बुद्धि	=	--	------------------- ।
११.	धृष्टकेतु	=	--	------------------- ।

ध्यातव्यम्

उपरि उक्तेषु सर्वेषु शब्देषु अन्तिमवर्णः स्वरः (अ, आ, इ, ई, उ, ऊ, ऋ, ॠ, ए, ऐ, ओ, औ) एव अस्ति। स्वर-वर्णानाम् 'अच्' इति नाम अस्ति। अतः एते सर्वे शब्दाः अजन्ताः सन्ति।

('अच्'अन्ते यस्य सः = अजन्तः)

स्वाभ्यासः

एतत्संख्याकेषु गीताश्लोकेषु अधः, अन्तः, पृष्ठतः इत्येतेषां प्रयोगं परिशीलयत -

१. एकादशाध्यायस्य चत्वारिंशः श्लोकः (११.४०)

२. त्रयोदशाध्यायस्य पञ्चदशः श्लोकः (१३.१५)

३. चतुर्दशाध्यायस्य अष्टादशः श्लोकः (१४.१८)

४. पञ्चदशाध्यायस्य द्वितीयः श्लोकः (१५.२)

किं युद्धम् आवश्यकम् ?

आवश्यकम्/मास्तु/पर्याप्तम्/धन्यवादः/स्वागतम्

१२

युद्धस्थले अर्जुनः बन्धुजनान् पश्यति । दुःखेन सः कृष्णं वदति -

अर्जुनः हे मधुसूदन ! अहं राज्यसुखं न इच्छामि ।

कृष्णः किं भवतः कृते राज्यं न **आवश्यकम्** ?

अर्जुनः न, मम कृते राज्यं न **आवश्यकम्** । राज्येन अहं किं करोमि ?

कृष्णः भवान् सुखं प्राप्नोति । ऐश्वर्यं च प्राप्नोति ।

अर्जुनः **मास्तु । मास्तु । पर्याप्तम्** ऐश्वर्यम् अस्ति । अहम् अधिकं न इच्छामि ।

कृष्णः ऐश्वर्यं **मास्तु** । परन्तु राज्येन सर्वत्र कीर्तिः भवति ।

अर्जुनः **मास्तु** । किमपि न **आवश्यकम्** । **धन्यवादः** ।

कृष्णः किम् एतादृशं चिन्तनम् **आवश्यकम्** ?

अर्जुनः येषां कृते अस्माकं राज्यं भोगाः च सन्ति ते आचार्याः पितरः पुत्रादयः अत्र मरणं प्राप्नुवन्ति । मधुसूदन ! एतेषां मरणं **मास्तु** । त्रैलोक्यराज्यस्य कृते अपि अहम् एतेषां हननं न करोमि । किं पुनः भूम्याः कृते ?

कृष्णः मोहः **मास्तु** । फलस्य इच्छां विना एव युद्धम् **आवश्यकम्** । मम एकस्य शरणम् एव **पर्याप्तम्** । अतः युद्धभूमौ भवतः **स्वागतम्** ।

अभ्यासः

१. श्रीकृष्णस्य मतानुसारं जीवने किम् आवश्यकं किं च मास्तु इति मञ्जूषायाः साहाय्येन यथोदाहरणं लिखत -

अनुद्वेगकरं वाक्यम्, कामः, क्रोधः, लोभः, दर्पः, सौम्यत्वम्, मौनम्, **उद्वेगकरं वाक्यम्**, ब्रह्मचर्यम्, विधिहीनः यज्ञः, अहङ्कारः

यथा - उद्वेगकरं वाक्यम् - **मास्तु** ।

१. -- । २. -- ।

३. --- ।
४. --- ।
५. --- ।
६. --- ।
७. --- ।
८. --- ।
९. --- ।
१०. --- ।

❖ **एवमेव श्रीमद्भगवद्गीतायाः षोडशसप्तदश-अध्याययोः पठनं कृत्वा जीवने किम् आवश्यकं किं च मास्तु इति जानीत ।**

२. अधः प्रदत्तान् वाक्यांशान् यथोदाहरणं संयोज्य पुनः लिखत -

यथा - **१. जीवनस्य कृते**	पापस्य नाशनम् आवश्यकम् ।
२. श्रीकृष्णस्य कृते	हस्तिनापुरम् आवश्यकम् ।
३. धृतराष्ट्रस्य कृते	**गीतायाः ज्ञानम् आवश्यकम् ।**
४. अर्जुनस्य कृते	सेनापतिपदम् आवश्यकम् ।
५. दुर्योधनस्य कृते	गाण्डीवम् आवश्यकम् ।
६. द्रोणस्य कृते	केवलं पुत्रप्रेम आवश्यकम् ।

यथा - १. जीवनस्य कृते गीतायाः ज्ञानम् आवश्यकम् ।
२. --- ।
३. --- ।
४. --- ।
५. --- ।
६. --- ।

३. मञ्जूषातः उचितानि पदानि चित्वा रिक्तस्थानानि पूरयत -

आवश्यकम्, मास्तु, पर्याप्तम्, धन्यवादः, स्वागतम्

कृष्णः अर्जुनं वदति धैर्यम् ---------- । क्लैब्यं ---------- । युद्धस्य कृते अस्माकं सैन्यबलं --------- अस्ति । चिन्ता -------- । धर्मस्य जयार्थं युद्धम् ------------- । अतः युद्धं कुरु । तदा अर्जुनः वदति - "हे कृष्ण! भवान् यत् दिव्यं ज्ञानं दत्तवान्, तदर्थं ---------- । अन्ते श्रीकृष्णः अर्जुनं प्रति '----------' इति वदति ।

गङ्गातीरं चलामः

लट्लकारः **१३**

एतत् सम्भाषणम् उच्चैः पठत अवगच्छत च -

विदुरः - भ्रातरं भ्रातृजायां च **नमामि**।

धृतराष्ट्रः - प्रसन्नः भवतु। स्वागतम्।

गान्धारी - विदुर ! सर्वं कुशलं वा ?

विदुरः - आम्, सर्वं कुशलम् **अस्ति**। भवतोः जीवनं कथं **चलति** ?

धृतराष्ट्रः - आवां तु आनन्देन **जीवावः**। युधिष्ठिरः सम्यक् सेवां **करोति**। भीमः समयेन भोजनं **निर्माति**। प्रतिदिनं नूतनम् आहारं **प्राप्नुवः**। सेवायां कुत्रापि न्यूनता न **भवति**। एते तु अस्माकं पुत्राणाम् अपेक्षया अपि सम्यक् व्यवहारं **कुर्वन्ति**। यत् **इच्छावः** तदेव **यच्छन्ति**।

विदुरः - शोभनम्, परन्तु पूर्वं भवान् यान् **निन्दति** स्म इदानीं तेषाम् एव भोजनं **करोति**। भवान् **चिन्तयति** यत् भीमः परमश्रद्धया भोजनम् **आनयति**। परन्तु तथा नास्ति.... । अहो ! जीवनस्य निमित्तं मनुष्यस्य कथं प्रबला इच्छा **अस्ति** ? इति।

धृतराष्ट्रः - तथा **नास्ति**। भवान् न **जानाति**। ते सर्वे अपि प्रातः आवां **नमन्ति**।

विदुरः - भवान् **कथयति** तथा **नास्ति** इति। परन्तु चिन्तयतु, यदि कोऽपि भवतः कृते विषं **ददाति**, भवन्तम् अग्निना **ज्वालयति**, क्षेत्रं धनं च **अपहरति**, भवतः पत्नीं **द्वेष्टि**, तस्याः अपमाननं करोति तदा भवतः भावः कीदृशः भवति ? भवान् किं करोति ?

धृतराष्ट्रः - तदा अहं तु निश्चयेन तं हन्मि।

विदुरः - भवतः वंशस्य विनाशकारणम् अपि एतदेव **अस्ति**।

धृतराष्ट्रः - अहं भवतः भावं न **अवगच्छामि**। स्पष्टं वदति किम् ?

विदुरः - भवान् दुर्योधनः च पाण्डवैः सह यद्यपि असमीचीनं व्यवहारं कृतवन्तौ तथापि एते सज्जनाः भवद्भिः सह साधुतया **व्यवहरन्ति**। अधुना अस्माकं दायित्वं यत् वयम् अत्र न **तिष्ठामः**। सर्वं त्यक्त्वा गङ्गातीरं **चलामः** इति।

धृतराष्ट्रः - अस्तु। तथैव **कुर्मः**।

एतेषु वाक्येषु लट्लकारस्य रूपाणि प्रयुक्तानि सन्ति। वर्तमानकाले लट्लकारस्य प्रयोगः भवति।

अवधेयम्

संस्कृतभाषायां **भवति, अस्ति, गच्छति, प्रविशति, वदति, धावति, क्रीडति** इत्यादीनि पदानि दृश्यन्ते। एतानि सर्वाणि क्रियापदानि। क्रियापदस्य मूलं धातुः। यथा - **'भवति'** इति क्रियापदस्य मूलं **'भू'** धातुः। एवमेव **'प्रविशति' 'वदति' 'क्रीडति'** इत्येतेषां मूलं क्रमशः **'विश्' 'वद्' 'क्रीड्'** धातवः सन्ति। भू धातोः लट्लकारे एवं रूपाणि भवन्ति -

	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमपुरुषः -	**भवति**	**भवतः**	**भवन्ति**
मध्यमपुरुषः -	**भवसि**	**भवथः**	**भवथ**
उत्तमपुरुषः -	**भवामि**	**भवावः**	**भवामः**

एवम् अन्येषामपि। एतेषाम् उपयोगः यथा -

	एकवचनम्		द्विवचनम्		बहुवचनम्	
	बालकः		बालकौ		बालकाः	
	बालिका		बालिके		बालिकाः	
	भवती		भवत्यौ		भवत्यः	
	भवान्		भवन्तौ		भवन्तः	
	सः		तौ		ते	
	सा	**अस्ति**	ते	**स्तः**	ताः	**सन्ति**
	तत्		ते		तानि	
प्रथमपुरुषः	एषः	**गच्छति**	एतौ	**गच्छतः**	एते	**गच्छन्ति**
	एषा		एते		एताः	
	मुनिः	**वदति**	मुनी	**वदतः**	मुनयः	**वदन्ति**
	गुरुः		गुरू		गुरवः	
	पिता		पितरौ		पितरः	
	माता		मातरौ		मातरः	
	व्यक्तिः		व्यक्ती		व्यक्तयः	
	धेनुः		धेनू		धेनवः	
	वधूः		वध्वौ		वध्वः	

मध्यमपुरुषः	त्वम्	असि गच्छसि वदसि	युवाम्	स्थः गच्छथः वदथः	यूयम्	स्थ गच्छथ वदथ

उत्तमपुरुषः	अहम्	अस्मि गच्छामि वदामि	आवाम्	स्वः गच्छावः वदावः	वयम्	स्मः गच्छामः वदामः

अभ्यासः

१. यथोदाहरणम् उचितं क्रियापदं संयोजयत -

सः →	वेत्ति
तौ	गृह्णासि
ते	जानामि
त्वम्	इच्छथः
युवाम्	याति
यूयम्	विशतः
अहम्	चरतः
आवाम्	सृजामः
वयम्	धरावः
भवान्	ध्यायन्ति
भवन्तौ	पश्यथ

२. अधः प्रदत्तानां पदानां द्विवचन-बहुवचनरूपाणि यथोदाहरणं लिखत -

	एकवचनम्	द्विवचनम्	बहुवचनम्
यथा -	भवति	भवतः	भवन्ति
	सम्भवामि	--------------------	-----------------------
	रक्षसि	--------------------	-----------------------
	गच्छति	--------------------	-----------------------
	भजामि	--------------------	-----------------------
	अर्चसि	--------------------	-----------------------
	पठसि	--------------------	-----------------------
	तपामि	--------------------	-----------------------
	भ्रमति	--------------------	-----------------------
	त्यजति	--------------------	-----------------------
	तरति	--------------------	-----------------------
	वससि	--------------------	-----------------------
	हरति	--------------------	-----------------------

अवधेयम्

कतिचन विशेषक्रियापदानि -

	एकवचनम्	द्विवचनम्	बहुवचनम्
'कृ' धातुः	करोति	कुरुतः	कुर्वन्ति
	करोषि	कुरुथः	कुरुथ
	करोमि	कुर्वः	कुर्मः

'जागृ' धातुः	जागर्ति	जागृतः	जाग्रति
	जागर्षि	जागृथः	जागृथ
	जागर्मि	जागृवः	जागृमः

'ग्रह्' धातुः	गृह्णाति	गृह्णीतः	गृह्णन्ति
	गृह्णासि	गृह्णीथः	गृह्णीथ
	गृह्णामि	गृह्णीवः	गृह्णीमः

'दा' धातुः	ददाति	दत्तः	ददति
	ददासि	दत्थः	दत्थ
	ददामि	दद्वः	दद्मः
एवमेव '**धा**'धातोः **दधाति धत्तः दधति** इत्यादीनि रूपाणि भवन्ति ।			

'श्रु' धातुः	शृणोति	शृणुतः	शृण्वन्ति
	शृणोषि	शृणुथः	शृणुथ
	शृणोमि	शृण्वः/शृणुवः	शृण्मः/शृणुमः
'हा' धातुः	जहाति	जहितः	जहति
	जहासि	जहिथः	जहिथ
	जहामि	जहिवः	जहिमः
'बध्' धातुः	बध्नाति	बध्नीतः	बध्नन्ति
	बध्नासि	बध्नीथः	बध्नीथ
	बध्नामि	बध्नीवः	बध्नीमः
एवमेव '**अश्**' धातोः च **अश्नाति अश्नीतः अश्नन्ति** इत्यादीनि रूपाणि भवन्ति । तथैव '**ज्ञा**' धातोः **जानाति जानीतः जानन्ति** इत्यादीनि रूपाणि भवन्ति ।			

'चि' धातुः	चिनोति	चिनुतः	चिन्वन्ति
	चिनोषि	चिनुथः	चिनुथ
	चिनोमि	चिन्वः/चिनुवः	चिन्मः/चिनुमः
'हु' धातुः	जुहोति	जुहुतः	जुह्वति
	जुहोषि	जुहुथः	जुहुथ
	जुहोमि	जुहुवः	जुहुमः
'शक्' धातुः	शक्नोति	शक्नुतः	शक्नुवन्ति
	शक्नोषि	शक्नुथः	शक्नुथ
	शक्नोमि	शक्नुवः	शक्नुमः
एवमेव '**आप्**' धातोः **आप्नोति आप्नुतः आप्नुवन्ति** इत्यादीनि रूपाणि भवन्ति ।			

'स्तु' धातुः	स्तौति	स्तुतः	स्तुवन्ति
	स्तौषि	स्तुथः	स्तुथ
	स्तौमि	स्तुवः	स्तुमः
'हन्' धातुः	हन्ति	हतः	घ्नन्ति
	हंसि	हथः	हथ
	हन्मि	हन्वः	हन्मः
'ब्रू' धातुः	ब्रवीति	ब्रूतः	ब्रुवन्ति
	ब्रवीषि	ब्रूथः	ब्रूथ
	ब्रवीमि	ब्रूवः	ब्रूमः
द्विष् धातुः	द्वेष्टि	द्विष्टः	द्विषन्ति
	द्वेक्षि	द्विष्ठः	द्विष्ठ
	द्वेष्मि	द्विष्वः	द्विष्मः

३. अधः प्रदत्तानां पदानां द्विवचन-बहुवचनरूपाणि यथोदाहरणं लिखत -

	एकवचनम्	द्विवचनम्	बहुवचनम्
यथा -	शक्नोति	शक्नुतः	शक्नुवन्ति
	हन्मि	-------------------------	-------------------------
	स्तौति	-------------------------	-------------------------
	ब्रवीति	-------------------------	-------------------------
	चिनोषि	-------------------------	-------------------------
	ददामि	-------------------------	-------------------------
	बध्नासि	-------------------------	-------------------------
	प्राप्नोति	-------------------------	-------------------------
	जानामि	-------------------------	-------------------------
	दधाति	-------------------------	-------------------------
	भाति	-------------------------	-------------------------

४. अधः प्रदत्तानां धातूनां कोष्ठके निर्दिष्टं पुरुषवचनानुसारं यथोदाहरणं रूपाणि लिखत -

यथा - भू (मध्यमपुरुषः बहुवचनम्) = **भवथ**

१. कृ (प्रथमपुरुषः द्विवचनम्) = ----------------------------

२. दृश् (उत्तमपुरुषः एकवचनम्) = ----------------------------

३. स्था (प्रथमपुरुषः एकवचनम्) = तिष्ठति

४. लिख् (उत्तमपुरुषः द्विवचनम्) = ----------------------------

५. धाव् (मध्यमपुरुषः एकवचनम्) = ----------------------------

६. इष् (प्रथमपुरुषः बहुवचनम्) = ----------------------------

७. ब्रू (उत्तमपुरुषः बहुवचनम्) = ----------------------------

८. पठ् (प्रथमपुरुषः एकवचनम्) = ----------------------------

९. अस् (मध्यमपुरुषः एकवचनम्) = ----------------------------

१०. नश् (प्रथमपुरुषः द्विवचनम्) = ----------------------------

११. पत् (प्रथमपुरुषः बहुवचनम्) = ----------------------------

१२. जि (उत्तमपुरुषः एकवचनम्) = ----------------------------

१३. प्रच्छ् (मध्यमपुरुषः एकवचनम्) = ----------------------------

१४. दह् (प्रथमपुरुषः एकवचनम्) = ----------------------------

१५. हृ (उत्तमपुरुषः द्विवचनम्) = ----------------------------

१६. आप् (प्रथमपुरुषः बहुवचनम्) = ----------------------------

१७. या (मध्यमपुरुषः एकवचनम्) = ----------------------------

१८. भज् (उत्तमपुरुषः बहुवचनम्) = ----------------------------

१९. कथ् (प्रथमपुरुषः एकवचनम्) = ----------------------------

२०. गै (उत्तमपुरुषः एकवचनम्) = ----------------------------

५. गीतायाः प्रथमाध्यायस्य निर्दिष्ट-सङ्ख्यानुसारं श्लोकं पठित्वा रिक्तस्थानानि पूरयत -

यथा - नायका मम सैन्यस्य संज्ञार्थं तान् ब्रवीमि ते । (१.७)

१. सीदन्ति मम गात्राणि मुखं च ---------------------------- । (१.२९)

२. न च शक्नोमि अवस्थातुं ----------------- इव च मे मनः । (१.३०)

३. निमित्तानि च ---------------------------- विपरीतानि केशव । (१.३१)

४. न च श्रेयः ------------------------------ हत्वा स्वजनमाहवे । (१.३१)

५. यद्यप्येते न ------------------------------ लोभोपहतचेतसः । (१.३८)

६. कुलक्षये ------------------------------- कुलधर्माः सनातनाः । (१.४०)

७. अधर्माभिभवात्कृष्ण ---------------------------- कुलस्त्रियः । (१.४१)

८. नरकेऽनियतं वासो --------------------------- इति अनुशुश्रुम । (१.४४)

६. **गीतायाः द्वितीयाध्यायस्य निर्दिष्ट-सङ्ख्यानुसारं श्लोकं पठित्वा लट्लकारस्य क्रियापदानां योजनेन रिक्तस्थानानि पूरयत -**

१. तथा देहान्तरप्राप्तिर्धीरस्तत्र न -------------------------- । (२.१३)

२. यं हि न ------------------------- एते पुरुषं पुरुषर्षभ । (२.१५)

३. य एनं ------------------------- हन्तारं यश्चैनं ---------------------- हतम् । (२.१९)

४. कथं स पुरुषः पार्थ कं ------------------------- --------------------- कम् ? (२.२१)

५. अन्यानि -------------------------------- नवानि देही । (२.२२)

६. नैनं ---------------- शस्त्राणि नैनं ------------------------- पावकः । (२.२३)

७. न चैनं -------------------------- आपो न ----------------------- मारुतः । (२.२३)

८. आश्चर्यवत् ----------------------------- कश्चिदेनम् । (२.२९)

७. **कोष्ठकात् उचितपदानि चित्वा रिक्तस्थानानि पूरयत -**

यथा - सैनिकः अधिकारिणं **पृच्छति** । (पृच्छतः, पृच्छति, पृच्छन्ति)

१. सः भुशुण्डिं ----------------------------- । (गृह्णाति, गृह्णीतः, गृह्णन्ति)

२. सर्वे युद्धं ------------------------------ । (करोति, कुरुतः, कुर्वन्ति)

३. काश्चन महिलाः तत् ---------------------------- । (पश्यतः, पश्यति, पश्यन्ति)

४. क्षेपणास्त्राणां तुमुलः ध्वनिः ------------------------ । (भवन्ति, भवति, भवतः)

५. ततः बालिके ------------------------ । (रोदिति, रुदन्ति, रुदतः)

६. माता ते बालिके गृहं ------------------------ । (नयति, नयन्ति, नयतः)

७. सायङ्काले युद्धविरामः ---------------------- । (भवन्ति, भवतः, भवति)

८. **यथोदाहरणं रक्तवर्णेन रञ्जितानां पदानां वचनं परिवर्त्य वाक्यानि लिखत -**

यथा - **सः** प्रतिदिनं गीतां **पठति** । ते प्रतिदिनं गीतां **पठन्ति** ।

१. **चित्तं** पुरुषं विषयेषु **बध्नाति** । -- ।

२. **मुनिः** इन्द्रियाणि निगृह्णाति । -- ।

३. **ब्राह्मणः** प्रतिदिनं जुहोति । -- ।

४. **भक्तः** शास्त्रवाक्यं शृणोति । -- ।

५. **योगी** ध्यानं **करोति** । -- ।

६. युवती ग्रन्थान् **क्रीणाति** । -- ।

७. **बालः** फलं **चिनोति** । -- ।

९. चित्राणि दृष्ट्वा यथोदाहरणं वाक्यानि रचयत -

यथा - (नृत्) भक्तौ नृत्यतः ।

१. (खाद्) ---------------------

२. (पूज्) ------------------------------- ।

३. (क्रीड्) ------------------------------- ।

४. (चिन्त्) ------------------------------- ।

५. (पच्) ------------------------------- ।

६. (दृश्) ------------------------------- ।

७. (नम्) --------------------------------- ।

स्वाभ्यासः

'क'-'ख' भागयोः प्रदत्तानां पदानां योजनेन विंशतिवाक्यानां निर्माणं कुरुत -

क	ख	क	ख
शिष्यः	शृणोति	मुनिः	ऋच्छति
मित्रम्	अभिनन्दति	पुरुषः	आप्नोति
शत्रुः	विनश्यति	बाला	तिष्ठति
संशयात्मा	लिखति	मतिः	वदति
चोरः	हरति	भगवान्	मोहयति
संयमी	पश्यति		

यथा - शिष्यः शृणोति।

१. ------------------------------------- ।
२. ------------------------------------- ।
३. ------------------------------------- ।
४. ------------------------------------- ।
५. ------------------------------------- ।
६. ------------------------------------- ।
७. ------------------------------------- ।
८. ------------------------------------- ।
९. ------------------------------------- ।
१०. ------------------------------------- ।
११. ------------------------------------- ।
१२. ------------------------------------- ।
१३. ------------------------------------- ।
१४. ------------------------------------- ।
१५. ------------------------------------- ।
१६. ------------------------------------- ।
१७. ------------------------------------- ।
१८. ------------------------------------- ।
१९. ------------------------------------- ।
२०. ------------------------------------- ।

महाभारतसंवादः

(अभ्यासपाठः) १४

सावधानं पठत जानीत च -



धृतराष्ट्रः पाण्डुः च सहोदरौ स्तः। धृतराष्ट्रस्य पुत्राः कौरवाः, पाण्डोः पुत्राः पाण्डवाः च सन्ति। कौरवाणां ज्येष्ठः दुर्योधनः अस्ति। सः अतीव दुष्टः अस्ति। पाण्डवेषु ज्येष्ठः युधिष्ठिरः अस्ति। सः परमः धार्मिकः विनयशीलः च अस्ति। धृतराष्ट्रः जन्मान्धः अस्ति। अतः राज्यसञ्चालनम् अनुजः पाण्डुः एव करोति।

पाण्डोः मृत्योः अनन्तरं कौरवाः पाण्डवेभ्यः ईर्ष्यन्ति। दुर्योधनः स्वमातुलस्य शकुनेः सूचनानुगुणं कार्यं करोति। शकुनिः महान् कुटिलः दुष्टः च अस्ति। वञ्चनया सः द्यूतक्रीडां कारयति। तस्यां सः दुर्योधनस्य पक्षतः छलेन युधिष्ठिरं पराजयते। अन्ततः पाण्डवाः वनवासं गच्छन्ति। द्वादश वर्षाणि वनवासम् एकवर्षम् अज्ञातवासं च कुर्वन्ति।

यदा पाण्डवाः प्रत्यागच्छन्ति तदा दुर्योधनः तेभ्यः राज्यार्धं दातुं न इच्छति। मध्यस्थः श्रीकृष्णः बहुवारं प्रयत्नं करोति, परन्तु सर्वं निष्फलं भवति। शनैः शनैः विवादः वृद्धिङ्गच्छति। अन्ततः युद्धं सुनिश्चितं भवति। तस्मिन् युद्धे श्रीकृष्णः अर्जुनस्य सारथ्यं स्वीकरोति। तस्य सेना दुर्योधनस्य पक्षे युद्धाय नियुक्ता भवति। कौरव-पाण्डवयोः सैनिकाः युद्धभूमौ कुरुक्षेत्रे एकत्रिताः भवन्ति।

तस्मिन् समये युद्धभूमौ स्वबान्धवान् दृष्ट्वा अर्जुनः मोहग्रस्तः भवति। सः चिन्तयति - 'एते सर्वे मम बान्धवाः सन्ति। एतान् कथं मरयामि ? पितामहभीष्मः, आचार्यः द्रोणः, कृपाचार्यः एते सर्वे मम पूजार्हाः सन्ति। एतान् हत्वा पापार्जनं न करोमि। तुच्छराज्यस्य सुखलोभेन एतावत् महत्पापं न करोमि' इति चिन्तयित्वा अर्जुनः शस्त्रं परित्यज्य रथे उपविशति।

तदा श्रीकृष्णः अर्जुनाय उपदेशं दत्त्वा तं बोधयति। अर्जुनस्य मोहभङ्गं करोति। एषः एव उपदेशः 'गीतोपदेशः' इति प्रसिद्धः अस्ति।

अभ्यासः

१. यथोदाहणम् एकपदेन उत्तराणि लिखत -

यथा - **कस्य** मृत्योः अनन्तरं कौरवाः पाण्डवेभ्यः ईर्ष्यन्ति स्म ? **पाण्डोः**

१. धृतराष्ट्रस्य ज्येष्ठः पुत्रः **कः** अस्ति ? ------------------------
२. पाण्डोः ज्येष्ठः पुत्रः **कः** अस्ति ? ------------------------
३. दुर्योधनः स्वभावेन **कीदृशः** अस्ति ? ------------------------
४. युधिष्ठिरः स्वभावेन **कीदृशः** अस्ति ? ------------------------
५. **कः** जन्मान्धः अस्ति ? ------------------------
६. **कः** मोहग्रस्तः भवति ? ------------------------
७. **कः** राज्यार्धं दातुं न इच्छति ? ------------------------
८. दुर्योधनस्य मातुलस्य नाम **किम्** ? ------------------------
९. श्रीकृष्णस्य सेना **कस्य** पक्षे युद्धाय नियुक्ता भवति ? ------------------------
१०. श्रीकृष्णः **कस्मै** उपदेशं ददाति ? ------------------------

२. यथोदाहरणं निम्नप्रश्नानाम् उत्तराणि पूर्णवाक्येन लिखत -

यथा - धृतराष्ट्रः पाण्डुः च **कौ** स्तः ? धृतराष्ट्रः पाण्डुः च **सहोदरौ** स्तः ।

१. राज्यसञ्चालनं कः करोति ? -- ।
२. श्रीकृष्णस्य उपदेशः केन नाम्ना ज्ञायते ? -- ।
३. के के पूजार्हाः सन्ति ? -- ।
४. शकुनिः स्वभावेन कीदृशः अस्ति ? -- ।
५. दुर्योधनः कस्मै राज्यार्धं दातुं न इच्छति ? -- ।
६. शकुनिः द्यूतक्रीडायां कथं युधिष्ठरं पराजयते ?

-- ।

७. कः उपदेशं दत्त्वा अर्जुनस्य मोहभङ्गं करोति ?

-- ।

८. युद्धभूमौ स्वबान्धवान् दृष्ट्वा अर्जुनः कीदृशः भवति ?

-- ।

९. द्यूतक्रीडायां पराजिताः पाण्डवाः कुत्र गच्छन्ति ?

-- ।

१०. पाण्डवाः कति वर्षाणि वनवासं कुर्वन्ति ?

-- ।

३. वर्णरञ्जितानां पदानाम् आधारेण यथोदाहरणं प्रश्ननिर्माणं कुरुत -

का / किम् / कीदृशः / कस्य / कः / कुत्र / कौ / कति / कस्य / कः / केन

यथा - **द्रौपदी** पाण्डवानां पत्नी अस्ति । **का** पाण्डवानां पत्नी अस्ति ?

१. **धृतराष्ट्रः** जन्मान्धः अस्ति । -- ?

२. पाण्डवाः **द्वादश वर्षाणि** वनवासं गच्छन्ति । -- ?

३. अर्जुनः **मोहग्रस्तः** भवति । -- ?

४. **दुर्योधनः** स्वभावेन अतीव दुष्टः अस्ति । -- ?

५. शकुनिः **छलेन** युधिष्ठिरं पराजयते । -- ?

६. **दुर्योधनस्य** मातुलः शकुनिः अस्ति । -- ?

७. अर्जुनः **शस्त्रं** परित्यजति । -- ?

८. **धृतराष्ट्रः पाण्डुः** च सहोदरौ स्तः । -- ?

९. **युद्धभूमौ** स्वबान्धवान् दृष्ट्वा अर्जुनः मोहग्रस्तः भवति ।

-- ?

१०. **पाण्डोः** मृत्योः अनन्तरं कौरवाः पाण्डवेभ्यः ईर्ष्यन्ति ।

-- ?

४. कोष्ठके प्रदत्तानां धातूनां लट्लकारस्य रूपाणि प्रयुज्य यथोदाहरणं रिक्तस्थानानि पूरयत -

यथा - सैनिकाः रणाङ्गणं **व्रजन्ति** । (व्रज्)

१. पाण्डवाः वनं -------------------------------- । (गम्)

२. आकाशे अनेकानि नक्षत्राणि -------------------------------- । (अस्)

३. ईश्वरः सर्वत्र ---------------------------- । (भू)

४. भक्ताः गीतायाः पाठं --------------------------- । (कृ)

५. अश्वौ रथं -------------------------------- । (कृष्)

६. वीराः युद्धं -------------------------------- । (कृ)

७. श्रीकृष्णः अर्जुनाय उपदेशं ----------------------------- । (दा)

८. द्रौपदी श्रीकृष्णं ---------------------------- । (भज्)

९. कौरवाः पाण्डवेभ्यः -------------------------------- । (ईर्ष्य्)

१०. धेनवः क्षेत्रे -------------------------------- । (चर्)

'अस्'धातोः लट्लकारस्य रूपाणि सावधानं परिशीलयत -

अस्-धातोः रूपाणि			
	एकवचनम्	**द्विवचनम्**	**बहुवचनम्**
प्रथमपुरुषः	सः अस्ति	तौ स्तः	ते सन्ति
मध्यमपुरुषः	त्वम् असि	युवां स्थः	यूयं स्थ
उत्तमपुरुषः	अहम् अस्मि	आवां स्वः	वयं स्मः

५. 'अस्'धातोः लट्लकारस्य रूपाणि उपयुज्य यथोदाहरणं वाक्यानि पूरयत -

यथा - सः छात्रः अस्ति ।

१. त्वं बालकः -------------------------- ।

२. अहं छात्रः -------------------------- ।

३. वयं देशभक्ताः ---------------------- ।

४. युवां क्रीडकौ ----------------------- ।

५. तौ धावकौ ------------------------- ।

६. आवां गायकौ ---------------------- ।

७. यूयं कर्मकराः ---------------------- ।

८. ते शिक्षकाः ------------------------ ।

संस्कारस्य फलम्

आत्मनेपदिनां धातूनां परिचयः - लट्लकारः

एतां कथाम् उच्चैः पठत अवगच्छत च -

कश्चन नृपः **विद्यते**। चित्रकलायां तस्य अतीव प्रीतिः **वर्तते**। सः कलाकाराणां सम्मानं **कुरुते**। एकदा तत्र कलाकारद्वयम् आगच्छति। उभयोः अपि राजभवने चित्रं लेखितुम् इच्छा **वर्तते**। एकः **भाषते** "महाराज ! अहं कलाकारः अस्मि। महाभारतस्य चित्रं निरूपयितुं **कामये**। तदर्थं दश वर्षाणि अपेक्षितानि सन्ति। अतः अवसरं **प्रार्थये**" इति।

अपरः अपि **ब्रूते** - "अहं सामान्यः कलाकारः अस्मि। किमपि चित्रयितुं मम इच्छा **विद्यते**। चित्रस्य विषयः निश्चितः नास्ति। समाप्तेः अवधिः अपि निश्चितः न **वर्तते**। भवान् अवसरं **कल्पयते** चेत् चित्रं लिखामि" इति। महाराजः उभयोः कृते अपि अनुमतिं **दत्ते**। द्वितीयः पुनः **भाषते** - "चित्रलेखनसमये कोऽपि न पश्येत्। एषः मम नियमः **वर्तते**।" नृपः तदपि **अङ्गीकुरुते**।

सः किञ्चन स्थानं **दत्ते**। तत्र कश्चन प्रकोष्ठः **वर्तते**। प्रकोष्ठे परस्परम् अभिमुखं भित्तिद्वयं **विद्यते**। एकस्यां भित्तौ महाभारतचित्रकारः चित्रं लिखति। अन्यस्यां भित्तौ अन्यः चित्रं लिखति। मध्ये जवनिका **वर्तते**। सः किं **कुरुते** इति कोऽपि न **जानीते**।

एवं दश वर्षाणि अतीतानि। उद्घाटनस्य दिनम् आगच्छति। महाराजस्य अपि चित्रदर्शनार्थम् आगमनं **विद्यते**। प्रथमं सः महाभारतस्य चित्रम् **आलोकते**। अद्भुता कला **वर्तते**। नृपः अतीव **मोदते**। द्वितीयः चित्रकारः अपि राजसमीपम् आगच्छति। **भाषते** च - "महाराज ! मम चित्रं सिद्धं **वर्तते**।"

सः जवनिकाम् **अपाकुरुते**। नृपः चित्रं **निरीक्षते**। अतीव आश्चर्यम् ! द्वितीयः अपि महाभारतस्य एव चित्रं लिखितवान् अस्ति। उभयोः अपि चित्रयोः भेदः एव न **दृश्यते**। किन्तु द्वितीयस्य चित्रम् अधिकं **शोभते**। तत्र जीवकला अधिकतया **द्योतते**। आश्चर्यान्वितः नृपः चित्रकारं पृच्छति - "अत्र किं कारणम्? चित्रलेखनसमये भवान् किं कृतवान्?" इति।

"महाराज ! अहं चित्रम् एव न लिखितवान् ।" इति **भाषते** चित्रकारः ।

"तर्हि किम् एतत् ?" इति आश्चर्येण पृच्छति नृपः ।

"एतत् तु अन्यचित्रकारस्य चित्रस्य प्रतिबिम्बं **वर्तते** । अहं दश वर्षाणि यावत् निरन्तरं भित्तेः संस्कारं कृतवान् । तेन भित्तिः दर्पणः इव जाता **वर्तते** । तत्र चित्रं प्रतिफलितं **विद्यते**, तावद् एव" इति **ब्रूते** चित्रकारः । नृपः अतीव तुष्टः भवति । उभाभ्याम् अपि पारितोषिकं **दत्ते** ।

अस्माकं चित्तम् अपि भित्तिः इव **वर्तते** । यदा निरन्तर-प्रयासेन तत् संस्कारमयं भवति, तदा तत्र श्रेष्ठाः आदर्शाः प्रतिफलिताः भवन्ति । यथा भगवद्गीतायां यदा अर्जुनः श्रीकृष्णं वदति - "मनः तु अत्यन्तं चञ्चलं प्रमथनशीलं च **वर्तते** । अनेन कारणेन अहं योगस्य स्थिरां स्थितिं द्रष्टुं न शक्नोमि । एतस्य नियन्त्रणम् अहं वायोः निग्रहम् इव अत्यन्तं दुष्करं **मन्ये**" तदा श्रीकृष्णः तं **भाषते** -

असंशयं महाबाहो मनो दुर्निग्रहं चलम् ।
अभ्यासेन तु कौन्तेय वैराग्येण च गृह्यते ॥ ६.३५ ॥

असंयतात्मना योगो दुष्प्राप इति मे मतिः ।
वश्यात्मना तु यतता शक्योऽवाप्तुमुपायतः ॥ ६.३६ ॥

अर्थात्, मनः तु निस्संशयं नियन्त्रयितुम् अशक्यं, तत् च अत्यन्तं चञ्चलं **वर्तते** । तथापि हे कौन्तेय ! अभ्यासेन वैराग्येण च तस्य नियन्त्रणं शक्यं भवति । अभ्यासेन वैराग्येण च यः मनः निग्रहीतुं न शक्नोति तस्य योगः दुर्लभः । किन्तु प्रयत्नशीलः नियन्त्रितचित्तः पुरुषः साधनम् अवलम्ब्य तं योगम् अपि प्राप्तुं शक्नोति इति मम मतम् ।

पाठात् वर्णरञ्जितानि पदानि चित्वा लिखत -

विद्यते	----------------	----------------	----------------
----------------	----------------	----------------	----------------
----------------	----------------	----------------	----------------
----------------	----------------	----------------	----------------
----------------	----------------	----------------	----------------

एतानि सर्वाणि आत्मनेपदि-धातूनां लट्लकाररूपाणि सन्ति ।

अवधेयम्

क्रियापदस्य मूलं धातुः । यथा '**लिखति**' इत्यस्य क्रियापदस्य मूलं '**लिख्**' इति धातुः । धातवः त्रिविधाः सन्ति - **परस्मैपदिनः**, **आत्मनेपदिनः उभयपदिनः** च इति । **पठ्, क्रीड्, मिल्, गम्, वद्** इत्यादयः परस्मैपदिनः धातवः सन्ति । **वन्द्, एध्, लभ्, ईक्ष्, लज्ज्** इत्यादयः आत्मनेपदिनः धातवः सन्ति ।

> परस्मैपदिनां धातूनां लट्लकारस्य प्रथमपुरुषैकवचनरूपेषु अन्ते 'ति' इति श्रूयते ।
> यथा - **पठति, लिखति, शोचति** ।
>
> आत्मनेपदिनां धातूनां लट्लकारस्य प्रथमपुरुषैकवचनरूपेषु अन्ते 'ते' इति श्रूयते ।
> यथा - **वीक्षते, लज्जते, कम्पते** ।
>
> उभयपदिनां धातूनां तु लट्लकारस्य प्रथमपुरुषैकवचनरूपेषु अन्ते 'ति, ते' एतदुभयमपि श्रूयते ।
> यथा - **करोति / कुरुते, याचति / याचते, जानाति / जानीते** ।

एतानि वाक्यानि सावधानतया उच्चैः पठत परिशीलयत च -

परस्मैपदिधातवः	**आत्मनेपदिधातवः**
अग्निः **ज्वलति** ।	सूर्यः **प्रकाशते** ।
चोरः **बिभेति** ।	भीतः **पलायते** ।
कृषिकः बीजं **वपति** ।	सस्यं **वर्धते** ।
माता **जागर्ति** ।	बालकः **शेते** ।
धनिकः भोगान् **अनुभवति** ।	निर्धनः कष्टं **सहते** ।

अभ्यासः

१. मञ्जूषातः परस्मैपदिधातूनाम् आत्मनेपदिधातूनां च रूपाणि चित्वा लिखत -

पश्यति, लज्जते, कामयते, तिष्ठति, वर्तते, विद्यते, अस्ति, पलायते, स्मरति, वदति, स्मयते, भाषते, पतति, द्योतते, कर्षति, स्निह्यति, स्नाति, स्पृशति, कम्पते, म्रियते, रटति, नयति, दिशति, जायते, जीवति, ऊहते, गाहते, मोदते, गच्छति, ईक्षते, सूयते, पठति, त्रायते, शेते, राजते, गायति, याति, प्रार्थयते, पिबति, त्वरते, भवति, स्पर्धते, आप्नोति, पाति

परस्मैपदिधातुरूपाणि		**आत्मनेपदिधातुरूपाणि**	
----------------	----------------	----------------	----------------
----------------	----------------	----------------	----------------
----------------	----------------	----------------	----------------
----------------	----------------	----------------	----------------
----------------	----------------	----------------	----------------
----------------	----------------	----------------	----------------
----------------	----------------	----------------	----------------

------------------ ------------------ ------------------ ------------------

------------------ ------------------ ------------------ ------------------

------------------ ------------------ ------------------ ------------------

------------------ ------------------ ------------------ ------------------

केषाञ्चन उभयपदिधातूनां रूपाणि परिशीलयत -

१.	(याच्)	याचति - याचते
२.	(कृ)	करोति - कुरुते
३.	(पच्)	पचति - पचते
४.	(क्षिप्)	क्षिपति - क्षिपते
५.	(चि)	चिनोति -चिनुते
६.	(ब्रू)	ब्रवीति - ब्रूते
७.	(ज्ञा)	जानाति - जानीते
८.	(कथ्)	कथयति - कथयते
९.	(नी)	नयति - नयते
१०.	(प्री)	प्रीणाति - प्रीणीते
११.	(क्री)	क्रीणाति - क्रीणीते
१२.	(भुज्)	भुनक्ति - भुङ्क्ते
१३.	(दा)	ददाति - दत्ते
१४.	(तन्)	तनोति - तनुते
१५.	(वह्)	वहति - वहते
१६.	(ग्रह्)	गृह्णाति - गृह्णीते
१७.	(लू)	लुनाति - लुनीते

आत्मनेपदिधातूनां लट्लकारे रूपाणि एवं भवन्ति -

स्पर्ध्-धातोः रूपाणि			
	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमपुरुषः	स्पर्धते	स्पर्धेते	स्पर्धन्ते
मध्यमपुरुषः	स्पर्धसे	स्पर्धेथे	स्पर्धध्वे
उत्तमपुरुषः	स्पर्धे	स्पर्धावहे	स्पर्धामहे

वन्द्-धातोः रूपाणि			
	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमपुरुषः	वन्दते	वन्देते	वन्दन्ते
मध्यमपुरुषः	वन्दसे	वन्देथे	वन्दध्वे
उत्तमपुरुषः	वन्दे	वन्दावहे	वन्दामहे

अधः वाक्येषु प्रयुक्तानि आत्मनेपदिनः क्रियापदानि सावधानं परिशीलयत -

१. सः अमृतत्वाय **कल्पते**। (२.१५)

२. हस्तात् गाण्डीवं **स्रंसते**। (१.३०)

३. कामात् क्रोधः **अभिजायते**। (२.६२)

४. बुधः तेषु न **रमते**। (५.२२)

५. धर्मस्य स्वल्पमपि महतः भयात् **त्रायते**। (२.४०)

६. त्वयि एतत् न **उपपद्यते**। (२.३)

७. त्वं प्रज्ञावादान् **भाषसे**। (२.११)

८. अपरे दैवम् एव यज्ञं **पर्युपासते**। (४.२५)

९. प्रकृतिः सचराचरं **सूयते**। (९.१०)

१०. सत्त्वात् ज्ञानं **सञ्जायते**। (१४.१७)

११. श्रेष्ठः यत् प्रमाणं कुरुते लोकः तदेव **अनुवर्तते**। (३.२१)

१२. कर्मणां सिद्धिं काङ्क्षन्तः इह देवताः **यजन्ते**। (४.१२)

१३. अयं कदाचित् न जायते न वा **म्रियते**। (२.२०)

१४. ज्ञानाग्निः सर्वकर्माणि भस्मसात् **कुरुते**। (४.३७)

१५. न हि ज्ञानेन सदृशं पवित्रमिह **विद्यते**। (४.३८)

१६. संयतेन्द्रियः तत्परः श्रद्धावान् ज्ञानं **लभते**। (४.३९)

१७. सः श्रद्धया युक्तः तस्याः राधनम् **ईहते**। (७.२२)

१८. यं प्राप्य न निवर्तन्ते तत् परमं धाम मम। (८.२१)

१९. भोगैश्वर्यप्रसक्तानां बुद्धिः समाधौ न **विधीयते**। (२.४४)

२०. सम्भावितस्य च अकीर्तिः मरणात् **अतिरिच्यते**। (२.३४)

२१. सुदुराचारः चेत् अपि मां **भजते** सः साधुः एव। (९.३०)

२२. अहं सर्वस्य प्रभवः मत्तः सर्वं **प्रवर्तते**। (१०.८)

२३. प्रकृतिस्थः प्रकृतिजान् गुणान् **भुङ्क्ते**। (१३.२१)

२४. अश्रद्धधानाः पुरुषाः माम् अप्राप्य मृत्युसंसारवर्त्मनि **निवर्तन्ते**। (९.३)

२. यथोदाहरणं कर्तृपदस्य आधारेण वाक्यानि परिवर्तयत -

यथा - सर्वे विजयं **कामयन्ते**।	अहं विजयं **कामये**।
१. याचकाः धनार्थं स्पर्धन्ते।	तौ ---------------------------------------।
२. बालिका मातरं दृष्ट्वा स्मयते।	छात्राः ------------------------------------।
३. वृद्धौ भारं वोढुं यतेते।	अहं --------------------------------------।
४. सर्वे सुखम् अपेक्षन्ते।	कः --------------------------------------- ?
५. बालिकाः पुष्पासने विराजन्ते।	पितरौ ------------------------------------।
६. मुनिः विषयान् न उपसेवते।	निरीहाः ----------------------------------।
७. शिष्याः गुरुम् अनुवर्तन्ते।	वयं ---------------------------------------।
८. वाणी विचारान् सङ्गच्छते।	आचाराः -----------------------------------।
९. द्रौपदी श्रीकृष्णं भजते।	आवां -------------------------------------।
१०. त्वं मृगयसे।	यूयं ---------------------------------------।
११. शरीरं घर्मेण स्विद्यते।	कर्मकरौ -----------------------------------।

१२. पीडा वर्धते। वृक्षाः -- ।

१३. सेनापतिः युद्धार्थं त्वरते। ते -- ।

१४. मोदकाः गणेशाय रोचन्ते। जपाकुसुमं -- ।

१५. भीष्मः सर्वान् क्षमते। त्वं -- ।

३. अधः वाक्येषु परस्मैपदिधातूनां क्रियापदानि प्रयुक्तानि सन्ति । तेषां क्रियापदानां स्थाने आत्मनेपदिधातूनां समानार्थकानि क्रियापदानि मञ्जूषातः चित्वा यथोदाहरणं लिखत -

भाषन्ते, वन्देते, शये, विद्ये, त्रायते, वर्तामहे, आस्तामहे, मन्येथे, कामयध्वे, मोदन्ते, ईक्षावहे, खिद्यन्ते, द्योतते, लभसे

यथा - १. बालौ मातरं **प्रणमतः**।	**वन्देते**
२. युवकः वृद्धाम् अपघातात् रक्षति।	-------------------
३. युवां किं चिन्तयथः ?	-------------------
४. त्वं विद्यां प्राप्नोषि।	-------------------
५. आवां चलच्चित्रं पश्यावः।	-------------------
६. सर्वे गीतां वदन्ति किम् ?	-------------------
७. पथिकाः शीतलजलपानेन तुष्यन्ति।	-------------------
८. अहं स्वपिमि।	-------------------
९. वयं कटे उपविशामः।	-------------------
१०. तव कीर्तिः सूर्यः इव भाति।	-------------------
११. मूर्खाः शोचन्ति।	-------------------
१२. यूयं मधुरम् इच्छथ।	-------------------
१३. वयं भारतीयाः स्मः।	-------------------
१४. अहं शिक्षिका भवामि।	-------------------

स्वाभ्यासः

एतत्संख्याकेषु गीताश्लोकेषु आत्मनेपदिनां धातूनां प्रयोगं परिशीलयत -

२.३	२.५९	३.३३	५.१५	११.८
२.१८	२.६५	३.३८	७.२२	११.३६
२.३७	३.४	४.१२	९.१०	१२.१
२.५८	३.६	४.२३	१०.७	
२.५४	३.२८	४.२५	९.१५	

संस्कृत-व्याकरणम्

अस्मिन् जगति व्यवह्रियमाणासु भाषासु संस्कृतभाषा एव प्राचीनतमा पूर्णरूपेण परिष्कृता सार्वभौमिकी च अस्ति। अस्याः भाषायाः व्याकरणम् अपि तत्र मुख्यं कारणम् अस्ति। यतः -

शक्तिग्रहं व्याकरणोपमानकोशाप्तवाक्याद् व्यवहारतश्च।
वाक्यस्य शेषाद्विवृतेर्वदन्ति सान्निध्यतः सिद्धपदस्य वृद्धाः॥ शब्दशक्तिप्रकाशिका॥

यस्याः भाषायाः व्याकरणं यावत् अधिकं परिष्कृतं सुव्यवस्थितं सुदृढं च भवति तावत् तया भाषया लोकस्य व्यवहारः विकृतिं विना दीर्घकालपर्यन्तं भवति। वयं यया कयाचित् अपि भाषया लोके व्यवहारं कुर्मः, तस्याः भाषायाः व्याकरणं प्रायेण भवति एव। तत्र नाम - **"व्याक्रियन्ते व्युत्पाद्यन्ते असाधुशब्देभ्यः साधुशब्दाः पृथक् क्रियन्ते अनेन" इति व्याकरणम्।** अर्थात् शब्दसाधुत्वबोधकं व्याकरणम्।

संस्कृत-भाषायाः ऐन्द्र-चान्द्रादीनि अनेकानि व्याकरणानि सन्ति। किन्तु तेषु इदानीं प्रायेण **पाणिनीयव्याकरणम्, हरिनामामृतव्याकरणम्, प्रयोगरत्नमाला मुग्धबोधः च** इति एतानि व्याकरणानि प्राप्यन्ते। संस्कृतस्य व्याकरणं वैदिककालात् आरभ्य अस्ति। अतः 'वैदिक-व्याकरणम्' अपि अस्ति। वैदिक-व्याकरणं **'प्रातिशाख्यम्'** इति उच्यते। मुग्धबोधकर्ता **'बोपदेवः'** स्वस्य कविकल्पद्रुमनामके ग्रन्थे अष्टानां वैयाकरणानां नामानि निर्दिष्टवान्। क्रमशः यथा -

इन्द्रश्चन्द्रः काशकृत्स्नापिशली शाकटायनः।
पाणिन्यमरजैनेन्द्रा जयन्त्यष्टादिशाब्दिकाः॥ 'कविकल्पद्रुमः'॥

यथा - इन्द्रः, चन्द्रः, काशकृत्स्नः, आपिशलिः, शाकटायनः, पाणिनिः, अमरः जैनेन्द्रः च।

सर्वेषु अपि व्याकरणेषु पाणिनीयव्याकरणम् (अष्टाध्यायी) अधुना जगति एकस्वरेण अङ्गीक्रियमाणम् अस्ति। पूर्वाचार्याणां व्याकरणानां सहयोगेन महर्षिः पाणिनिः एताम् अष्टाध्यायीं रचितवान्। एतस्याम् अष्टाध्याय्यां महर्षिः पाणिनिः बहूनां वैय्याकरणानां नामानि निर्दिष्टवान्। तेषु केषाञ्चन वैयाकरणानां नामानि सूत्रेषु सन्ति। यथा -

	वैयाकरणाः	सूत्राणि
१.	आपिशलिः	वा **सुप्यापिशलेः**
२.	चाक्रवर्मणः	**ई३चाक्रवर्मणस्य**
३.	भारद्वाजः	ऋतो **भारद्वाजस्य**
४.	शाकल्यः	लोपः **शाकल्यस्य**
५.	सेनकः	गिरेश्च **सेनकस्य**
६.	स्फोटायनः	अवङ् **स्फोटायनस्य**
७.	काश्यपः	तृषिमृषिकृशेः **काश्यपस्य,** नोदात्तस्वरितोदयमगार्ग्यकाश्यपगालवानाम्
८.	गार्ग्यः	ओतो **गार्ग्यस्य,** अड् **गार्ग्य**गालवयोः, नोदात्तस्वरितोदयमगार्ग्य**काश्यप**गालवानाम्

९. गालवः	तृतीयादिषु भाषितपुंस्कं पुंवद्गालव**स्य**, अङ् गार्ग्यगाल**वयो**:, नोदात्तस्वरितोदयमगार्ग्यकाश्यपगाल**वानाम्**
१०. शाकटायनः	त्रिप्रभृतिषु **शाकटायनस्य**, लङः **शाकटायनस्यैव** व्योर्लघुप्रयत्नतरः **शाकटायनस्य**

एतच्च व्याकरणम्, **शिक्षा, कल्पः, व्याकरणम्, निरुक्तम्, छन्दः ज्योतिषं** च इति एतेषु षट्सु वेदाङ्गेषु अन्यतमम् अस्ति। किञ्च, वेदपुरुषस्य मुखस्थानम् अस्ति इति कारणेन एव वेदाङ्गेषु मुख्यम् अङ्गमस्ति। उक्तञ्च - **'मुखं व्याकरणं स्मृतम्।'**

व्याकरणं किमर्थं पठनीयम्?

शब्दानां लघुना उपायेन ज्ञानम्, उच्चारणे शब्दार्थपरिज्ञाने च सन्देहनिवारणम्, लौकिकशब्दानां रूपसिद्धिः प्रयोगक्षमता च व्याकरणद्वारा भवति। अतः व्याकरणं पठनीयम्। भाषाशुद्धताबोधनाय व्याकरणस्य आवश्यकता अस्ति। यथोक्तम् -

यद्यपि बहु नाधीषे तथापि पठ पुत्र व्याकरणम्।
स्वजनः श्वजनो मा भूत् सकलं शकलं सकृच्छकृत्।। इति।।

वेदानां रक्षार्थं व्याकरणस्य अध्ययनं करणीयम्। एतत् एव व्याकरणस्य मुख्यं प्रयोजनम् अस्ति। व्याकरणशास्त्रं सर्वतोभावेन लाघवस्य अपेक्षां करोति। लाघवं शब्दकृतम् अर्थकृतञ्चेति द्विविधं भवति।

शिक्षा कल्पो व्याकरणं निरुक्तं छन्दसां चयः। ज्योतिषामयनं चैव वेदाङ्गानि षडेव तु।। पाणिनीयशिक्षायान्तु एवं प्रकारेण उच्यते -

छन्दः पादौ तु वेदस्य हस्तौ कल्पोऽथ पठ्यते।
ज्योतिषामयनं चक्षुः निरुक्तं श्रोत्रमुच्यते।। पाणिनीयशिक्षा - ४१।।

शिक्षा घ्राणं तु वेदस्य **मुखं व्याकरणं स्मृतम्।**
तस्मात् साङ्गमधीत्यैव ब्रह्मलोके महीयते।। पाणिनीयशिक्षा - ४२।।

त्वम् उत्तिष्ठ यशो लभस्व

लोट्लकारः **१६**

उच्चैः पठत अवगच्छत च -

देवान्भावयतानेन ते देवा **भावयन्तु** वः ।
परस्परं भावयन्तः श्रेयः परमवाप्स्यथ ॥ (३.११)

तस्मादज्ञानसम्भूतं हृत्स्थं ज्ञानासिनात्मनः ।
छित्त्वैनं संशयं योगमा**तिष्ठोत्तिष्ठ** भारत ॥ (४.४२)

तस्मात्त्वमु**त्तिष्ठ** यशो **लभस्व**
जित्वा शत्रून् **भुङ्क्ष्व** राज्यं समृद्धम् ।
मयैवैते निहताः पूर्वमेव
निमित्तमात्रं **भव** सव्यसाचिन् ॥ (११.३३)

अत्र यानि क्रियापदानि प्रयुक्तानि, तानि लोट्लकाररूपाणि सन्ति ।

परस्मैपदिधातूनां लोट्लकारस्य रूपाणि

उच्चैः पठत जानीत च -

एकवचनम्	**द्विवचनम्**	**बहुवचनम्**
भवान् **आगच्छतु** ।	भवन्तौ **आगच्छताम्** ।	भवन्तः **आगच्छन्तु** ।
भवान् **उपविशतु** ।	भवन्तौ **उपविशताम्** ।	भवन्तः **उपविशन्तु** ।
भवान् **शृणोतु** ।	भवन्तौ **शृणुताम्** ।	भवन्तः **शृण्वन्तु** ।
भवती **अर्चतु** ।	भवत्यौ **अर्चताम्** ।	भवत्यः **अर्चन्तु** ।
भवती **नृत्यतु** ।	भवत्यौ **नृत्यताम्** ।	भवत्यः **नृत्यन्तु** ।
भवती **स्पृशतु** ।	भवत्यौ **स्पृशताम्** ।	भवत्यः **स्पृशन्तु** ।
त्वम् **उत्तिष्ठ** ।	युवाम् **उत्तिष्ठतम्** ।	यूयम् **उत्तिष्ठत** ।
त्वं **पश्य** ।	युवां **पश्यतम्** ।	यूयं **पश्यत** ।
त्वं **स्मर** ।	युवां **स्मरतम्** ।	यूयं **स्मरत** ।

अधः वाक्येषु लोट्लकारस्य प्रयोगान् परिशीलयत -

पाठशालायाः क्रीडाङ्गणे गणतन्त्रदिनस्य कार्यक्रमः प्रवर्तते । तत्र शिक्षकः छात्रान् निर्दिशति । यथा -

- सर्वे अत्र अवधानं **यच्छन्तु** । सर्वे मौनम् **आचरन्तु** ।
- कोलाहलः **मास्तु** । बालिकाः वामभागे **आगच्छन्तु** ।

- बालकाः दक्षिणभागे **गच्छन्तु**। सर्वे सावधानाः **भवन्तु**।
- देवकीमहोदया राष्ट्रध्वजं **पूजयतु**। विवेकः सुशीला च राष्ट्रगीतं **गायताम्**।
- सर्वे राष्ट्रध्वजं **नमन्तु**। नागेशः प्राध्यापकमहोदयाय पुष्पगुच्छं **ददातु**।
- प्राध्यापकमहोदय ! कृपया मञ्चम् आगत्य छात्राणां मार्गदर्शनं **करोतु**।
- उत्तरे ! त्वं गणतन्त्रदिवसस्य महत्त्वं **प्रतिपादय**। विशाल ! विवेक ! युवां शान्तिमन्त्रं **वदतम्**।
- यूयं प्रसादस्थालिकाः स्वीकृत्य द्वारे **तिष्ठत**। सर्वे पङ्क्तिशः द्वारं प्रति **गच्छन्तु**।

अवधेयम्

आज्ञा-प्रार्थनादिषु अर्थेषु लोट्लकारस्य प्रयोगः भवति। यथा -
आज्ञायाम् - सर्वे शृण्वन्तु। **प्रार्थनायाम्** - कृपया भवान् अवधानं ददातु।

'लिख्'धातोः लोट्लकारे रूपाणि एवं भवन्ति -

	एकवचनम्	**द्विवचनम्**	**बहुवचनम्**
प्रथमपुरुषः	लिखतु	लिखताम्	लिखन्तु
मध्यमपुरुषः	लिख	लिखतम्	लिखत
उत्तमपुरुषः	लिखानि	लिखाव	लिखाम

अभ्यासः

१. मञ्जूषायां लट्लकारस्य लोट्लकारस्य रूपाणि यथोदाहरणं पूरयत -

प्रथमपुरुषस्य रूपाणि

यथा - नमति / नमतु	**नमतः / नमताम्**	**नमन्ति / नमन्तु**
१. इच्छति / -------	--------- / ---------	--------- / --------
२. ------- / --------	--------- / ----------	वितरन्ति / --------
३. ------- / --------	चलतः / ------------	---------- / --------
४. -------- / --------	----------- / जयताम्	---------- / --------
५. -------- / भ्रमतु	--------- / ---------	---------- / --------

मध्यमपुरुषस्य रूपाणि		
यथा - मोहयसि / मोहय	मोहयथः / मोहयतम्	मोहयथ / मोहयत
१. --------- / निवेशय	---------- / ----------	---------- / ---------
२. --------- / ---------	---------- / वदतम्	---------- / ---------
३. --------- / ---------	----------- / -----------	उत्तिष्ठथ / ----------
४. नयसि / ----------	---------- / ----------	--------- / ---------
५. --------- / ----------	----------- / ---------	--------- / धावत

उत्तमपुरुषस्य रूपाणि		
यथा - हसामि / हसानि	हसावः / हसाव	हसामः / हसाम
१. जपामि / --------	--------- / ---------	--------- / --------
२. -------- / ---------	--------- / प्रेषयाव	--------- / ---------
३. -------- / ---------	--------- / ---------	सृजामः / ----------
४. --------- / वसानि	--------- / ---------	--------- / ---------
५. --------- / ---------	--------- / ---------	--------- / दण्डयाम

कतिचन विशेषक्रियापदानि -

		एकवचनम्	द्विवचनम्	बहुवचनम्
क्री-धातुः	प्रथमपुरुषः	क्रीणातु	क्रीणीताम्	क्रीणन्तु
	मध्यमपुरुषः	क्रीणीहि	क्रीणीतम्	क्रीणीत
	उत्तमपुरुषः	क्रीणानि	क्रीणाव	क्रीणाम
ग्रह्-धातुः	प्रथमपुरुषः	गृह्णातु	गृह्णीताम्	गृह्णन्तु
	मध्यमपुरुषः	गृहाण	गृह्णीतम्	गृह्णीत
	उत्तमपुरुषः	गृह्णानि	गृह्णाव	गृह्णाम
कृ-धातुः	प्रथमपुरुषः	करोतु	कुरुताम्	कुर्वन्तु
	मध्यमपुरुषः	कुरु	कुरुतम्	कुरुत
	उत्तमपुरुषः	करवाणि	करवाव	करवाम
श्रु-धातुः	प्रथमपुरुषः	शृणोतु	शृणुताम्	शृण्वन्तु
	मध्यमपुरुषः	शृणु	शृणुतम्	शृणुत
	उत्तमपुरुषः	शृणवानि	शृणवाव	शृणवाम

२. मञ्जूषातः उचितानि क्रियापदानि चित्वा रिक्तस्थानानि पूरयत -

लिखाव, आरोहताम्, ज्वालयतु, मारयतु, जानीहि, प्रक्षालयताम्, अपसारयतु, धराव, नमस्कुरुत, अवतरताम्, शृण्वन्तु, कर्तयन्तु, स्थापयताम्, पश्य, कथयतु, क्रीडताम्, वपन्तु, गणय, क्षिपतु, तिष्ठाम

यथा - १. यात्रिकाः वार्तां **शृण्वन्तु** ।

२. भ्राता मशकं ---------------------- ।

३. बाले कन्दुकेन -------------------- ।

४. त्वं फलानि ---------------------- ।

५. आवां चित्रं ---------------------- ।

६. अर्जुन ! त्वं विश्वरूपं ------------- ।

७. स्नुषा अवकरं -------------------- ।

८. भीमार्जुनौ वृक्षं -------------------- ।

९. वयं मन्दिरे ---------------------- ।

१०. भगिनी दीपं -------------------- ।

११. कृपया जवनिकाम् -------------- ।

१२. हरिहरौ साक्षात् ----------------- ।

१३. दम्पती मूर्तिं -------------------- ।

१४. कृषकाः बीजानि --------------- ।

१५. मालिनी प्रहेलिकां --------------- ।

१६. रजकौ वस्त्राणि ----------------- ।

१७. आवां मालाः ------------------ ।

१८. कर्मकराः काष्ठानि --------------- ।

१९. त्वं तत्त्वं ----------------------- ।

२०. यूयं गुरुं ----------------------- ।

आत्मनेपदिधातूनां लोट्लकारस्य रूपाणि

उच्चैः पठत अवगच्छत च -

भवान् **कामयताम्** ।	भवन्तौ **कामयेताम्** ।	भवन्तः **कामयन्ताम्** ।
भवान् **लज्जताम्** ।	भवन्तौ **लज्जेताम्** ।	भवन्तः **लज्जन्ताम्** ।
भवान् **ब्रूताम्** ।	भवन्तौ **ब्रुवाताम्** ।	भवन्तः **ब्रुवताम्** ।
भवती **स्मयताम्** ।	भवत्यौ **स्मयेताम्** ।	भवत्यः **स्मयन्ताम्** ।
भवती **यतताम्** ।	भवत्यौ **यतेताम्** ।	भवत्यः **यतन्ताम्** ।
भवती **लभताम्** ।	भवत्यौ **लभेताम्** ।	भवत्यः **लभन्ताम्** ।
त्वं **भाषस्व** ।	युवां **भाषेथाम्** ।	यूयं **भाषध्वम्** ।
त्वं **क्षमस्व** ।	युवां **क्षमेथाम्** ।	यूयं **क्षमध्वम्** ।
त्वं **वीक्षस्व** ।	युवां **वीक्षेथाम्** ।	यूयं **वीक्षध्वम्** ।
अहं **कामयै** ।	आवां **कामयावहै** ।	वयं **कामयामहै** ।
अहं **लभै** ।	आवां **लभावहै** ।	वयं **लभामहै** ।
अहं **वर्तै** ।	आवां **वर्तावहै** ।	वयं **वर्तामहै** ।

अवधेयम्

आत्मनेपदिनः 'त्वर्'धातोः लोट्लकारे रूपाणि एवं भवन्ति -

	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमपुरुषः	त्वरताम्	त्वरेताम्	त्वरन्ताम्
मध्यमपुरुषः	त्वरस्व	त्वरेथाम्	त्वरध्वम्
उत्तमपुरुषः	त्वरै	त्वरावहै	त्वरामहै

३. मञ्जूषायां दत्तानि रिक्तस्थानानि यथोदाहरणं पूरयत -

प्रथमपुरुषस्य रूपाणि

यथा -	**वर्तते / वर्तताम्**	**वर्तेते / वर्तेताम्**	**वर्तन्ते / वर्तन्ताम्**
१.	---------- / स्विद्यताम्	---------- / ----------	---------- / ----------
२.	---------- / ----------	वीक्षेते / ----------	---------- / ----------
३.	वन्दते / ----------	---------- / ----------	---------- / ----------
४.	---------- / ----------	---------- / ----------	---------- / मोदन्ताम्
५.	---------- / ----------	---------- / सहेताम्	---------- / ----------

मध्यमपुरुषस्य रूपाणि

यथा -	**एधसे / एधस्व**	**एधेथे / एधेथाम्**	**एधध्वे / एधध्वम्**
१.	---------- / ----------	---------- / ----------	---------- / वेपध्वम्
२.	म्रियसे / ----------	---------- / ----------	---------- / ----------
३.	---------- / ----------	---------- / उत्सहेथाम्	---------- / ----------
४.	---------- / ----------	---------- / ----------	मृगयध्वे / ----------
५.	**भुङ्क्षे / भुङ्क्ष्व**	**भुञ्जाथे / भुञ्जाथाम्**	**भुङ्ध्वे / भुङ्ध्वम्**

उत्तमपुरुषस्य रूपाणि

यथा -	**भजे / भजै**	**भजावहे / भजावहै**	**भजामहे / भजामहै**
१.	---------- / पचै	---------- / ----------	---------- / ----------
२.	---------- / ----------	---------- / शयावहै	---------- / ----------
३.	---------- / ----------	---------- / ----------	शिक्षामहे / ----------
४.	यजे / ----------	---------- / ----------	---------- / ----------
५.	---------- / ----------	---------- / ----------	---------- / चेष्टामहै

४. क्रियापदानुसारं उचितानि सर्वनामपदानि रिक्तस्थानेषु पूरयत -

१. ------------- अनुवर्तन्ताम्।
२. ------------- प्रकाशस्व।
३. ------------- भाषामहै।
४. ------------- मन्यै।
५. ------------- क्षमस्व।
६. ------------- मा खिद्यताम्।
७. ------------- चेष्टध्वम्।
८. ------------- उत्सहेताम्।
९. ------------- भाषन्ताम्।
१०. ------------- अश्नुताम्।
११. ------------- अवलोकावहै।
१२. ------------- स्पर्धेथाम्।
१३. ------------- यजस्व।
१४. ------------- निरीक्षामहै।
१५. ------------- ब्रूताम्।
१६. ------------- शयै।
१७. ------------- सहेताम्।
१८. ------------- प्रार्थयन्ताम्।
१९. ------------- असूयेताम्।
२०. ------------- त्रायेथाम्।

उच्चैः पठत लोट्लकारस्य प्रयोगान् परिशीलयत च -

१. पाण्डुपुत्राणां महतीं चमूं **पश्य**। (१.३) (पाण्डवानां विशालसेनां पश्यतु।)
२. अस्माकं ये विशिष्टाः तान् **निबोध**। (१.७) (अस्माकं कौरवसेनायाः ये विशिष्टाः योद्धारः सन्ति, तेषां परिचयः भवतु।)
३. सर्वे भीष्मम् एव **अभिरक्षन्तु**। (१.११) (सर्वे भीष्मस्य एव रक्षणं कुर्वन्तु।)
४. सुखदुःखे, लाभालाभौ, जयाजयौ समे कृत्वा ततः युद्धाय **युज्यस्व**। (२.३८) (सुखं दुःखं च, लाभं हानिं च, जयं पराजयं च समानं मत्वा युद्धाय सज्जः भवतु।)
५. अकर्मणि तव सङ्गः **मास्तु**। (२.४७) (कर्मणः अनाचरणे तव अभिलाषः मा भवतु।)
६. पूर्वैः कृतं पूर्वतरं कर्म एव **कुरु**। (४.१५) (कर्मफलेच्छारहितं पुरुषं कर्माणि न लिम्पन्ति। इत्थं ज्ञात्वा प्राचीनकाले मुमुक्षुभिः पुरुषैः कर्म आचरितम्। अतः भवान् अपि प्राचीनैः यथा कर्म कृतं तथा कर्म आचरतु।)
७. बुद्धौ शरणम् **अन्विच्छ**। (२.४९) (ज्ञानयोगापेक्षया सकामं कर्म अत्यन्तं तुच्छम्। अतः ज्ञानयोगस्य एव आश्रयं स्वीकरोतु।)
८. असक्तः सततं कार्यं कर्म **समाचर**। (३.१९) (अभिलाषरहितः भूत्वा सर्वदा कर्तव्यं कर्म आचरतु।)
९. उग्ररूपः भवान् कः मे **आख्याहि**। (११.३१) (भयङ्करस्वरूपः भवान् कः इति मां कथयतु।)
१०. त्वम् अव्ययम् आत्मानं मे **दर्शय**। (११.४) (यदि अनश्वरं तत् रूपं मया अवलोकितुं शक्यम् इति चिन्तयसि तर्हि त्वं तत् रूपं मां दर्शय।)

स्वाभ्यासः

१. एतत्संख्याकेषु गीताश्लोकेषु लोट्लकारस्य प्रयोगं परिशीलयत -

१.२५	९.५	३.३०	९.३४	११.४६	९.६
८.७	३.८	१२.९	९.३३	१८.६२	१८. ६५
९.२७	२.७	१८.५७	२.३७	१०.१८	११.५
११.६	११.७				

२. अधः द्वितीय-मञ्जूषायां लट्लकारस्य रूपाणि दत्तानि सन्ति । तेषां लोट्लकारस्य रूपाणि उपयुज्य यथोदाहरणं वाक्यानि वदत स्वपञ्जिकायां लिखत च -

प्रथम-मञ्जूषा	द्वितीय-मञ्जूषा
सः, तौ, ते	तरति / अवगाहते
सा, ते, ताः	भाति / द्योतते
तत्, ते, तानि	तुष्यति / मोदते
त्वम्, युवाम्, यूयम्	क्षिपति / क्षिपते
अहम्, आवाम्, वयम्	भजति / भजते
	चिनोति / चिनुते

यथा - सः तरतु । तौ तरताम् । ते तरन्तु ।
सा अवगाहताम् । ते अवगाहेताम् । ताः अवगाहन्ताम् ।

३. अधस्तनानां पदानां साहाय्येन लोट्लकारस्य षष्टिः (६०) वाक्यानि यथोदाहरणं स्वपञ्जिकायां रचयत -



(क्रीणाति)
(गृह्णाति)
(पश्यति)
(नयति)
(स्वीकरोति)

यथा - वयं पुष्पाणि क्रीणाम ।

सङ्ख्या:

उच्चैः पठत जानीत च -

१ एकम्	११ एकादश	२१ एकविंशतिः	३१ एकत्रिंशत्	४१ एकचत्वारिंशत्
२ द्वे	१२ द्वादश	२२ द्वाविंशतिः	३२ द्वात्रिंशत्	४२ द्विचत्वारिंशत्
३ त्रीणि	१३ त्रयोदश	२३ त्रयोविंशतिः	३३ त्रयस्त्रिंशत्	४३ त्रिचत्वारिंशत्
४ चत्वारि	१४ चतुर्दश	२४ चतुर्विंशतिः	३४ चतुस्त्रिंशत्	४४ चतुश्चत्वारिंशत्
५ पञ्च	१५ पञ्चदश	२५ पञ्चविंशतिः	३५ पञ्चत्रिंशत्	४५ पञ्चचत्वारिंशत्
६ षट्	१६ षोडश	२६ षड्विंशतिः	३६ षट्त्रिंशत्	४६ षट्चत्वारिंशत्
७ सप्त	१७ सप्तदश	२७ सप्तविंशतिः	३७ सप्तत्रिंशत्	४७ सप्तचत्वारिंशत्
८ अष्ट	१८ अष्टादश	२८ अष्टाविंशतिः	३८ अष्टात्रिंशत्	४८ अष्टचत्वारिंशत्
९ नव	१९ नवदश	२९ नवविंशतिः	३९ नवत्रिंशत्	४९ नवचत्वारिंशत्
१० दश	२० विंशतिः	३० त्रिंशत्	४० चत्वारिंशत्	५० पञ्चाशत्

५१ एकपञ्चाशत्	६१ एकषष्टिः	७१ एकसप्ततिः	८१ एकाशीतिः	९१ एकनवतिः
५२ द्विपञ्चाशत्	६२ द्विषष्टिः	७२ द्विसप्ततिः	८२ द्व्यशीतिः	९२ द्विनवतिः
५३ त्रिपञ्चाशत्	६३ त्रिषष्टिः	७३ त्रिसप्ततिः	८३ त्र्यशीतिः	९३ त्रिनवतिः
५४ चतुष्पञ्चाशत्	६४ चतुःषष्टिः	७४ चतुस्सप्ततिः	८४ चतुरशीतिः	९४ चतुर्नवतिः
५५ पञ्चपञ्चाशत्	६५ पञ्चषष्टिः	७५ पञ्चसप्ततिः	८५ पञ्चाशीतिः	९५ पञ्चनवतिः
५६ षट्पञ्चाशत्	६६ षट्षष्टिः	७६ षट्सप्ततिः	८६ षडशीतिः	९६ षण्णवतिः
५७ सप्तपञ्चाशत्	६७ सप्तषष्टिः	७७ सप्तसप्ततिः	८७ सप्ताशीतिः	९७ सप्तनवतिः
५८ अष्टपञ्चाशत्	६८ अष्टषष्टिः	७८ अष्टसप्ततिः	८८ अष्टाशीतिः	९८ अष्टनवतिः
५९ नवपञ्चाशत्	६९ नवषष्टिः	७९ नवसप्ततिः	८९ नवाशीतिः	९९ नवनवतिः
६० षष्टिः	७० सप्ततिः	८० अशीतिः	९० नवतिः	१०० शतम्

२०० द्विशतम्	३०० त्रिशतम्	४०० चतुश्शतम्	५०० पञ्चशतम्	६०० षट्शतम्
७०० सप्तशतम्	८०० अष्टशतम्	९०० नवशतम्	१००० सहस्रम्	

अभ्यासः

१. कोष्ठके विद्यमानां सङ्ख्यां दृष्ट्वा 'कति सन्ति' इति लिखत -

यथा - मानवस्य (१) एकं मुखम् अस्ति।

१. (१) .... एव परब्रह्म अस्ति।

२. सूर्यस्य (२) .... अयने स्तः।

३. शिवस्य (३) .... नेत्राणि सन्ति।

४. सेनायाः (४) .... अङ्गानि सन्ति।

५. यज्ञे (५) .... गव्यानि आवश्यकानि।

६. भोजने (६) .... रसाः सन्ति।

७. (७) .... नद्यः प्रसिद्धाः सन्ति।

८. योगस्य (८) .... अङ्गानि सन्ति।

९. (९) .... व्याकरणानि प्रसिद्धानि सन्ति।

१०. व्याकरणे (१०) .... लकाराः सन्ति।

११. एकस्मिन् वर्षे (१२) .... मासाः सन्ति।

१२. (१४) .... विद्याः सन्ति।

१३. एकस्मिन् पक्षे (१५) .... तिथयः भवन्ति।

१४. मानवजीवने (१६) .... संस्काराः करणीयाः।

१५. महाभारते (१८) .... पर्वाणि सन्ति।

१६. मानवस्य (२०) .... अङ्गुल्यः सन्ति।

१७. ऋग्वेदस्य (२१) .... शाखाः सन्ति।

१८. व्याकरणे (२२) .... उपसर्गाः सन्ति।

१९. विकृतिच्छन्दसि (२३) .... अक्षराणि सन्ति।

२०. गायत्रीच्छन्दसि (२४) .... अक्षराणि सन्ति।

२१. साङ्ख्यशास्त्रे (२५) .... तत्त्वानि सन्ति।

२२. काव्यशास्त्रे (२६) .... छन्दांसि सन्ति।

२३. ज्योतिश्शास्त्रे (२७) .... योगाः सन्ति।

२४. शैवागमे (२८) .... आगमाः सन्ति।

२५. श्रुतौ लोके च (२९) .... स्तोत्राणि प्रसिद्धानि सन्ति।

२६. एकस्मिन् दिने (३०) .... मुहूर्ताः भवन्ति।

२७. लोके (३२) .... आयुधानि प्रसिद्धानि सन्ति।

२८. (३३) .... व्यञ्जनाक्षराणि सन्ति।

२९. सङ्गीतरत्नाकरग्रन्थे (३६) .... रागाणां वर्णनम् अस्ति।

३०. सौगन्धिकापरिणयग्रन्थे (५६) .... देशाः वर्णिताः।

३१. (६४) .... कलाः भवन्ति।

३२. (७०) .... शुककथाः प्रसिद्धाः सन्ति।

३३. (८०) .... योगासनानि सन्ति।

३४. मानवस्य आयुः (१००) .... वर्षाणि अस्ति।

३५. (१०००) .... सूर्यकिरणाः सन्ति।

२. गणनां कृत्वा रिक्तस्थानेषु यथोदाहरणं सङ्ख्याः लिखत -

यथा - सूर्यग्रहणं, चन्द्रग्रहणम् इति द्वे ग्रहणे स्तः।

१. सृष्टिः, स्थितिः, लयः' इति .... कार्याणि सन्ति।

२. 'कृतम्, त्रेता, द्वापरः, कलिः' इति .... युगानि सन्ति।

३. 'ब्राह्मः, आर्षः, दैवः, प्राजापत्यः, गान्धर्वः, आसुरः, राक्षसः, पैशाचः' इति .... विवाहाः सन्ति।

४. 'आवाहनम्, आसनं, पाद्यम्, अर्घ्यम्, आचमनं, स्नानं, वस्त्रम्, उपवीतं, गन्धः, पुष्पम्, अक्षताः, धूपः, दीपः, नैवेद्यं, ताम्बूलं, प्रदक्षिणा' इति .... उपचाराः सन्ति।

५. 'भविष्यपुराणं, ब्रह्मवैवर्तपुराणं, मत्स्यपुराणं, भागवतपुराणं, मार्कण्डेयपुराणं, वाराहपुराणं, ब्रह्माण्डपुराणं, विष्णुपुराणम्, अग्निपुराणं, वामनपुराणं, ब्रह्मपुराणं, शिवपुराणं, पद्मपुराणं, लिङ्गपुराणं, स्कन्दपुराणं, कूर्मपुराणं, गरुडपुराणं, नारदपुराणम्' इति .... पुराणानि सन्ति।

६. कौरवाः .... सहोदराः आसन्।

७. 'मत्स्यः, कूर्मः, वराहः, नरसिंहः, वामनः, परशुरामः, श्रीरामः, श्रीकृष्णः, बुद्धः, कल्किः' इति .... अवताराः सन्ति।

८. 'भरद्वाजः, गौतमः, विश्वामित्रः, कश्यपः, अत्रिः, जमदग्निः, वसिष्ठः' इति .... ऋषयः सन्ति।

९. 'युधिष्ठिरः, भीमः, अर्जुनः, नकुलः, सहदेवः' इति .... पाण्डवाः सन्ति।

१०. 'अम्लः, तिक्तः, मधुरं, कषायः, लवणं, कटुः' इति .... रसाः सन्ति।

वारम्

उच्चैः पठत जानीत च -

वटुः प्रतिदिनं **त्रिवारं** सन्ध्यावन्दनं करोति। सन्ध्यावन्दनसमये सः प्रथमं **त्रिवारम्** आचमनं करोति। तदनन्तरम् एकवारं हस्तप्रक्षालनं करोति। **एकवारं** सङ्कल्पं करोति। **त्रिवारं** प्राणायामं करोति। पुनः **त्रिवारम्** आचमनं करोति। तदनन्तरम् **अष्टोत्तरशतवारं** गायत्रीमन्त्रं जपति। **सप्तवारं** सूर्यप्रदक्षिणां करोति। **एकवारम्** अष्टमुद्रां दर्शयति। अन्ते साष्टाङ्गं प्रणमति।

३. सङ्ख्यापदैः सह 'वारम्' इति योजयित्वा यथोदाहरणं रिक्तस्थानानि पूरयत -

यथा - भगवद्गीतायां धृतराष्ट्र उवाच (१) **एकवारं** प्रयुक्तम्।

१. गीतायाः प्रथमाध्याये सञ्जय उवाच (३) ----------- प्रयुक्तम्।

२. गीतायाः प्रथमाध्याये अर्जुन उवाच (२) ---------- प्रयुक्तम्।

३. गीतायाः द्वितीये अध्याये भगवान् उवाच (३) ----------- प्रयुक्तम्।

४. गीतायाम् 'अर्जुन ! इति सम्बोधनपदं (२२) ------------- प्रयुक्तम्।

५. गीतायाः एकादशे अध्याये अर्जुन उवाच (४) ------------ प्रयुक्तम्।

६. गीतायां 'कृष्ण !' इति सम्बोधनपदं (९) ------------- प्रयुक्तम्।

७. गीतायां 'कौन्तेय !' इति सम्बोधनपदं (२४) ----------- प्रयुक्तम्।

८. सैनिकः --------------- महाराजं नमति। (३)

९. महिला वटवृक्षस्य ------------------- प्रदक्षिणां करोति। (११)

१०. भक्तः प्रतिदिनं ----------------- देवं प्रणमति। (५)

११. युवकः ------------------ परीक्षां लिखितवान्। (२)

१२. माता --------------- अन्नं पचति। (२)

• अभ्यासः नाम **वारं वारं** पठनम्। **'वारम्'** इत्यनेन प्रश्नः एवं भवति -
१. भवती एतत् चलच्चित्रं **कति वारं** दृष्टवती ? २. शिक्षकः **कति वारं** पाठं पाठयति।

ज्ञानवर्धिनी

(संवत्सरस्य परिमाणम्)

अष्टादश निमेषास्तु काष्ठा त्रिंशत् ताः कला।
तास्तु त्रिंशत्क्षणः ते तु मुहूर्त्तो द्वादशास्त्रियाम्।। (अमरकोशः १.४.११)
ते तु त्रिंशदहोरात्रः पक्षस्ते दश पञ्च च।
पक्षौ पूर्वापरौ शुक्लकृष्णौ मासस्तु तावुभौ।। (अमरकोशः १.४.१२)
द्वौ द्वौ मार्गादिमासौ स्यादृतुः तैरयनं त्रिभिः।
अयने द्वे गतिरुदग्दक्षिणार्कस्य वत्सरः।। (अमरकोशः १.४.१३)

- अष्टादश निमेषास्तु काष्ठा। **(१८ निमेषाः = १ काष्ठा)**
- त्रिंशत् ताः कला। **(३० काष्ठाः = १ कला)**
- तास्तु त्रिंशत्क्षणः। **(३० कलाः = १ क्षणः)**
- ते तु मुहूर्त्तो द्वादशास्त्रियाम्। **(१२ क्षणाः = १ मुहूर्त्तः)**
- ते तु त्रिंशदहोरात्रः। **(३० मुहूर्त्ताः = १ अहोरात्रः)**
- पक्षस्ते दश पञ्च च। **(१५ अहोरात्राः = १ पक्षः)**
- पक्षौ पूर्वापरौ शुक्लकृष्णौ। मासस्तु तावुभौ। **(२ पक्षौ = १ मासः)**
- द्वौ द्वौ मार्गादिमासौ स्याद् ऋतुः। **(२ मासौ = १ ऋतुः)**
- तैरयनं त्रिभिः। **(३ ऋतवः = १ अयनम्)**
- अयने द्वे गतिरुदग्दक्षिणार्कस्य। वत्सरः। **(२ अयने = १ वत्सरः)**

गीतामाहात्म्यम्

द्वितीयाविभक्तिः **१८**

प्रणवः **भगवद्गीतां** पठति । तस्य माता **तं शुद्धोच्चारणं** पाठयति । **सा गीताश्लोकान्** वदति । प्रणवः तान् अनुवदति । माता श्लोकस्य **अर्थं** कथयति । तदा प्रणवः **प्रश्नं** पृच्छति -"अम्ब ! भगवद्गीतायां कति अध्यायाः सन्ति ?" इति । माता उत्तरं वदति - "अष्टादश अध्यायाः सन्ति ।" "भगवद्गीतातः वयं किं किं प्राप्तुं शक्नुमः ?" इति प्रणवः पुनः **प्रश्नं** करोति । माता पुनरपि वदति - "तत्र वयं **गुरुशिष्यसंवादं** पठितुं शक्नुमः । तेन संभ्रमावस्थायां किं करणीयम् इत्यस्य **विवेचनं** प्राप्नुमः । उत्तमभक्तस्य **लक्षणं** जानीमः । अपि च तत्र क्षत्रियस्य **कर्तव्यं** भगवान् कथितवान् । कर्मयोगस्य चर्चायां कर्मणः **महत्त्वम्** अपि प्रतिपादितवान् । सम्पूर्णां **गीतां** परिशीलयामः चेत् तत्र श्रीकृष्णः जीवनस्य **सारं** प्रतिपादितवान् इति ज्येष्ठाः वदन्ति ।" गीतायाः एतं ध्यानश्लोकं पठत -

ॐ पार्थाय **प्रतिबोधितां** भगवता नारायणेन स्वयं
व्यासेन **ग्रथितां** पुराणमुनिना मध्ये महाभारतम् ।
अद्वैतामृतवर्षिणीं भगवतीम् अष्टादशाध्यायिनीम्
अम्ब **त्वाम्** अनुसन्दधामि भगवद्गीते **भवद्वेषिणीम्** ॥

एतं श्लोकं सावधानतया पठत -

विना **व्यासं** विना **वेदं** विना **रामायणीं कथाम्** ।
विना **कविं कालिदासं** कीदृशी भारतीयता ॥
वसुदेवसुतं देवं कंसचाणूरमर्दनम् ।
देवकीपरमानन्दं कृष्णं वन्दे **जगद्गुरुम्** ॥

अधः तालिकायां प्रदत्तानाम् अजन्तशब्दानां द्वितीयाविभक्तेः रूपाणि सावधानं पठत जानीत च -

		एकवचनम्	द्विवचनम्	बहुवचनम्
पुंलिङ्गः	अकारान्तः	शङ्खम्	शङ्खौ	शङ्खान्
		रथम्	रथौ	रथान्
	इकारान्तः	मुनिम्	मुनी	मुनीन्
		कपिम्	कपी	कपीन्
	उकारान्तः	गुरुम्	गुरू	गुरून्
		भानुम्	भानू	भानून्
	ऋकारान्तः	पितरम्	पितरौ	पितॄन्
		वक्तारम्	वक्तारौ	वक्तॄन्

स्त्रीलिङ्गः	आकारान्तः	गदाम्	गदे	गदाः
		लताम्	लते	लताः
	इकारान्तः	भूमिम्	भूमी	भूमीः
		मतिम्	मती	मतीः
	ईकारान्तः	पृथिवीम्	पृथिव्यौ	पृथिवीः
		सूचीम्	सूच्यौ	सूचीः
	उकारान्तः	धेनुम्	धेनू	धेनूः
		तनुम्	तनू	तनूः
	ऊकारान्तः	वधूम्	वध्वौ	वधूः
		चमूम्	चम्वौ	चमूः
	ऋकारान्तः	मातरम्	मातरौ	मातॄः
		यातरम्	यातरौ	यातॄः
नपुंसकलिङ्गः	अकारान्तः	अनीकम्	अनीके	अनीकानि
	इकारान्तः	अक्षि	अक्षिणी	अक्षीणि
	उकारान्तः	वस्तु	वस्तुनी	वस्तूनि

१. यथोदाहरणं द्वितीयाविभक्तेः रूपाणि रिक्तस्थानेषु पूरयत -

	एकवचनम्	द्विवचनम्	बहुवचनम्
यथा - वीरः	वीरम्	वीरौ	वीरान्
१. सिंहनादः	------------------	------------------	------------------
२. देहः	------------------	------------------	------------------
३. धीरः	------------------	------------------	------------------
४. मकरः	------------------	------------------	------------------
५. महारथः	------------------	------------------	------------------
६. राजर्षिः	राजर्षिम्	राजर्षी	राजर्षीन्
७. अग्निः	------------------	------------------	------------------
८. शस्त्रपाणिः	------------------	------------------	------------------
९. ऋतुः	ऋतुम्	ऋतू	ऋतून्
१०. बन्धुः	------------------	------------------	------------------
११. वायुः	------------------	------------------	------------------

१२. जिज्ञासुः	------------------	------------------	------------------
१३. भ्राता	**भ्रातरम्**	**भ्रातरौ**	**भ्रातॄन्**
१४. पिता	------------------	------------------	------------------
१५. विधाता	**विधातारम्**	**विधातारौ**	**विधातॄन्**
१६. भर्ता	------------------	------------------	------------------
१७. सेना	**सेनाम्**	**सेने**	**सेनाः**
१८. संज्ञा	------------------	------------------	------------------
१९. क्रिया	------------------	------------------	------------------
२०. जरा	------------------	------------------	------------------
२१. स्मृतिः	**स्मृतिम्**	**स्मृती**	**स्मृतीः**
२२. दृष्टिः	------------------	------------------	------------------
२३. प्रवृत्तिः	------------------	------------------	------------------
२४. देवी	**देवीम्**	**देव्यौ**	**देवीः**
२५. आसुरी	------------------	------------------	------------------
२६. मही	------------------	------------------	------------------
२७. नारी	------------------	------------------	------------------
२८. विश्वम्	**विश्वम्**	**विश्वे**	**विश्वानि**
२९. कारणम्	------------------	------------------	------------------
३०. निर्वाणम्	**निर्वाणम्**	**निर्वाणे**	**निर्वाणानि**

२. यथोदाहरणं द्वितीयाविभक्तिं प्रयुज्य वाक्यानि रचयत -



यथा - छात्रः वेदं वदति।

छात्रः वेदौ वदति।

छात्रः वेदान् वदति।



१. ------------------------------ ।

२. ------------------------------ ।

३. ------------------------------ ।





४. ---------------------------------- ।

५. ---------------------------------- ।

६. ---------------------------------- ।

७. ---------------------------------- ।

८. ---------------------------------- ।

९. ---------------------------------- ।

३. कोष्ठके प्रदत्तानि क्रियापदानि उपयुज्य यथोदाहरणं वाक्यानि रचयत -

त्वम् (जन्तुशाला)	पश्यसि	पश्यामि	(पुष्पमाले) अहम्
युवाम् (उद्याने)	पश्यथः	पश्यावः	(प्राङ्गणम्) आवाम्
यूयम् (दुर्गाणि)	पश्यथ	पश्यामः	(वृक्षाः) वयम्

यथा - त्वं जन्तुशालां पश्यसि ।

१. -------------------------------------- ।

२. -------------------------------------- ।

३. -------------------------------------- ।

४. -------------------------------------- ।

५. -------------------------------------- ।

४. मञ्जूषायां विद्यमानानां पदानां द्वितीयाविभक्तेः रूपाणि क्रमशः उपयुज्य वाक्यानि पूरयत -

पद्मपत्रम्, यतयः, मोक्षः, अहिंसा, शाखे, दानम्, प्रजाः, मरीचिः, नक्षत्राणि, बीजम्, कविः

यथा - युवती पद्मपत्रं पश्यति ।

१. जनाः ------------------ सेवन्ते ।

२. ज्ञानिनः ------------------ इच्छन्ति ।

३. कार्यकर्ता ------------------ समर्थयति ।

४. युवकौ ------------------ दोलयतः ।

५. कर्णः प्रतिदिनं ------------------ ददाति ।

६. राजा ------------------ परिपालयति ।

७. जनाः ------------------ नमस्कुर्वन्ति ।

८. बालाः ------------------ गणयन्ति ।

९. कृषकः ------------------ वपति ।

१०. अतिथिः ------------------ सत्करोति ।

अवधेयम्

सर्वनामशब्दानां प्रथमा-द्वितीयाविभक्त्योः रूपाणि पश्यत -

प्रथमाविभक्तिः				द्वितीयाविभक्तिः		
एकवचनम्	द्विवचनम्	बहुवचनम्		एकवचनम्	द्विवचनम्	बहुवचनम्
सः	**तौ**	**ते**		**तम्**	**तौ**	**तान्**
सा	ते	ताः		ताम्	ते	ताः
तत्	ते	तानि		तत्	ते	तानि
एषः	एतौ	एते		एतम्	एतौ	एतान्
एषा	एते	एताः		एताम्	एते	एताः
एतद्	एते	एतानि		एतद्	एते	एतानि
अहम्	आवाम्	वयम्		माम्	आवाम्	अस्मान्
त्वम्	युवाम्	यूयम्		त्वाम्	युवाम्	युष्मान्
भवान्	भवन्तौ	भवन्तः		भवन्तम्	भवन्तौ	भवतः
भवती	भवत्यौ	भवत्यः		भवतीम्	भवत्यौ	भवतीः
कः	कौ	के		कम्	कौ	कान्
का	के	काः		काम्	के	काः
किम्	के	कानि		किम्	के	कानि
सर्वः	सर्वौ	सर्वे		सर्वम्	सर्वौ	सर्वान्
सर्वा	सर्वे	सर्वाः		सर्वाम्	सर्वे	सर्वाः
सर्वम्	सर्वे	सर्वाणि		सर्वम्	सर्वे	सर्वाणि

एतानि वाक्यानि उच्चैः पठत -

१. पिता **तम्** आदिशति ।

२. आचार्यः **मां** बोधयति ।

३. मकरः **तत्** भक्षयति ।

४. सहदेवः **कं** धमति ?

५. मातुलः **तौ** सूचयति ।

६. सः **भवत्यौ** उपकरोति ।

७. कर्णः **तान्** भिनत्ति ।

८. कृष्णः **सर्वान्** रक्षति ।

९. पाण्डवाः **मां** जानन्ति ।

१०. झषः **आवां** पश्यति ।

११. भवन्तः **एतान्** नयन्तु ।

१२. भवती **किम्** अन्विष्यति ?

५. यथोदाहरणं तालिकायां द्वितीयाविभक्तेः रूपाणि लिखत -

प्रथमाविभक्तिः	द्वितीयाविभक्तिः	प्रथमाविभक्तिः	द्वितीयाविभक्तिः
यथा - सः	तम्	६. वयम्	
१. एषः		७. भवती	
२. कः		८. त्वम्	
३. अहम्		९. एतौ	
४. एतानि		१०. भवन्तः	
५. सर्वः		११. कानि	

६. कोष्ठकानुसारं भगवद्गीतायाः श्लोकान् पठित्वा अधो लिखितानि वाक्यानि पूरयत -

१. उवाच पार्थ पश्यैतान् समवेतान् ---------------------------- इति । (१.२५)
२. --------------------------- च पश्यामि विपरीतानि केशव । (१.३१)
३. पौण्ड्रं दध्मौ ------------------------------ भीमकर्मा वृकोदरः । (१.१५)
४. तत् किं कर्मणि घोरे --------------------------- नियोजयसि केशव । (३.१)
५. कथं स पुरुषः पार्थ ------------------- घातयति हन्ति ------------------- ? (२.२१)
६. यामिमां -- वाचं प्रवदन्त्यविपश्चितः । (२.४२)
७. न च संन्यसनादेव --------------------------- समधिगच्छति । (३.४)
८. सङ्करस्य च कर्ता स्यामुपहन्यामिमाः ---------------------------- । (३.२४)
९. काङ्क्षन्तः कर्मणां ----------------------------- यजन्त इह देवताः । (४.१२)
१०. ----------------------------- कर्मणां कृष्ण पुनर्योगं च शंससि । (५.१)
११. स योगी ----------------------------- ब्रह्मभूतोऽधिगच्छति । (५.२४)
१२. सुहृदं सर्वभूतानां ज्ञात्वा ----------------------------- शान्तिमृच्छति । (५.२९)
१३. एतन्मे ------------------------------- कृष्ण छेत्तुमर्हस्यशेषतः । (६.३९)
१४. माययापहृतज्ञानाः -------------------------------- भावमाश्रिताः । (७.१५)
१५. तेषां नित्याभियुक्तानां ------------------------------------ वहाम्यहम् । (९.२२)
१६. -- यो मे भक्त्या प्रयच्छति । (९.२६)
१७. -- च मम यो वेत्ति तत्त्वतः । (१०.७)
१८. ------------------- शृणु मे तत्र त्यागे भरतसत्तम । (१८.४)

७. यथोदाहरणं रक्तवर्णरञ्जित-पदानाम् आधारेण प्रश्ननिर्माणं कुरुत -

यथा -	अर्जुनः कृष्णस्य देहे **देवान्** पश्यति।	अर्जुनः कृष्णस्य देहे **कान्** पश्यति ?
१.	सततयुक्ताः भक्ताः **ईश्वरम्** उपासते।	-- ?
२.	श्रोतारः **धर्म्यामृतं** सेवन्ते।	-- ?
३.	**प्रकृतिं पुरुषं** चैव अनादी विद्धि।	-- ?
४.	ते **प्राणान्** त्यक्त्वा युद्धे स्थिताः।	-- ?
५.	अर्जुनः **अशोच्यान्** अन्वशोचति।	-- ?
६.	बुद्धियुक्तः **सुकृतदुष्कृते** जहाति।	-- ?
७.	श्रीकृष्णः **योगं** विवस्वते कथितवान्।	-- ?
८.	पण्डिताः **ज्ञानम्** उपदिशन्ति।	-- ?

उभयतः, परितः, विना इत्यादीनां योगे द्वितीयाविभक्तिः

श्रीकृष्णम् **उभयतः** महाभारतप्रसङ्गाः चित्रिताः सन्ति।

कृष्णं **परितः** पशु-पक्षिणः सन्ति।

मयूरपिच्छं **विना** कृष्णः न शोभते।

एतानि वाक्यानि पठत -

१. शिक्षकम् **उभयतः** छात्राः सन्ति।
२. भक्तं **विना** देवं कः पूजयेत्?
३. कमलं **परितः** द्विरेफाः गुञ्जन्ति।
४. नदीम् **उभयतः** वृक्षाः सन्ति।
५. मातरं **विना** पुत्रः न रमते।
६. रेलस्थानकं **परितः** जनाः चलन्ति।
७. द्वारम् **उभयतः** कपाटिकाः सन्ति।
८. संस्कृतं **विना** संस्कृतिः नास्ति।
९. लड्डुकं **परितः** मक्षिकाः भ्रमन्ति।
१०. गुरुं **विना** शिष्यः ज्ञानं न प्राप्नोति।

८. यथोदाहरणं कोष्ठकसाहाय्येन वर्णानुगुणं वाक्यानि रचयत -

रेलयानम्, राजद्वारम्, आपणः	**उभयतः**	जनाः, द्वारपालौ, ग्राहकाः
देवः, तडागः, संगणकम्	**परितः**	भक्ताः,विहगाः, लेखनसामग्र्यः
प्राणवायुः, शब्दः, मूर्तिः	**विना**	जीवनम्, वाक्यम्, सगुणभक्तिः

यथा - रेलयानम् **उभयतः** जनाः सन्ति।

१. -- ।
२. -- ।
३. -- ।
४. -- ।
५. -- ।
६. -- ।
७. -- ।
८. -- ।

९. उपपद-विभक्तिं प्रयुज्य यथोदाहरणं वाक्यानि पूरयत -

यथा - वृक्षं **परितः** तृणानि सन्ति। (वृक्षः)

१. ---------------- विना अन्धकारस्य नाशः न भवति। (सूर्यः)
२. ---------------- परितः गीतापुस्तकानि सन्ति। (लेखकः)
३. ---------------- उभयतः भोजनपङ्क्तयः भवन्ति। (पाचिका)
४. ---------------- उभयतः अङ्गरक्षकौ भवतः। (महाराजः)
५. ---------------- विना गृहं न शोभते। (गृहिणी)
६. ---------------- विना पाचनं कठिनं भवति। (अग्निः)

७. ---------------- उभयतः सेने स्तः । (कृष्णार्जुनौ)

८. ---------------- परितः एव जनानां जीवनं केन्द्रितम् अस्ति । (वित्तम्)

९. ---------------- विना को वा पुत्रान् परिपालयति ? (पितरौ)

१०. कोष्ठके विद्यमानानां शब्दानां द्वितीयाविभक्तिम् अपि च अर्थानुगुणम् उभयतः/परितः इत्यनयोः उचितं पदं योजयित्वा यथोदाहरणं वाक्यानि पूरयत -

यथा - **पृथिवीं** (पृथिवी) **परितः** जलं वर्तते ।

१. ----------------------- (द्वारम्) ---------------------- रङ्गवल्ली अस्ति ।

२. ----------------------- (शनिग्रहः) ----------------------- वलयं भवति ।

३. ------------------------- (पुष्पवल्लर्यः) --------------------- सुगन्धः आगच्छति ।

४. ------------------------- (केदारः) ----------------------- मार्गौ स्तः ।

५. ------------------------ (इच्छा) -------------------- सर्वे व्यवहाराः एकत्रिताः भवन्ति ।

६. -------------------------- (शय्याः) ------------------- उत्पीठिका आसन्दः च स्तः ।

७. -------------------------- (अट्टालिका) --------------------- सोपानमार्गौ स्तः ।

११. उभयतः/परितः/विना इत्येतेषु उचितं पदं चित्वा यथोदाहरणं वाक्यनिर्माणं कुरुत -

यथा -	ज्ञानम् - मोक्षः	**ज्ञानं विना** मोक्षः नास्ति ।
१.	सङ्गणकम् - अध्ययनसामग्री	-- भवति ।
२.	गायिके - वादकाः	------------------------------------ उपविशन्ति ।
३.	वृष्टिः - उष्णता	--- वर्धते ।
४.	गुरुः - शिष्यौ	-- स्तः ।
५.	धेनवः - गोपालौ	-- स्तः ।
६.	मुनिः - वृक्षाः	--- सन्ति ।
७.	मापिका - अङ्काः	--- सन्ति ।
८.	रविः - ग्रहमण्डलम्	--- वर्तते ।
९.	ध्येयम् - जीवनम्	--------------------------------- निस्सारं भवति ।

धातूनां प्रकाराः

अधः प्रदत्तयोः श्लोकयोः प्रयुक्तानि क्रियापदानि सावधानं पठत अवगच्छत च -

(१) य एनं **वेत्ति** हन्तारं यश्चैनं **मन्यते** ध्रुवम्।
उभौ तौ न **विजानीतो** नायं **हन्ति** न **हन्यते**॥ (२.१९)

(२) ये यथा मां **प्रपद्यन्ते** तांस्तथैव **भजाम्यहम्**।
मम **वर्त्मानुवर्तन्ते** मनुष्याः पार्थ सर्वशः॥ (४.११)

उच्चैः पठत अवगच्छत च -

शिक्षकः प्रियच्छात्राः ! संस्कृतभाषाविषये प्रश्नाः सन्ति चेत् भवन्तः पृच्छन्तु। अहम् उत्तरं ददामि।

छात्रः आचार्य ! संस्कृतभाषायां क्रियापदानां निर्माणं कथं भवति ?

शिक्षकः संस्कृतभाषायां क्रियापदानां निर्माणं धातुभ्यः भवति।

छात्रः आचार्य ! धातवः कति सन्ति ?

शिक्षकः प्रायः द्विसहस्रं धातवः सन्ति।

छात्रः एतेषां धातूनां प्रकाराः अपि सन्ति किम् ?

शिक्षकः आम् । परस्मैपदिनः, आत्मनेपदिनः उभयपदिनः चेति धातवः त्रिप्रकारकाः भवन्ति । परस्मैपदिधातूनां लट्लकारे प्रथमपुरुषे एकवचने पठति, लिखति, भवति, तिष्ठति इति एतादृशानि रूपाणि भवन्ति । (अन्ते 'ति' इति दृश्यते ।) आत्मनेपदिधातूनां लट्लकारे प्रथमपुरुषे एकवचने वर्तते, कम्पते, लज्जते इति एतादृशानि रूपाणि भवन्ति। (अन्ते 'ते' इति दृश्यते ।) उभयपदिधातूनां लट्लकारे प्रथमपुरुषे एकवचने याचति / याचते, करोति / कुरुते इति एतादृशानि द्विविधानि रूपाणि भवन्ति। (अन्ते 'ति' इति 'ते' इत्यपि च दृश्यते ।) एवमेव धातवः सकर्मकाः अकर्मकाः द्विकर्मकाः इति भेदेन पुनः त्रिप्रकारकाः भवन्ति।

छात्रः के धातवः सकर्मकाः ? के अकर्मकाः ? के च द्विकर्मकाः ?

शिक्षकः अत्र सरलः उपायः अस्ति। क्रियापदम् उद्दिश्य 'कम् / काम् / किम्' इति (द्वितीयान्तेन) यदा प्रश्नं कुर्मः, तदा तस्य उत्तरं यद् भवति तदेव कर्म। तादृशस्य कर्मणः सम्भावना अस्ति चेत् धातुः सकर्मकः, नास्ति चेत् धातुः अकर्मकः इति जानन्तु।

यथा - बालः पठति। इत्यत्र क्रियापदम् उद्दिश्य 'कम् / काम् / किं पठति ?' इति प्रश्नं

यदि पृच्छामः तर्हि 'श्लोकम् / गीताम् / पद्यम्' इति वा किमपि उत्तरं प्राप्नुमः। अतः 'पठ्' इति धातुः सकर्मकः। तथैव 'वृक्षः कम्पते' इत्यत्र क्रियापदम् उद्दिश्य 'कम् / काम् / किं कम्पते ?' इति प्रश्नं यदि पृच्छामः तर्हि उत्तरं न प्राप्नुमः। अतः कम्प्-धातुः अकर्मकः भवति। उपरि प्रतिपादिताः ये सकर्मकाः अकर्मकाश्च धातवः तेषु एव केचन धातवः द्विकर्मकाः (द्वे कर्मणी येषां ते) परिगणिताः सन्ति।

छात्राः धन्यवादः आचार्य ! अद्य वयं क्रियापदानां विषये ज्ञानं प्राप्तवन्तः।

➢ **लज्जा, सत्ता, स्थितिः, जागरणम्, वृद्धिः, क्षयः, भयम्, जीवितम्, मरणम्, शयनम्, रुचिः, दीप्तिः, क्रीडा** इत्यर्थकाः ये धातवः सन्ति, ते **अकर्मकाः** भवन्ति।

➢ यत्र **'कम् / काम् / किम्'** इति प्रश्नस्य उत्तरम् प्राप्यते तत्र धातुः **सकर्मकः** भवति।

➢ एते षोडश धातवः **द्विकर्मकाः** भवन्ति -

दुह् (दोग्धि)	**रुध्** (रुणद्धि)	**शास्** (शास्ति)	**नी** (नयति)
याच् (याचति)	**प्रच्छ्** (पृच्छति)	**जि** (जयति)	**हृ** (हरति)
पच् (पचति)	**चि** (चिनोति)	**मन्थ्** (मथ्नाति)	**कृष्** (कर्षति)
दण्ड् (दण्डयति)	**ब्रू** (ब्रवीति)	**मुष्** (मुष्णाति)	**वह्** (वहति)

➢ एतेषां समानार्थकाः अन्येऽपि केचन धातवः द्विकर्मकाः भवन्ति।

भगवद्गीतातः चितानां केषाञ्चन सकर्मकाणाम् अकर्मकाणां च क्रियापदानां तालिकां परिशीलयत -

सकर्मकम्	अकर्मकम्		सकर्मकम्	अकर्मकम्
प्रशंसति	स्निह्यति		निरीक्षते	तिष्ठति
अभिहन्ति	उपास्ते		ददाति	वर्धते
प्रधमति	युद्ध्यते		पचति	वर्तते
व्यदारयति	जागर्ति		घातयति	अस्ति
आश्रयति	खिद्यते		नियोजयति	भवति
आरभते	क्लेदयति		स्मरति	बिभेति
चिन्तयति	विद्यते		वदति	म्रियते
शृणोति	भ्रमति		लिखति	शेते
चिनोति	शोचति		रक्षति	स्वपिति
क्षिपति	रोदिति		अभिनन्दति	रोचते
इच्छति	लज्जते		पश्यति	द्योतते
तरति	प्रकाशते			

अभ्यासः

१. अधो निर्दिष्टेषु कर्तृपदसहितेषु वाक्येषु क्रियापदम् उद्दिश्य 'कम् / काम् / किम्' इति प्रश्नं कुरुत, सकर्मकत्वम् अकर्मकत्वं च निर्णयत -

वाक्यम्	'कम्/काम्/किम्' (प्रश्नः)	अस्ति/नास्ति (उत्तरम्)	सकर्मकः/ अकर्मकः
यथा- धृतराष्ट्रः पृच्छति।	धृतराष्ट्रः कं पृच्छति ?	उत्तरम् अस्ति।	सकर्मकः
१. सञ्जयः वदति।			
२. भक्तः भजति।			
३. अर्जुनः शोचति।			
४. मुनिः जागर्ति।			
५. ईश्वरः सृजति।			
६. योजकः नियोजयति।			
७. धनञ्जयः प्रधमति।			
८. वीरः युध्यते।			
९. गुरुः प्रशंसति।			

२. अधः प्रदत्तेषु वाक्येषु क्रियापदानां सकर्मकत्वम् अकर्मकत्वं वा यथोदाहरणं निर्दिशत -

यथा - बालकः भाषते। (सकर्मकः)

१. महिला कथयति। (-----------------)
२. शिष्यः उपविशति। (-----------------)
३. शूरः त्रायते। (-----------------)
४. चित्रकारः लिम्पति। (-----------------)
५. दुर्जनः जीवति। (-----------------)
६. वृक्षः वर्धते। (-----------------)
७. शिक्षकः अभिनन्दति। (-----------------)
८. पुरुषः शेते। (-----------------)
९. आसन्दः विद्यते। (-----------------)
१०. दाता प्रयच्छति। (-----------------)
११. तरुः परिशुष्यति। (-----------------)
१२. जनः अश्नाति। (-----------------)

१३. योगः भवति। (-----------------) १५. शत्रुः द्वेष्टि। (-----------------)

१४. सैनिकः सज्जते। (-----------------)

३. मञ्जूषातः सकर्मकक्रियापदानि चित्वा लिखत -

जुहोति, अस्ति, आदत्ते, रमते, प्रलीयते, उपैति, पर्यवतिष्ठते, गायति, मिलति, लिखति, पिबति, पश्यति, भवति, खादति, आवृणोति, आस्ते, पठति, चिनोति, आश्रयति, हन्ति

४. सकर्मकधातूनां पुरतः ✓अकर्मकधातूनां पुरतः च ✗ इति चिह्नं स्थापयत -

यथा - विकसति (✗) संयाति (✓)

१.	परिदहति	( )	६.	रोदिति	( )	११.	आचरति	( )	१६.	शृणोति	( )
२.	पुष्णाति	( )	७.	भ्रमति	( )	१२.	तरति	( )	१७.	स्मरति	( )
३.	काङ्क्षति	( )	८.	चलति	( )	१३.	पचति	( )	१८.	शंसति	( )
४.	ईहते	( )	९.	पतति	( )	१४.	तुष्यति	( )	१९.	हरति	( )
५.	हृष्यति	( )	१०.	गणयति	( )	१५.	प्रदुष्यन्ति	( )	२०.	उत्क्रामति	( )

श्रीकृष्णः पाञ्चजन्यस्य ध्मानं करोति

क्रियापदानां विभज्य प्रयोगः

२०

एतानि वाक्यानि सावधानतया पठत अवगच्छत च -

श्रीकृष्णः **पाञ्चजन्यं धमति ।**

श्रीकृष्णः **पाञ्चजन्यस्य ध्मानं करोति ।**

अर्जुनः **गीतोपदेशं शृणोति ।**

अर्जुनः **गीतोपदेशस्य श्रवणं करोति ।**

श्रीकृष्णः उभयोः सेनयोः मध्ये **रथं स्थापयति ।**

श्रीकृष्णः उभयोः सेनयोः मध्ये **रथस्य स्थापनं करोति ।**

अर्जुनः **युध्यते ।**

अर्जुनः **युद्धं करोति ।**

गान्धारी **रोदिति ।**

गान्धारी **रोदनं करोति ।**

युधिष्ठिरः **क्रीडति ।**

युधिष्ठिरः **क्रीडां करोति ।**

> उपरितनेषु उदाहरणेषु प्रथमवाक्ये सर्वत्र क्रियापदस्य सामान्यः प्रयोगः कृतः अस्ति। द्वितीयवाक्ये तस्य एव क्रियापदस्य विभज्य प्रयोगः कृतः अस्ति।

एवमेव -

मीरा	(योगेश्वरम्)	**स्मरति**	=	**स्मरणं करोति।**	(योगेश्वरस्य)
शिष्यः	(गुरूपदेशम्)	**शृणोति**	=	**श्रवणं करोति।**	(गुरूपदेशस्य)
छात्रः	(वेदान्तम्)	**अधीते**	=	**अध्ययनं करोति।**	(वेदान्तस्य)
पण्डितः	(तत्त्वानि)	**चर्चयति**	=	**चर्चां करोति।**	(तत्त्वानाम्)
कर्णः	(कवचम्)	**यच्छति**	=	**दानं करोति।**	(कवचस्य)
बृहन्नला		**नृत्यति**	=	**नर्तनं करोति।**	
कमलपुष्पं		**शोभते**	=	**शोभां करोति।**	
खगाः		**डीयन्ते**	=	**डयनं कुर्वन्ति।**	

इत्येवं क्रियापदानां विभज्य प्रयोगः भवति।

> ➢ सकर्मकधातोः सामान्यप्रयोगे कर्मपदस्य द्वितीयाविभक्तिः भवति इति वयं जानीमः एव। यथा - भक्ता **देवं** स्तौति।
> किन्तु तस्य एव धातोः विभज्य प्रयोगे कर्मपदस्य षष्ठीविभक्तिः भवति।
> यथा - भक्ता **देवस्य** स्तवनं करोति।
>
> ➢ अकर्मकधातोः सामान्यप्रयोगे कर्मपदं न भवति एव।
> यथा - नर्तकी **नृत्यति**।
> किन्तु तस्य एव धातोः विभज्य प्रयोगे कर्मपदं भवति, तस्य च द्वितीयाविभक्तिः एव भवति। यथा - नर्तकी **नर्तनं करोति**।

श्रीकृष्णः	**गीताम्**	**उपदिशति**
कर्तृपदम् (प्रथमाविभक्तिः) ↕ कर्तृपदम् (प्रथमाविभक्तिः)	कर्मपदम् (द्वितीयाविभक्तिः) ↕ कर्मपदम् (षष्ठीविभक्तिः)	क्रियापदम् ↕ क्रियापदस्य विभजनम्
श्रीकृष्णः	**गीतायाः**	**उपदेशं करोति।**

उत्तरः पलायते

कर्तृपदम् (प्रथमाविभक्तिः) ↕ कर्तृपदम् (प्रथमाविभक्तिः)	कर्मपदं नास्ति ↕ कर्मपदम् (द्वितीयाविभक्तिः)	क्रियापदम् ↕ क्रियापदस्य विभजनम्

उत्तरः पलायनं करोति।

केषाञ्चन व्यवहारोपयोगिनां क्रियापदानां विभज्य प्रयोगरूपाणि अत्र सन्ति । तानि पठत अवगच्छत च -

सकर्मकक्रियापदानां विभज्य प्रयोगरूपाणि	
भर्जते = भर्जनं करोति	पूजयति = पूजां करोति
लिखति = लेखनं करोति	प्रार्थयते = प्रार्थनां करोति
उपास्ते = उपासनां करोति	अर्चयति = अर्चनां करोति
स्तौति = स्तवनं करोति	प्रशंसति = प्रशंसां करोति
अध्येति = अध्ययनं करोति	आश्रयति = आश्रयं स्वीकरोति
स्पृशति = स्पर्शं करोति	रक्षति = रक्षणं करोति
प्रविशति = प्रवेशं करोति	लिम्पति = लेपनं करोति
वितरति = वितरणं करोति	भजति = भजनं करोति
संकल्पयति = संकल्पं करोति	हन्ति = हननं करोति
परिवेषयति = परिवेषणं करोति	द्वेष्टि = द्वेषं करोति
चर्चयति = चर्चां करोति	जुहोति = हवनं करोति
प्रक्षालयति = प्रक्षालनं करोति	भाषते = भाषणं करोति
अन्विष्यति = अन्वेषणं करोति	अभिरक्षति = अभिरक्षणं करोति
क्रीणाति = क्रयणं करोति	प्रधम = प्रध्मानं करोति
आचरति = आचरणं करोति	विदारयति = विदारणं करोति
पचति = पाकं करोति	सृजति = सर्जनं करोति
चिकित्सते = चिकित्सां करोति	नियोजयति = नियोजनं करोति

अभिनन्दति = अभिनन्दनं करोति	चिन्तयति = चिन्तनं करोति
दशति = दंशनं करोति	कथयति = कथनं करोति
ददाति = दानं करोति	यजति = यजनं करोति

अकर्मकक्रियापदानां विभज्य प्रयोगरूपाणि	
शोचति = शोकं करोति	क्रुध्यति = क्रोधं करोति
शेते = शयनं करोति	क्रीडति = क्रीडनं करोति
स्नाति = स्नानं करोति	मुह्यति = मोहं प्राप्नोति
रोदिति = रोदनं करोति	युध्यते = युद्धं करोति
हसति = हसनं करोति	कुप्यति = कोपं करोति
नृत्यति = नर्तनं करोति	नटति = नटनं करोति
खिद्यते = खेदं करोति	लज्जते = लज्जां करोति
धावति = धावनं करोति	प्रणश्यति = प्रणष्टः भवति
स्निह्यति = स्नेहं करोति	म्रियते = मरणं प्राप्नोति
डयते = डयनं करोति	सिद्ध्यति = सिद्धं भवति
वर्धते = वर्धनं करोति	नश्यति = नाशः भवति
खेलति = खेलनं करोति	

अभ्यासः

१. यथोदाहरणं क्रियापदानि विभज्य लिखत -

यथा - पिबति = पानं करोति ।

१. धावति = -------------------------- ।
२. रक्षति = -------------------------- ।
३. ज्वलति = -------------------------- ।
४. धमति = -------------------------- ।
५. त्यजति = -------------------------- ।
६. दशति = -------------------------- ।
७. चिकित्सते = -------------------------- ।
८. पचति = -------------------------- ।
९. वहति = -------------------------- ।
१०. विनश्यति = -------------------------- ।

२. यथोदाहरणं क्रियापदानि रचयत -

यथा - शासनं करोति = शास्ति

१. हवनं करोति = ------------------------
२. युद्धं कुर्वन्ति = ------------------------
३. क्लिन्नं करोति = ------------------------
४. भ्रमणं करोमि = ------------------------

५. द्वेषं करोति	= ------------------------	८. कर्षणं करोषि	= ------------------------
६. उद्धारं कुर्वः	= ------------------------	९. पोषणं कुर्वन्ति	= ------------------------
७. प्रवेशं कुरुथ	= ------------------------	१०. आलोकनं करोति	= ------------------------

३. मञ्जूषातः सुयोग्यानि पदानि चित्वा रिक्तस्थानानि पूरयत -

दहनम्, लौकिकवस्तूनाम्, मरणम्, छात्राणाम्, हननम्, हिरण्यकशिपोः, जागरणम्, फलरसस्य, पाठशालायाः, दुष्टस्य, गान्धार्याः, सूचनाफलकस्य, इन्द्रियाणाम्, भयम्, उदयम्

यथा - योगी इन्द्रियाणां संयमनं करोति ।

१. मनुष्यः ------------------------------ भोगं करोति ।
२. शिक्षकः ---------------------------- प्रेरणं करोति ।
३. माधवः अर्जुनस्य चिन्तायां --------------- करोति ।
४. कृष्णः कंसस्य --------------------------- करोति ।
५. प्रतिदिनं सूर्यः --------------------------- प्राप्नोति ।
६. नृसिंहः --------------------------- विदारणं करोति ।
७. बालकः ----------------------------- पानं करोति ।
८. -------------------- पुरतः दुर्योधनः लज्जां करोति ।
९. संचालकः ---------------------- संस्थापनां करोति ।
१०. कौरवाः भीमात् ----------------------- अनुभवन्ति ।
११. राजा ------------------------------- शासनं करोति ।
१२. यात्रिकः --------------------------- ईक्षणं करोति ।
१३. अग्निः तृणस्य --------------------------- करोति ।
१४. अभिमन्युः वीररूपेण -------------------- प्राप्नोति ।

४. अधः दत्तानां पदानां साहाय्येन क्रियापदानि विभज्य यथोदाहरणं वाक्यानि लिखत -

यथा	भक्तः - देवः - अर्चति	भक्तः देवस्य अर्चनं करोति ।
१.	आचार्यः - ज्ञानं - वितरति	-- ।
२.	युवती - भोजनं - परिवेषयति	-- ।
३.	कन्या - फलरसः - क्रीणाति	-- ।
४.	मुनिः - न शोचति	-- ।
५.	माता - दधि - मथ्नाति	-- ।
६.	युवकः - अल्पाहारः - पचति	-- ।
७.	अश्वपालः - अश्वः - बध्नाति	-- ।

८. धीरः - न मुह्यति -- ।
९. रजकः - वस्त्रं - प्रक्षालयति -- ।
१०. सर्पः - बालकं - दशति -- ।
११. सैनिकः - देशं - रक्षति -- ।
१२. ईश्वरः - मोहः - प्रणश्यति -- ।

५. अधः परिच्छेदे प्रदत्तानां क्रियापदानां यथोदाहरणं विभज्य प्रयोगं कुरुत -

बालकः पुस्तकालयं गच्छति । तत्र सः पुस्तकानि **अन्विष्यति** । ततः सः गीतापुस्तकं **चिनोति** । पुस्तके किं किम् अस्ति इति मातरं **पृच्छति चर्चयति** च । माता गीतां **पठति** पुत्राय अर्थं **बोधयति** च । पुत्रः सर्वं **शृणोति** । सः गीतायाः कण्ठस्थीकरणं **संकल्पते** । माता तम् **अभिनन्दति** ।

यथा - सः पुस्तकानि अन्विष्यति । सः **पुस्तकानाम् अन्वेषणं करोति ।**

१. ------------------------------------ । -- ।
२. मातरं पृच्छति चर्चयति च । -- ।
३. ------------------------------------ । -- ।
४. ------------------------------------ । -- ।
५. ------------------------------------ । -- ।
६. ------------------------------------ । -- ।
७. ------------------------------------ । -- ।

६. कोष्ठके लिखितानां पदानां साहाय्येन क्रियापदानि विभज्य वाक्यानि यथोदाहरणं रचयत -

यथा - मोचयन्ति (महिलाः) महिलानां मोचनं कुर्वन्ति ।

१. अनुवदामः (पुस्तकानि) -- ।
२. भासयते (विश्वम्) -- ।
३. पुष्णाति (बालकः) -- ।
४. क्षिपसि (कन्दुकम्) -- ।
५. असूयन्ति (शत्रुः) -- ।
६. संतुष्यति (पितरौ) -- ।
७. सेवसे (रुग्णः) -- ।
८. घातयति (मित्रम्) -- ।
९. छिनत्ति (वृक्षः) -- ।
१०. संगृह्णामि (सुविचाराः) -- ।
११. निबध्नन्ति (चोरः) -- ।
१२. नाटयति (श्रीरामः) -- ।

धनुर्धरेषु अर्जुनः सर्वोत्तमः

सप्तमीविभक्तिः

२१

उच्चैः पठत अवगच्छत च -

एकवचन-प्रयोगः

रथस्य **ध्वजे** मारुतिः विराजते।

विष्णुः **क्षीरसागरे** शेते।

कृष्णस्य **मुकुटे** मयूरपिच्छं शोभते।

आञ्जनेयः **मार्गे** स्वपुच्छं प्रसारयति।

यजुर्वेदे यज्ञविधयः सन्ति।

पाण्डवाः **वृक्षे** शस्त्राणि गोपायन्ति।

मुनिः **तपस्यायां** रतः अस्ति।

सैरन्ध्री **वाटिकायाम्** अस्ति।

राज्ञी **शिबिकायाम्** अस्ति।

भगवद्गीतायां वेदान्तस्य सारः वर्तते।

कृष्णः **नद्याम्** उत्पतति।

युद्धं **युद्धभूमौ** प्रचलति।



धृतराष्ट्रः **सभागारे** अस्ति।

अहं **कल्पादौ** सृष्टेः सर्जनं करोमि।

गृहे प्रतिदिनं गीतापाठः भवति।

योधाः **कुरुक्षेत्रे** सन्ति।

द्वापरयुगे महाभारतं लिखितम्।

अर्जुनः मीनस्य **नेत्रे** बाणं क्षिपति।

प्रदर्शिन्यां महाभारतस्य चित्राणि सन्ति।

रात्रौ युद्धं न करणीयम्।

शिष्यस्य **गुरौ** विश्वासः आवश्यकः।

मुनौ आसक्तिः न भवति।

कवौ कवित्वसामर्थ्यम् अस्ति।

ग्रीष्म-ऋतौ आतपः वर्धते।

द्विवचन-प्रयोगः

कौरवपाण्डवयोः मध्ये द्यूतक्रीडा भवति ।

युधिष्ठिरः **भीमार्जुनयोः** विश्वसिति ।

अभिमन्युः **मातुलयोः** आदरं प्रदर्शयति ।

अम्बिकाम्बालिकयोः अम्बालिका पण्डोः माता ।

सत्यभामा **पेटिकयोः** आभरणानि स्थापयति ।

गत्योः ये शुक्लमार्गेण गच्छन्ति ते पुनः न आयान्ति ।

कृष्णार्जुनयोः संवादः प्रचलति ।

स्व-परधर्मयोः स्वधर्मः श्रेयान् ।

नकुलसहदेवयोः नकुलः ज्येष्ठः ।

लतयोः पुष्पाणि शोभन्ते ।

उभयोः **सेनयोः** मध्ये रथं स्थापय ।

बहुवचन-प्रयोगः

दशावतारेषु बलरामः अष्टमः ।

दुःश्शासनः **कौरवेषु** अन्यतमः ।

वेदेषु ऋग्वेदः प्रथमवेदः ।

वीरेषु धैर्यं भवति ।

अराः **चक्रेषु** सन्ति ।

धनुर्धरेषु अर्जुनः सर्वोत्तमः ।

गीताध्यायेषु द्वादशः अध्यायः भक्तियोगः ।

सैनिकेषु अनुशासनम् आवश्यकम् ।

कारागारेषु बन्धकाः भवन्ति ।

द्वारपालाः **भवनेषु** भवन्ति ।

सभासु मन्त्रिणः राजन्ते।

मर्कटाः **शाखासु** सञ्चरन्ति।

बृहन्नला **कलासु** प्रवीणा।

धेनुषु कपिला मुख्या।



योद्धारः **पङ्क्तिषु** स्थिताः सन्ति।

पुस्तिकासु लेखाः सन्ति।

मीनाः **नदीषु** तरन्ति।

श्वश्रूः **वधूषु** भेदं न करोति।

अभ्यासः

१. तालिकायां यथोदाहरणं सप्तमीविभक्तेः रूपाणि पूरयत -

	प्रथमाविभक्तिः एकवचनम्	सप्तमीविभक्तिः		
		एकवचनम्	द्विवचनम्	बहुवचनम्
अकारान्तः पुंलिङ्गः	क्षत्रियः	क्षत्रिये	क्षत्रिययोः	क्षत्रियेषु
	रथः	रथे	रथयोः	रथेषु
	वेदः	वेदे	वेदयोः	वेदेषु
	धर्मः			
	पाञ्चजन्यः			
	महारथः			
	यज्ञः			
	शिष्यः			
	महानुभावः			
	गुणः			

आकारान्तः स्त्रीलिङ्गः	सेना	सेनायाम्	सेनयोः	सेनासु
	सेविका	सेविकायाम्	सेविकयोः	सेविकासु
	शाखा			
	भाषा			
	निशा			
	देवता			
	भक्ता			
अकारान्तः नपुंसकलिङ्गः	इन्द्रियम्	इन्द्रिये	इन्द्रिययोः	इन्द्रियेषु
	कुलम्	कुले	कुलयोः	कुलेषु
	पात्रम्			
	राजसम्			
	शस्त्रम्			
	जीर्णम्			
इकारान्तः पुंलिङ्गः	मुनिः	मुनौ	मुन्योः	मुनिषु
	रविः	रवौ	रव्योः	रविषु
	कविः			
	ज्ञानाग्निः			
	महर्षिः			
	सारथिः			
	ऋषिः			

इकारान्तः स्त्रीलिङ्गः	विभूतिः	विभूतौ / विभूत्याम्	विभूत्योः	विभूतिषु
	गतिः	गतौ / गत्याम्	गत्योः	गतिषु
	बुद्धिः			
	स्थितिः			
	मतिः			
	ग्लानिः			
	दृष्टिः			
ईकारान्तः स्त्रीलिङ्गः	नदी	नद्याम्	नद्योः	नदीषु
	नारी			
	भेरी			
	मही			
	ओषधी			
	राजसी			
इकारान्तः नपुंसकलिङ्गः	वारि	वारिणि	वारिणोः	वारिषु
	अस्थि			
	अक्षि			
उकारान्तः पुंलिङ्गः	गुरुः	गुरौ	गुर्वोः	गुरुषु
	हेतुः			
	बन्धुः			
	ऋतुः			
	मुमुक्षुः			
	चिकीर्षुः			

उकारान्तः स्त्रीलिङ्गः	**धेनुः**	**धेनौ / धेन्वाम्**	**धेन्वोः**	**धेनुषु**
	रज्जुः			
	हनुः			
	तनुः			
ऊकारान्तः स्त्रीलिङ्गः	**वधूः**	**वध्वाम्**	**वध्वोः**	**वधूषु**
	चमूः			
उकारान्तः नपुंसकलिङ्गः	मधु	**मधुनि**	**मधुनोः**	**मधुषु**
	जानु			
ऋकारान्तः पुंलिङ्गः	**भर्ता**	**भर्तरि**	**भर्त्रोः**	**भर्तृषु**
	योद्धा			
	विधाता			
	दाता			
	नेता			
	पिता			
ऋकारान्तः स्त्रीलिङ्गः	**माता**	**मातरि**	**मात्रोः**	**मातृषु**
	स्वसा			
	दुहिता			

२. कोष्ठके दत्तानां पदानां सप्तमीविभक्तेः रूपाणि उपयुज्य रिक्तस्थानानि पूरयत -

यथा - पितामहः (कौरवपक्षः) **कौरवपक्षे** अस्ति।

१. कृष्णः मम (हृदयम्) ------------------------------------ वसति।
२. शिष्यः (गुरुकुलम्) -------------------------------------- अस्ति।
३. वीराः (रणाङ्गणम्) ------------------------------------- युध्यन्ते।
४. विमानानि (आकाशः) -------------------------------- सञ्चरन्ति।
५. देवाः (विमानानि) ------------------------------------- विराजन्ते।
६. गीता (महाभारतम्) ------------------------------------ अस्ति।
७. अनुशासनं (वेदाः) -- वर्तते।

८. पाण्डवाः (हस्तिनापुरम्) ---------------------------------- तिष्ठन्ति।
९. गोपालः वत्सान् (अरण्यम्) ------------------------------ चारयति।
१०. गोपिकाः (व्रजम्) -- वसन्ति।
११. वीरः (आपत्तिकालम्) ---------------------------- धैर्यं प्रदर्शयति।
१२. अष्टादशयोगाः (श्रीमद्भगवद्गीता) --------------------------- सन्ति।
१३. खगाः (नीडम्) -- सन्ति।
१४. शारदापीठं (शृङ्गगिरिः) ----------------------------------- विद्यते।
१५. कृष्णः (गीता) ---------------- कथयति 'मां शरणम् आगच्छ' इति।
१६. गोपाः (नन्दग्रामः) ------------------------------------- निवसन्ति।
१७. यतिः (संसिद्धिः) -- पुनः यतते।
१८. कृष्णः रथं (सेने) ---------------------------------- मध्ये स्थापयति।
१९. संवादः (उभौ) -- मध्ये चलति।
२०. नदी (काननम्) -- वहति।
२१. सः ध्यानं (गङ्गातीरम्) ------------------------------------ करोति।
२२. (शत्रुः) -- विश्वासः मास्तु।
२३. सर्वम् (अग्निः) -- भस्म भवति।
२४. मुनिः (शुचिदेशः) ---------------------------- आसनं प्रतिष्ठापयति।
२५. बालकः (मन्दिरम्) ------------------------------------ देवं प्रणमति।
२६. कृषकाः (क्षेत्राणि) --------------------------------- बीजानि वपन्ति।
२७. नवीनः (सभा) -- भाषते।
२८. दिनेशः (उपाहारमन्दिरम्) ------------------------------------ खादति।
२९. (गृहम्) --- सर्वे सन्ति।
३०. तव बुद्धिः (समाधिः) ------------------------------ अचला तिष्ठति।
३१. अर्जुनः (तेजोराशिः) --------------------------------- कृष्णं पश्यति।
३२. नीतिकथाः (पुराणानि) --------------------------------------- सन्ति।

३. कोष्ठकस्य साहाय्येन गीताश्लोकान् परिशील्य रिक्तस्थानानि पूरयत -

यथा - भरतसत्तम ! तत्र (त्यागः) **त्यागे** मे निश्चयं शृणु। (१८.४)

१. (धर्मक्षेत्रम्) ---------- (कुरुक्षेत्रम्) ----------- समवेताः कौरवाः पाण्डवाः च किम् अकुर्वत ? (१.१)
२. अहं (सङ्ख्यम्) ------------------ कथं भीष्मं द्रोणं च प्रतियोत्स्यामि। (२.४)
३. केशव ! (घोरम्) ----------------- कर्मणि मां किमर्थं नियोजयसि ? (३.१)
४. त्वम् (आदिः) ---------------- एतत् प्रोक्तवान् इति कथं विजानीयाम् ? (४.४)
५. पण्डिताः (विद्याविनयसम्पन्नः) ------------------------------ समदर्शिनः भवन्ति। (५.१८)

६. योगभ्रष्टः शुचीनां श्रीमतां (गेहम्) ---------------- अभिजायते। (६.४१)

७. (सहस्राणि) --------------------- कश्चित् सिद्धये यतति। (७.३)

८. अत्र (देहः) ----------------- अहम् एव अधियज्ञः। (८.४)

९. अहं (सर्वभूतानि) -------------------------- समः। (९.२९)

१०. (लोकत्रयम्) --------------------- अपि त्वत्समः नास्ति। (११.४३)

११. (सर्वक्षेत्राणि) ------------------------ क्षेत्रज्ञं च मां विद्धि। (१३.२)

१२. तमोगुणे प्रलीनः मनुष्यः (मूढयोनयः) ----------------------- जायते। (१४.१५)

१३. कर्मानुबन्धीनि मूलानि (मनुष्यलोकः) --------------------- अधः अनुसन्ततानि सन्ति। (१५.२)

१४. तस्मात् (कार्याकार्यव्यवस्थितिः) -------------------- तव निमित्तं शास्त्रम् एव प्रमाणम्। (१६.२४)

१५. (अदेशकालः) ------------- अपात्रेभ्यः च यद् दानं दीयते तत् तामसम् उदाहृतम् अस्ति। (१७.२२)

१६. (गुणसङ्ख्यानम्) ----------------------- ज्ञानं कर्म कर्ता च गुणभेदतः त्रिधा कथ्यते। (१८.१९)

१७. भोगैश्वर्यप्रसक्तानां व्यवसायात्मिका बुद्धिः (समाधिः) ---------------------- न विधीयते। (२.४४)

१८. (यज्ञः) ----------------- सर्वगतं ब्रह्म नित्यं प्रतिष्ठितं भवति। (३.१५)

१९. धर्मसंस्थापनार्थाय च (युगं युगम्) ---------- ---------- सम्भवामि। (४.८)

२०. ततः च (संसिद्धिः) ------------------ भूयः यतते। (६.४३)

२१. (जीवलोकः) --------------------- मम सनातनः अंशः एव जीवभूतः। (१५.७)

२२. (शरीरम्) मे ----------------- रोमहर्षः वेपथुश्च एव जायते। (१.२९)

२३. कर्मणि एव ते अधिकारः (फलानि) ----------------- कदाचन न। (२.४७)

२४. ईश्वरः सर्वभूतानां (हृद्देशः) ------------------ अर्जुन तिष्ठति। (१८.६१)

४. मञ्जूषयोः साहाय्येन यथोदाहरणं वाक्यानि रचयत -

एकान्तस्थलम्		ध्यानम्
पाकशाला		पाकः
संसद्भवनम्		सभा
पञ्चवादनम्		जागरणम्
लोकयानम्	भवति	रामः
गृहे	करोति	भोजनम्
विद्यालयः		शिक्षकः
क्रीडाङ्गणम्		मित्राणि
वनम्		सिंहादयः
हिमालयः		योगिनः

यथा - **एकान्तस्थले** ध्यानं भवति।

१. -- ।

२. -- ।

३. -- ।

४. -- ।

५. -- ।

६. -- ।

७. -- ।

८. -- ।

९. -- ।

५. कोष्ठके विद्यमानस्य पदस्य सप्तमीविभक्तिरूपेण यथोदाहरणं रिक्तस्थानानि पूरयत -

यथा - अर्जुनः (रथः) **रथे** उपविशति।

१. भीमः दुर्योधनस्य (कटिः) ------------------------------------ प्रहरति।

२. कृष्णः (वृन्दावनम्) ---------------------------------- नवनीतं चोरयति।

३. अर्जुनः वासुदेवस्य (पादौ) ------------------------------------ पतति।

४. कर्णः (युद्धम्) -- वदति।

५. द्रौपदी कर्णलोलके (कर्णौ) ------------------------------------ धरति।

६. कृष्णार्जुनौ (रथः) --- तिष्ठतः।

७. दुर्जनः सज्जनस्य (ग्रीवा) ------------------------------------ ताडयति।

८. सः पादरक्षां (पङ्क्तिः) ------------------------------------ स्थापयति।

अवधेयम्

यस्मिन् अङ्गे ग्रहणम्, ताडनम्, प्रहरणम् इत्यादिकं भवति, तस्मात् अङ्गवाचकात् शब्दात् परे सप्तमीविभक्तिः भवति। यथा -

१. अर्जुनः कृष्णं **पादयोः** गृहीतवान्।

२. भीमः दुर्योधनं **कटौ** ताडितवान्।

३. भीमः दुःशासनं **वक्षःस्थले** प्रहृतवान्।

अधः तालिकायां दत्तानि सप्तमीविभक्तिरूपाणि पठत स्मरत च -

		एकवचनम्	द्विवचनम्	बहुवचनम्
तद्	पुंलिङ्गे नपुंसकलिङ्गे च	तस्मिन्	तयोः	तेषु
	स्त्रीलिङ्गे	तस्याम्	तयोः	तासु

यद्	पुंलिङ्गे नपुंसकलिङ्गे च	यस्मिन्	ययोः	येषु
	स्त्रीलिङ्गे	यस्याम्	ययोः	यासु
एतद्	पुंलिङ्गे नपुंसकलिङ्गे च	एतस्मिन्	एतयोः	एतेषु
	स्त्रीलिङ्गे	एतस्याम्	एतयोः	एतासु
किम्	पुंलिङ्गे नपुंसकलिङ्गे च	कस्मिन्	कयोः	केषु
	स्त्रीलिङ्गे	कस्याम्	कयोः	कासु
भवत्	पुंलिङ्गे नपुंसकलिङ्गे च	भवति	भवतोः	भवत्सु
	स्त्रीलिङ्गे	भवत्याम्	भवत्योः	भवतीषु
सर्व	पुंलिङ्गे नपुंसकलिङ्गे च	सर्वस्मिन्	सर्वयोः	सर्वेषु
	स्त्रीलिङ्गे	सर्वस्याम्	सर्वयोः	सर्वासु
इदम्	पुंलिङ्गे नपुंसकलिङ्गे च	अस्मिन्	अनयोः	एषु
	स्त्रीलिङ्गे	अस्याम्	अनयोः	आसु
अस्मद्	त्रिषु लिङ्गेषु	मयि	आवयोः	अस्मासु
युष्मद्	त्रिषु लिङ्गेषु	त्वयि	युवयोः	युष्मासु

६. कोष्ठके निर्दिष्टान् भगवद्गीतायाः श्लोकान् पठित्वा रिक्तस्थानेषु सर्वनामपदानि पूरयत -

यथा - मया **केषु केषु** च भावेषु त्वं चिन्त्यः असि ? (१०.१७)

१. ------------------- गताः भूयः न निवर्तन्ति तत् पदं परिमार्गितव्यम् । (१५.४)

२. ----------------- अयनेषु यथाभागम् अवस्थिताः भवन्तः सर्वे भीष्मम् एव अभिरक्षन्तु । (१.११)

३. अन्तकाले अपि --------------------- स्थित्वा ब्रह्मनिर्वाणम् ऋच्छति । (२.७२)

४. -------------------- परां भक्तिं कृत्वा माम् एव एष्यति । (१८.६८)

५. ------------------- शौचं न विद्यते । (१६.७)

६. ---------------------- सेनयोः मध्ये मे रथं स्थापय । (१.२१)

७. ------------------ एतत् न उपपद्यते । (२.३)

८. ---------------------- लोके पुरा मया द्विविधा निष्ठा प्रोक्ता । (३.३)

९. -------------------------- देहे यथा कौमारं यौवनं जरा (च) तथा देहान्तरप्राप्तिः । (२.१३)

१०. सर्वभूतानां या निशा ----------------------- संयमी जागर्ति । (२.६९)

११. सर्वाणि कर्माणि ------------------- संन्यस्य निर्ममः विगतज्वरः भूत्वा युध्यस्व । (३.३०)

१२. ------------------------- यत् श्रेयः तत् सुनिश्चितम् एकं मे ब्रूहि । (५.१)

१३. यः मां सर्वत्र पश्यति सर्वं च ------------------- पश्यति, तस्य अहं न प्रणश्यामि । (६.३०)

१४. इदं सर्वं सूत्रे मणिगणाः इव ------------------ प्रोतम् अस्ति । (७.७)

१५. ------------------------- रणसमुद्यमे कैः मया सह योद्धव्यम् ? (१.२२)

१६. बुधः ---------------------- न रमते । (५.२२)

१७. न तु अहं -------------------- ते मयि । (७.१२)

१८. अत्र ------------------------ देहे अधियज्ञः कः ? (८.२)

१९. ------------------------- स्थितः गुरुणा दुःखेन अपि न विचाल्यते । (६.२२)

२०. ------------------------- कालेषु योगयुक्तः भव । (८.२७)

२१. अहं ------------------- न अवस्थितः । (९.४)

२२. ---------------------- एव मन आधत्स्व । (१२.८)

२३. ---------------------- अर्पितमनोबुद्धिः मद्भक्तः स मे प्रियः । (१२.१४)

२४. अहं ------------------------ गर्भं दधामि । (१४.३)

२५. ---------------------------- लोके दैवः आसुरः एव च द्वौ भूतसर्गौ । (१६.६)

२६. ------------------------- भूतेषु समः परां मद्भक्तिं लभते । (१८.५४)

२७. विषयान् ध्यायतः पुंसः ------------------- सङ्गः उपजायते । (२.६२)

२८. सः ------------------------ भूतेषु नश्यत्सु न विनश्यति । (८.२०)

७. 'कः कस्मिन् निपुणः / कुशलः' इति यथोदाहरणं लिखत -

यथा - भीम - पाककार्यम् भीमः **पाककार्ये** निपुणः ।

१. भीष्मः - शास्त्रम् - ---------------------------------- निपुणः ।

२. नारदः - भजनम् - ---------------------------------- निपुणः ।

३. व्यासः - वेदशास्त्रम् - ---------------------------------- निपुणः ।

४. युधिष्ठिरः - सत्यकथनम् - ---------------------------------- निपुणः ।

५. अर्जुनः - नृत्यकला - ---------------------------------- निपुणः ।

६. नलः - द्यूतक्रीडा - ---------------------------------- निपुणः ।

७. सिंहः - हिंसा - ---------------------------------- निपुणः ।

८. विदुरः - नीतिः - ---------------------------------- निपुणः ।

स्वाभ्यासः

१. यथोदाहरणं स्वपञ्जिकायां ५४ वाक्यानि लिखत -



यथा - पवनस्य सेवायां मतिः अस्ति ।

२. अधः दत्तानां सङ्ख्यानां गीताश्लोकान् परिशीलयत । तेषु च कानि सप्तमीविभक्त्यन्तपदानि समानानि तानि स्वपञ्जिकायां लिखत -

१. ३.१८, ७.९, ९.२९, ११.५५, १८.२०
२. ३.३०, ६.३०, ७.७, ९.२९, १२.६, १८.६८
३. १.२२, ३.३, ८.२, १३.२२, १४.११, १६.६
४. १.११, २.४६, ८.७, १३.२७, १८.५४
५. २.६२, ५.२२, ७.१२, ९.९, ९.२९, १६.७

सर्वे पराक्रमम् अपश्यन्

लङ्‌लकारः २२

उच्चैः पठत -



कौरवपाण्डवयोः मध्ये महाभारतयुद्धम् **आरभत** । तस्य महाभारतयुद्धस्य त्रयोदशे दिने अर्जुनः संशप्तकसेनया सह **अयुध्यत** । अनन्तरं सः कौरवसेनां हन्तुम् **आरभत** । महावीरः भगदत्तः सेनायाः हननम् **अपश्यत्** । सः युद्धार्थम् अर्जुनस्य पुरतः **आगच्छत्** । भगदत्तः अर्जुनं प्रति बहून् शरान् **अत्यजत्** । तस्य भगदत्तस्य गजः सुप्रतीकः ऐरावतस्य वंशजः **आसीत्** । तस्य गजस्य पुरतः तु भीमः अपि न **अतिष्ठत्** । गजः सुप्रतीकः अपि बहून् अश्वान्, गजान् च यमलोकम् **अप्रेषयत्** । अनेन अर्जुनस्य कोपः **अवर्धत** ।

भगदत्तस्य तस्य गजस्य च एतादृशं पराक्रमं सर्वे **अपश्यन्** । 'अद्य कृष्णार्जुनयोः रक्षणं कः करोति ?' इति सर्वे **अचिन्तयन्** ।

पुनः एकेन बाणेन भगदत्तः कृष्णं रक्तरञ्जितम् **अकरोत्** । एतत् दृष्ट्वा अर्जुनः तस्य चापम् **अभञ्जयत्** । तस्य परिवारं च **अहन्** । अनन्तरम् अर्जुनः गजस्य सुप्रतीकस्य कवचम् **अच्छिनत्** । पुनः भगदत्तः श्रीकृष्णं प्रति सुवर्णदण्डयुक्तां लोहमयीं शक्तिम् **अक्षिपत्** । अर्जुनः तस्य शक्त्याः मार्गे एव भञ्जनम् **अकरोत्** । भगदत्तः तादृशं शस्त्रम् **अचालयत्** येन अर्जुनस्य किरीटम् **अभ्रमत्** । अनेन क्रुद्धः अर्जुनः किरीटं यथावत् **अकरोत् अवदत्** च - "भगदत्त ! विश्वम् अन्तिमवारं सम्यक् पश्यतु । पुनः अवसरं न प्राप्नोति" इति । पुनः शरवर्षाः **आरभन्त** । अर्जुनः भगदत्तस्य चापं तूणीरं च **अभिनत्** । द्विसप्ततिबाणैः तं सर्वमर्मसु **अताडयत्** । व्यथितः भगदत्तः वैष्णवास्त्रं **प्राकटयत्** अर्जुनं प्रति **अमुञ्चत्** च । कृष्णः तत् अस्त्रं स्ववक्षस्थले **स्व्यकरोत्** । क्लान्तचित्तः अर्जुनः श्रीकृष्णं प्रति **अभाषत** - "कृष्ण ! अहम् अस्य शस्त्रस्य प्रत्युत्तरं दातुं समर्थः न इति तु न **अवदम्** । तर्हि एतत् किमर्थम् ?" अनन्तरं कुपितः अर्जुनः भगदत्तं गजेन सह **अमारयत्** ।

अस्यां कथायां यानि क्रियापदानि वर्णाक्षरैः मुद्रितानि सन्ति तानि लङ्‌लकारस्य रूपाणि सन्ति ।

अवधेयम्

वर्तमानकालः (लट्‌लकारः)	भूतकालः (लङ्‌लकारः)
सः महावीरः **अस्ति** ।	सः महावीरः **आसीत्** ।
भगदत्तः शरान् **त्यजति** ।	भगदत्तः शरान् **अत्यजत्** ।

सर्वे पराक्रमं **पश्यन्ति**।	सर्वे पराक्रमम् **अपश्यन्**।
भगदत्तः शस्त्रं **चालयति**।	भगदत्तः शस्त्रम् **अचालयत्**।
महाभारतयुद्धम् **आरभते**।	महाभारतयुद्धम् **आरभत**।
अर्जुनस्य कोपः **वर्धते**।	अर्जुनस्य कोपः **अवर्धत**।
अर्जुनः श्रीकृष्णं **भाषते**।	अर्जुनः श्रीकृष्णम् **अभाषत**।

लङ्लकारे प्रायः धातोः पूर्वम् '**अकारः**' दृश्यते। यथा - **अलिखम्, अत्यजत्, अभाषत, अब्रूत**

परस्मैपदिधातूनां लङ्लकारस्य रूपाणि एवं भवन्ति -

धातुः	पुरुषः	एकवचनम्	द्विवचनम्	बहुवचनम्
(दृश्-धातुः)	प्रथमपुरुषः	अपश्यत्	अपश्यताम्	अपश्यन्
	मध्यमपुरुषः	अपश्यः	अपश्यतम्	अपश्यत
	उत्तमपुरुषः	अपश्यम्	अपश्याव	अपश्याम
(त्यज्-धातुः)	प्रथमपुरुषः	अत्यजत्	अत्यजताम्	अत्यजन्
	मध्यमपुरुषः	अत्यजः	अत्यजतम्	अत्यजत
	उत्तमपुरुषः	अत्यजम्	अत्यजाव	अत्यजाम
(वद्-धातुः)	प्रथमपुरुषः	अवदत्	अवदताम्	अवदन्
	मध्यमपुरुषः	अवदः	अवदतम्	अवदत
	उत्तमपुरुषः	अवदम्	अवदाव	अवदाम

अभ्यासः

१. यथोदाहरणं परस्मैपदिधातूनां रूपाणि लिखत -

धातुः	पुरुषः	एकवचनम्	द्विवचनम्	बहुवचनम्
या	प्रथमपुरुषः	**अयात्**	**अयाताम्**	**अयान्**
पच्	उत्तमपुरुषः	**अपचम्**	**अपचाव**	**अपचाम**
गम्	मध्यमपुरुषः			

भ्रम्	प्रथमपुरुषः			
भू	प्रथमपुरुषः			
शुच्	उत्तमपुरुषः			
कथ्	मध्यमपुरुषः			
पत्	प्रथमपुरुषः			
नम्	उत्तमपुरुषः			
प्रच्छ्	प्रथमपुरुषः			

आत्मनेपदिधातूनां लङ्लकाररूपाणि एवं भवन्ति -

धातुः	पुरुषः	एकवचनम्	द्विवचनम्	बहुवचनम्
लभ्-धातुः	प्रथमपुरुषः	अलभत	अलभेताम्	अलभन्त
	मध्यमपुरुषः	अलभथाः	अलभेथाम्	अलभध्वम्
	उत्तमपुरुषः	अलभे	अलभावहि	अलभामहि
वृत्-धातुः	प्रथमपुरुषः	अवर्तत	अवर्तेताम्	अवर्तन्त
	मध्यमपुरुषः	अवर्तथाः	अवर्तेथाम्	अवर्तध्वम्
	उत्तमपुरुषः	अवर्ते	अवर्तावहि	अवर्तामहि
जन्-धातुः	प्रथमपुरुषः	अजायत	अजायेताम्	अजायन्त
	मध्यमपुरुषः	अजायथाः	अजायेथाम्	अजायध्वम्
	उत्तमपुरुषः	अजाये	अजायावहि	अजायामहि

२. यथोदाहरणम् आत्मनेपदिधातूनां रूपाणि लिखत -

धातुः	पुरुषः	एकवचनम्	द्विवचनम्	बहुवचनम्
सेव्	उत्तमपुरुषः	**असेवे**	**असेवावहि**	**असेवामहि**
रम्	मध्यमपुरुषः			
वृध्	प्रथमपुरुषः			
डी	प्रथमपुरुषः			
यज्	उत्तमपुरुषः			

कम्प्	प्रथमपुरुषः			
वन्द्	मध्यमपुरुषः			
स्रंस्	प्रथमपुरुषः			
युध्	उत्तमपुरुषः			
सह्	प्रथमपुरुषः			

कतिचन विशेषक्रियापदानि -

धातुः	**एकवचनम्**	**द्विवचनम्**	**बहुवचनम्**
अस्-धातुः (परस्मैपदम्)	आसीत्	आस्ताम्	आसन्
	आसीः	आस्तम्	आस्त
	आसम्	आस्व	आस्म
इष्-धातुः (परस्मैपदम्)	ऐच्छत्	ऐच्छताम्	ऐच्छन्
	ऐच्छः	ऐच्छतम्	ऐच्छत
	ऐच्छम्	ऐच्छाव	ऐच्छाम
कृ-धातुः (परस्मैपदम्)	अकरोत्	अकुरुताम्	अकुर्वन्
	अकरोः	अकुरुतम्	अकुरुत
	अकरवम्	अकुर्व	अकुर्म
शक्-धातुः (परस्मैपदम्)	अशक्नोत्	अशक्नुताम्	अशक्नुवन्
	अशक्नोः	अशक्नुतम्	अशक्नुत
	अशक्नवम्	अशक्नुव	अशक्नुम
एवमेव 'आप्' धातोः आप्नोत् आप्नुताम् आप्नुवन् **इत्यादीनि, 'श्रु' धातोः च** अशृणोत् अशृणुताम् अशृण्वन् **इत्यादीनि रूपाणि भवन्ति।**			
दा-धातुः (परस्मैपदम्)	अददात्	अदत्ताम्	अददुः
	अददाः	अदत्तम्	अदत्त
	अददाम्	अदद्व	अदद्म
एवमेव 'धा'धातोः अदधात् अधत्ताम् अदधुः **इत्यादीनि रूपाणि भवन्ति।**			

उप+विश्-धातुः (परस्मैपदम्)	उपाविशत्	उपाविशताम्	उपाविशन्
	उपाविशः	उपाविशतम्	उपाविशत
	उपाविशम्	उपाविशाव	उपाविशाम
एध्-धातुः (आत्मनेपदम्)	ऐधत	ऐधेताम्	ऐधन्त
	ऐधथाः	ऐधेथाम्	ऐधध्वम्
	ऐधे	ऐधावहि	ऐधामहि
आस्-धातुः (आत्मनेपदम्)	आस्त	आसाताम्	आसत
	आस्थाः	आसाथाम्	आध्वम्
	आसि	आस्वहि	आस्महि
ईक्ष्-धातुः (आत्मनेपदम्)	ऐक्षत	ऐक्षेताम्	ऐक्षन्त
	ऐक्षथाः	ऐक्षेथाम्	ऐक्षध्वम्
	ऐक्षे	ऐक्षावहि	ऐक्षामहि

३. अधः लिखितानि वाक्यानि यथोदाहरणं भूतकाले परिवर्तयत -

यथा - कृष्णः **धावति**। कृष्णः **अधावत्**।

१. भीमः वने भ्रमति। ---।
२. वयं गीतां पठामः। ---।
३. धेनवः चरन्ति। ---।
४. गणेशः महाभारतं लिखति। ---।
५. सैनिकाः युद्धं कुर्वन्ति। ---।
६. माधवः नवनीतं खादति। ---।
७. अहं चित्रं पश्यामि। ---।
८. कर्णः सेनायाः नेतृत्वं करोति। ---।
९. युधिष्ठिरः पाण्डवेषु ज्येष्ठः अस्ति। ---।
१०. बृहन्नला नृत्यति। ---।
११. कौरवाः पाण्डवाः च द्यूतेन क्रीडन्ति। ---।
१२. अर्जुनः पाशुपतास्त्रम् इच्छति। ---।
१३. अभिमन्युः धैर्येण युध्यते। ---।
१४. ईश्वरः सृष्टिं रचयति। ---।
१५. शङ्खनादेन धरणी कम्पते। ---।
१६. सैनिकाः राष्ट्रं सेवन्ते। ---।

१७. अर्जुनः रथे उपविशति । -- ।

१८. द्रौपदी वरं याचते । -- ।

१९. व्यासः शुकं प्रति भागवतं कथयति । -- ।

२०. भक्तौ ईश्वरं भजेते । -- ।

४. अधः लिखितानि वाक्यानि यथोदाहरणं वर्तमानकाले परिवर्तयत -

यथा - भीमस्य क्रोधः **ऐधत** । भीमस्य क्रोधः **एधते** ।

१. श्रीकृष्णः गीताम् अवदत् । -- ।

२. माघः शिशुपालवधम् अलिखत् । -- ।

३. अर्जुनः युद्धम् अकरोत् । -- ।

४. ऋषयः आशीर्वचनानि अवदन् । -- ।

५. सञ्जयः दिव्यदृष्ट्या युद्धम् ऐक्षत । -- ।

६. मुनयः कुशासनेषु उपाविशन् । -- ।

७. दुर्योधनः उच्चैः अगर्जत् । -- ।

८. अश्वाः क्षेत्रे अधावन् । -- ।

९. कर्णः अपि कुन्तीपुत्रः आसीत् । -- ।

१०. पितामहः शङ्खम् अधमत् । -- ।

११. अष्टादशदिनानि युद्धम् अभवत् । -- ।

१२. गाण्डीवं हस्तात् अस्रंसत । -- ।

१३. श्रद्धावान् ज्ञानम् अलभत । -- ।

१४. युधिष्ठिरः अश्वमेधयज्ञम् अकरोत् । -- ।

१५. कृष्णः रासक्रीडायाम् अरमत । -- ।

१६. वयं सूर्याय अर्घ्यम् अदद्म । -- ।

१७. सैनिकाः अश्वान् अधावयन् । -- ।

१८. गुरुः प्रश्नान् अपृच्छत् । -- ।

१९. शिष्यः असेवत । -- ।

२०. पाण्डवाः वनम् अगच्छन् । -- ।

‘स्म’ प्रयोगः

एतत् कथानकम् उच्चैः पठत -

सुभद्रार्जुनयोः पुत्रः अभिमन्युः आसीत् । सः गर्भकालात् एव चक्रव्यूहभेदनं जानाति **स्म** । सः तादृशानि कार्याणि करोति **स्म** येन जनाः आश्चर्यान्विताः भवन्ति **स्म** । सर्वे तस्मिन् विश्वसन्ति **स्म** । यतः सः अर्जुनः इव धनुर्विद्यां जानाति **स्म** । सः अन्येषाम् आयुधानाम् अपि सम्यक् प्रयोगं करोति **स्म** । अभिमन्युः चक्रव्यूहभेदनम् अपि जानाति **स्म** एतत् कौरवाः न जानन्ति **स्म** । यदा कौरवाः महाभारतयुद्धे चक्रव्यूहं रचितवन्तः तदा अर्जुनस्य

अभावे अभिमन्युः चक्रव्यूहभेदनम् इच्छति **स्म**। परन्तु युधिष्ठिरः अनुमतिं दातुं न इच्छति **स्म**। किन्तु अभिमन्युः हठं करोति **स्म**। अन्ते अनुमतिं प्राप्य चक्रव्यूहभेदनसमये सः बाल्ये एव वीरगतिं प्राप्तवान्।

उच्चैः पठत अवगच्छत च -

वरुणः प्रथमवारं विद्यालयं गत्वा आगच्छत्। तत्र कः कः किं किं करोति **स्म** इति सः मातरं वदति।

वरुणः - विद्यालये शिक्षकः पाठयति **स्म**। छात्राः पठन्ति **स्म**।

सङ्गीतशिक्षकः सङ्गीतं शिक्षयति **स्म**। कश्चन छात्रः मधुरस्वरेण गायति **स्म**।

सेवकः समयानुगुणं घण्टावादनं करोति **स्म**। शारीरिकशिक्षकः व्यायामं कारयति **स्म**।

कर्मकरः पुष्पवाटिकां सिञ्चति **स्म**। क्रीडाकालांशे बालाः क्रीडाङ्गणे क्रीडन्ति **स्म**।

केचित् छात्राः दोलारोहणं कुर्वन्ति **स्म**। विद्यालये सर्वे सावधानतया कार्यं कुर्वन्ति **स्म**।

अवधेयम्

धातोः लट्लकारस्य रूपेण सह '**स्म**' इत्यस्य योजनेन लङ्लकारस्य अर्थः सिध्यति।

यथा -	बालकः क्षेत्रे **अधावत्**।	बालकः क्षेत्रे **धावति स्म**।
	बालकौ क्षेत्रे **अधावताम्**।	बालकौ क्षेत्रे **धावतः स्म**।
	बालकाः क्षेत्रे **अधावन्**।	बालकाः क्षेत्रे **धावन्ति स्म**।

५. यथोदाहरणं वाक्यानि परिवर्तयत -

यथा - बालकः क्रीडति स्म।	**बालकौ क्रीडतः स्म।**	**बालकाः क्रीडन्ति स्म।**
१. सैनिकः पतति स्म।	---------------------------- ।	-------------------------- ।
२. कविः कवितां लिखति स्म।	---------------------------- ।	-------------------------- ।
३. अश्वः मार्गे धावति स्म।	---------------------------- ।	-------------------------- ।
४. चक्रं भ्रमति स्म।	---------------------------- ।	-------------------------- ।
५. छात्रः सङ्गणकं पश्यति स्म।	---------------------------- ।	-------------------------- ।
६. गोपिका नृत्यति स्म।	---------------------------- ।	-------------------------- ।
७. वृद्धः मन्त्रं जपति स्म।	---------------------------- ।	-------------------------- ।
८. सः पूजां करोति स्म।	---------------------------- ।	-------------------------- ।
९. त्वं पत्रं लिखसि स्म।	---------------------------- ।	-------------------------- ।
१०. अहं दुग्धं पिबामि स्म।	---------------------------- ।	-------------------------- ।

स्वाभ्यासः

१. एतत्संख्याकेषु गीताश्लोकेषु लङ्लकारस्य प्रयोगं परिशीलयत -

१.१, १.२, १.१३, १.१९, १.२६, १.४७,

२.११, ४.१, ११.१३, ११.१४

श्रीकृष्णः द्रौपदीं रक्षितवान्

क्तवतु-प्रयोगः **२३**

एतां कथाम् उच्चैः पठत अवगच्छत च -

शकुनिः पाण्डवान् नाशयितुं द्यूतक्रीडाम् **आयोजितवान्**। दुर्योधनः पाण्डवान् द्यूतक्रीडार्थम् **आमन्त्रितवान्**। श्रीकृष्णबलरामौ द्यूतक्रीडायाः विरोधं **कृतवन्तौ**। द्रौपदी अपि क्रीडार्थं विरोधं **प्रकटितवती**। परन्तु पाण्डवाः दुर्योधनस्य आमन्त्रणम् **अङ्गीकृतवन्तः**। सर्वेऽपि पाण्डवाः अश्वशकटानि **आरुढवन्तः**, अश्वशकटानि राजभवनं प्रति **धावितवन्ति**। राजभवनं सम्प्राप्य युधिष्ठिरः द्यूतक्रीडार्थम् **उपविष्टवान्**।

कुटिलः दुर्योधनः शनैः शनैः सर्वमपि **जितवान्**। अन्ते दुर्योधनः द्रौपदीमपि दासीरूपेण **जितवान्**। एतद् दृष्ट्वा कुन्तीगान्धार्यौ अत्यन्तं शोकं **प्रकटितवत्यौ**। प्रजाः अपि अस्य विरोधं **कृतवत्यः**, परन्तु सभायामुपस्थिताः ज्येष्ठाः मौनम् **आचरितवन्तः**।

द्रौपद्याः चीरहरणसमये भीमार्जुनौ दृढप्रतिज्ञां **कृतवन्तौ**। द्रौपदी रक्षार्थं सर्वान् **प्रार्थितवती**, परन्तु कोऽपि तस्याः साहाय्यार्थं न **आगतवान्**। अन्ते सर्वेश्वरः भगवान् श्रीकृष्णः द्रौपद्याः शीलं **रक्षितवान्**। श्रीकृष्णः भक्तानां प्रार्थनां सर्वदा शृणोति यथा द्रौपद्याः **श्रुतवान्**।

अस्यां कथायां वर्णाक्षरैः मुद्रितानि पदानि क्तवतु-प्रत्ययान्तानि रूपाणि सन्ति।

अवधेयम्

भूतकालार्थे यथा लङ्लकारस्य प्रयोगः भवति तथैव क्तवतु-प्रत्ययस्य अपि प्रयोगः भवति।

यथा - श्रीकृष्णः द्रौपद्याः प्रार्थनाम् **अशृणोत्**। (लङ्लकाररूपम्)

श्रीकृष्णः द्रौपद्याः प्रार्थनां **श्रुतवान्**। (क्तवतुप्रत्ययान्तं रूपम्)

अभ्यासः

१. यथोदाहरणं क्तवतुप्रत्ययान्तानि क्रियापदानि पाठात् चित्वा रिक्तस्थानानि पूरयत -

यथा - शकुनिः पाण्डवान् नाशयितुं द्यूतक्रीडाम् **आयोजितवान्** ।

१. दुर्योधनः पाण्डवान् द्यूतक्रीडार्थम् ------------------------------ ।

२. श्रीकृष्णबलरामौ द्यूतक्रीडायाः विरोधं ------------------------- ।

३. द्रौपदी अपि क्रीडार्थं विरोधं ---------------------------------- ।

४. अश्वशकटानि राजभवनं प्रति --------------------------------- ।

५. कुटिलः शकुनिः शनैः शनैः सर्वमपि ------------------------- ।

६. दुर्योधनः द्रौपदीं दासीरूपेण ---------------------------------- ।

७. सभायामुपस्थिताः ज्येष्ठाः मौनम् ----------------------------- ।

८. द्रौपदी रक्षार्थं सर्वान् --- ।

९. कोऽपि द्रौपद्याः साहाय्यार्थं न -------------------------------- ।

१०. श्रीकृष्णः द्रौपद्याः शीलं ------------------------------------- ।

अवधेयम्

➢ भूतकालार्थे लङ्लकारस्य यानि रूपाणि भवन्ति तेषां प्रयोगः त्रिषु पुरुषेषु त्रिषु वचनेषु च भवति । यथा -

	ए.व.	**द्विव.**	**ब.व.**
प्र. पु.	छात्रः अगच्छत् ।	छात्रौ अगच्छताम् ।	छात्राः अगच्छन् ।
म. पु.	त्वम् अगच्छः ।	युवाम् अगच्छतम् ।	यूयम् अगच्छत ।
प्र. पु.	अहम् अगच्छम् ।	आवाम् अगच्छाव ।	वयम् अगच्छाम ।

➢ भूतकालार्थे क्तवतुप्रत्ययान्तानि यानि रूपाणि भवन्ति तेषां प्रयोगः त्रिषु लिङ्गेषु, त्रिषु वचनेषु सप्तसु विभक्तिषु च भवति । यथा -

	ए.व.	**द्विव.**	**ब.व.**
प्र. वि. (पुं.)	छात्रः गतवान् ।	छात्रौ गतवन्तौ ।	छात्राः गतवन्तः ।
प्र. वि. (स्त्री.)	छात्रा गतवती ।	छात्रे गतवत्यौ ।	छात्राः गतवत्यः ।
प्र. वि. (नपुं.)	यानं गतवत् ।	याने गतवती ।	यानानि गतवन्ति ।

२. यथोदाहरणं रिक्तस्थानानि पूरयत -

लट्लकाररूपम्	क्तवतुप्रत्ययान्तानि रूपाणि (पुंलिङ्गे)		
	एकवचनम्	द्विवचनम्	बहुवचनम्
लिखति	लिखितवान्	लिखितवन्तौ	लिखितवन्तः
हसति	हसितवान्		
चिन्तयति	चिन्तितवान्		
याचते	याचितवान्		
भ्रमति	भ्रमितवान्		
बोधति	बोधितवान्		
गर्जति	गर्जितवान्		
धरति	धृतवान्	धृतवन्तौ	धृतवन्तः
पश्यति	दृष्टवान्		
वक्ति	उक्तवान्		
हन्ति	हतवान्		
म्रियते	मृतवान्		
तिष्ठति	स्थितवान्		
करोति	कृतवान्		
गच्छति	गतवान्		
ददाति	दत्तवान्		
लभते	लब्धवान्		
शक्नोति	शक्तवान्		
पचति	पक्ववान्		
शृणोति	श्रुतवान्		

३. यथोदाहरणं रिक्तस्थानानि पूरयत -

लट्लकाररूपम्	क्तवतुप्रत्ययान्तानि रूपाणि (स्त्रीलिङ्गे)		
	एकवचनम्	द्विवचनम्	बहुवचनम्
पठति	**पठितवती**	**पठितवत्यौ**	**पठितवत्यः**
खादति	खादितवती		
क्रीडति	क्रीडितवती		
कथयति	कथितवती		
शेते	शयितवती		
रक्षति	रक्षितवती		
जनयति	जनितवती		
लभते	**लब्धवती**	**लब्धवत्यौ**	**लब्धवत्यः**
क्षिपति	क्षिप्तवती		
त्यजति	त्यक्तवती		
उपविशति	उपविष्टवती		
शृणोति	श्रुतवती		
करोति	कृतवती		
नश्यति	नष्टवती		
क्रीणाति	क्रीतवती		
दहति	दग्धवती		
गायति	गीतवती		
प्राप्नोति	प्राप्तवती		
ददाति	दत्तवती		
जानाति	ज्ञातवती		

४. **यथोदाहरणं रिक्तस्थानानि पूरयत -**

लट्लकाररूपम्	**क्तवतुप्रत्ययान्तानि रूपाणि (नपुंसकलिङ्गे)**		
	एकवचनम्	**द्विवचनम्**	**बहुवचनम्**
भ्रमति	**भ्रमितवत्**	**भ्रमितवती**	**भ्रमितवन्ति**
चलति	चलितवत्		
कथयति	कथितवत्		
जयति	जितवत्		
वक्ति	उक्तवत्		

अवधेयम्

अधः तालिकायां प्रदत्तानि क्तवतुप्रत्ययान्तानि रूपाणि पठत अवगच्छत च -

धातुः + क्तवतु	**पुंलिङ्गम्**	**स्त्रीलिङ्गम्**
भिद् + क्तवतु	भिन्नवान्	भिन्नवती
छिद् + क्तवतु	छिन्नवान्	छिन्नवती
जॄ + क्तवतु	जीर्णवान्	जीर्णवती
शॄ + क्तवतु	शीर्णवान्	शीर्णवती
इष् + क्तवतु	इष्टवान्	इष्टवती
वद् + क्तवतु	उदितवान्	उदितवती
वस् + क्तवतु	उषितवान्	उषितवती
वच् + क्तवतु	उक्तवान्	उक्तवती

५. **यथोदाहणं कोष्ठके दत्तानां धातूनां क्तवतुप्रत्ययान्तानि रूपाणि प्रयुज्य वाक्यानि पूरयत -**

यथा - अर्जुनः युद्धं **कृतवान्**। (कृ)

१. गणेशः महाभारतं -------------------------। (लिख्)

२. दुर्योधनः जले ----------------------------। (पत्)

३. व्यासः शुकं भागवतकथां -------------------------। (कथ्)

४. भीमः गदया दुर्योधनं ---------------------------- । (ताड्)

५. युधिष्ठिरः द्यूतक्रीडायाः निमन्त्रणपत्रं -------------------------- । (पठ्)

६. भीमः पायसं ------------------------- । (पीतवान्)

७. अर्जुनः मीनस्य नेत्रं -------------------------- । (भिद्)

८. पाण्डवाः वनं ------------------------- । (गम्)

९. श्रीकृष्णः गीतां ------------------------------ । (बुध्)

१०. गान्धारी आशीः ------------------------- । (वच्)

११. द्रौपदी पतितं दुर्योधनं दृष्ट्वा ------------------------ । (हस्)

१२. कुन्ती कर्णं ---------------------- । (त्यज्)

१३. कृष्णः विदुरस्य गृहे ---------------------- । (वस्)

१४. आत्मा पुरातनं शरीरं त्यक्त्वा नूतनं शरीरं ------------------------ । (धृ)

१५. कृष्णः गोपबालान् सङ्कटात् --------------------------- । (रक्ष्)

६. यथोदाहरणं वाक्यानि परिवर्तयत -

यथा - कृष्णः अर्जुनाय गीतोपदेशम् अददात्।
कृष्णः अर्जुनाय गीतोपदेशं दत्तवान्।

१. एकादशे अध्याये अर्जुनः भगवतः विश्वरूपदर्शनम् अकरोत्।

--- ।

२. पाण्डवाः वनवासम् अगच्छन्।

--- ।

३. भीमः दुःशासनम् अमारयत्।

--- ।

४. नकुलसहदेवौ अश्वशालाम् अगच्छताम्।

--- ।

५. नर्तक्यः विश्वामित्रस्य पुरतः नृत्यम् अकुर्वन्।

--- ।

६. सुदर्शनचक्रं शिशुपालस्य शिरश्छेदनम् अकरोत्।

--- ।

७. व्यासः सञ्जयाय दिव्यदृष्टिम् अददात्।

--- ।

८. वयं प्रतिदिनं भगवद्गीताम् अपठाम।

-- ।

९. स्यन्दनेन युद्धक्षेत्रम् अगच्छताम्।

-- ।

१०. दुर्योधनस्य मित्राणि अपि युद्धे साहाय्यम् अकुर्वन्।

-- ।

११. गान्धारी एकवारं दुर्योधनम् अपश्यत्।

-- ।

१२. पाण्डवाः अज्ञातवासं मत्स्यदेशे अयापयन्।

-- ।

१३. युद्धे अक्षौहिणीसेना अयुध्यत।

-- ।

१४. अर्जुनः पाशुपतास्त्रम् अलभत।

-- ।

१५. सेविका प्रतिफलं न ऐच्छत्।

-- ।

१६. उभे सेने कुरुक्षेत्रम् एकत्र आगच्छताम्।

-- ।

१७. राजसेविकाः राजाज्ञाम् अपालयन्।

-- ।

१८. पितामहः उच्चैः शङ्खनादम् अकरोत्।

-- ।

कदा किं भवति ?

कदा, प्रपरह्यः, परह्यः, ह्यः, अद्य, श्वः, परश्वः, प्रपरश्वः

२४

उच्चैः पठत अवगच्छत च -

कुत्रचित् विद्यालये महाभारतस्य विषये साप्ताहिकं सत्रं प्रचलति। सत्रस्य चतुर्थे दिवसे कश्चन छात्रः आगच्छति।

मोहनः नमस्ते। अत्र महाभारतस्य विषये कार्यक्रमः प्रचलति वा ?

शिक्षकः आम्। भवान् **अद्य** नूतनः आगतवान् किम् ?

मोहनः आम्। अहम् अपि अद्यारभ्य चर्चासत्रे भागं स्वीकरोमि वा ?

शिक्षकः निश्चयेन स्वीकरोतु। इदं सत्रं तु छात्राणां कृते एव अस्ति।

मोहनः परन्तु अहं **ह्यः, परह्यः, प्रपरह्यः** च किं किम् अभवत् इत्यस्मिन् विषये किमपि न जानामि।

शिक्षकः चिन्ता मास्तु। अत्र **कदा** किम् अभवत्, किञ्च, **कदा** किं भविष्यति इति अहं सर्वं वदामि भवान् लिखतु।

मोहनः अस्तु। **प्रपरह्यः** किम् अभवत् ?

शिक्षकः **प्रपरह्यः** प्रथमदिवसे समग्रस्य महाभारतस्य भूमिकाविषये चर्चा अभवत्। तदनन्तरं प्रथमपर्वद्वयस्य विषये अपि चर्चा अभवत्।

मोहनः **परह्यः** किम् अभवत् ?

शिक्षकः **परह्यः** वनपर्व विराटपर्व च इति पर्वद्वयस्य अध्ययनम् अभवत्।

मोहनः **ह्यः** किम् आसीत् ?

शिक्षकः **ह्यः** तु पाठं किञ्चित् शीघ्रम् एव आरब्धवन्तः।

मोहनः तथा किमर्थं जातम् ?

शिक्षकः **ह्यः** उद्योगपर्वानन्तरं भीष्मपर्वपाठः प्रामुख्येन आसीत्।

मोहनः **अद्य** अपि पर्वद्वयस्य पाठः अस्ति किम् ?

शिक्षकः नैव, **अद्य** तु द्रोणपर्व, कर्णपर्व, शल्यपर्व, सौप्तिकपर्व, स्त्रीपर्व इति एतेषां पाठनम् अस्ति।

मोहनः अस्तु।

शिक्षकः **श्वः** शान्तिपर्वपाठः भविष्यति।

मोहनः **श्वः** एकम् एव पर्व भविष्यति वा ?

शिक्षकः आम्, तत् पर्व सुदीर्घम् अस्ति।

मोहनः पुनः **परश्वः** कः पाठः ?

शिक्षकः **परश्वः** अनुशासनपर्व, आश्वमेधिकपर्व, आश्रमवासिकपर्व, मौसलपर्व, महाप्रस्थानिकपर्व, स्वर्गारोहणपर्व च अस्ति। अतः विरामः कदाचित् विलम्बेन भविष्यति।

मोहनः **प्रपरश्वः** पुनः किं भविष्यति ?

शिक्षकः **प्रपरश्वः** अन्तिमदिनम्। तस्मिन् दिने पुनः एकवारम् अष्टादशपर्वविषये सर्वेषां मुख्यविषयाणां बोधनं भविष्यति।

मोहनः धन्यवादः, अहम् अपि अन्तिमदिनपर्यन्तं निश्चयेन आगच्छामि।

अभ्यासः

१. पाठं पठित्वा रिक्तस्थानानि पूरयत -

यथा - -------------------- कश्चन छात्रः आगच्छति।

सत्रस्य चतुर्थे दिवसे कश्चन छात्रः आगच्छति।

१. भवान् ------------- नूतनः आगतवान् किम्?

२. परन्तु अहं -------------------- च किं किम् अभवत् इत्यस्मिन् विषये किमपि न जानामि।

३. अत्र ------------- किम् अभवत्?

४. अस्तु ----------------- किम् अभवत्?

५. ---------------- शान्तिपर्वपाठः भविष्यति।

६. ---------------- अनुशासनपर्व, आश्वमेधिकपर्व, आश्रमवासिकपर्व, मौसलपर्व, महाप्रस्थानिकपर्व, स्वर्गारोहणपर्व च अस्ति।

७. ----------------- अन्तिमदिनम्।

२. 'कदा' इत्यस्य प्रयोगेण यथोदाहरणं प्रश्ननिर्माणं कुरुत -

यथा - कृष्णजन्मोत्सवः **भाद्रपदकृष्ण-अष्टम्यां** भवति।

कृष्णजन्मोत्सवः **कदा** भवति?

१. राधाजन्मोत्सवः भाद्रपदशुक्ल-अष्टम्यां भवति।

-- ?

२. वामनावतारः भाद्रपदशुक्लद्वादश्यां भवति।

-- ?

३. नवरात्रोत्सवः आश्विनशुक्लपक्षे भवति।

-- ?

४. गणतन्त्रदिवसः जनवरीमासे भवति।

-- ?

५. सूर्यः प्रातःकाले उदेति।

-- ?

६. स्वतन्त्रतादिवसम् अगस्तमासस्य पञ्चदशदिनाङ्के आचरामः।

-- ?

७. गान्धीजयन्ती अक्टूबरमासे भवति।

-- ?

८. विश्वयोगदिवसः जूनमासस्य एकविंशतितमे दिनाङ्के भवति।

-- ?

९. सितम्बरमासस्य पञ्चमे दिनाङ्के शिक्षकदिवसःभवति।

-- ?

१०. नवम्बरमासस्य चतुर्दशे दिनाङ्के बालदिवसःभवति।

-- ?

अवधेयम्

ह्यः, परह्यः, प्रपरह्यः	-	आसीत्
अद्य	-	अस्ति
श्वः, परश्वः, प्रपरश्वः	-	भविष्यति

३. अद्य / ह्यः / परह्यः / प्रपरह्यः / श्वः / परश्वः / प्रपरश्वः इति क्रमशः एकम् एकं पदं रिक्तस्थानेषु लिखत -

यथा - **अद्य** विद्यालये भजनसन्ध्या अस्ति।

१. ---------------- श्लोक-अन्त्याक्षरी आसीत्।

२. ----------- गीतायाः शलाकापरीक्षा आसीत्।

३. -------------------- श्रावणपूर्णिमा आसीत्।

४. -------------------- गणेशचतुर्थी भविष्यति।

५. ---------------- भ्रातुः जन्मदिनं भविष्यति।

६. ---------------------- मम कार्यं भविष्यति।

इदानीम्

उच्चैः पठत अवगच्छत च -

१. पूर्वं युधिष्ठिरः बालः आसीत्, इदानीं ज्येष्ठः अस्ति।
२. पूर्वं कर्णः सामान्यः आसीत्, इदानीम् अङ्गराजः अस्ति।
३. पूर्वं पाण्डुः राजा आसीत्, इदानीं धृतराष्ट्रः राजा अस्ति।
४. पूर्वं क्षेत्रस्य नाम स्यमन्तपञ्चकः आसीत्, इदानीं कुरुक्षेत्रम् अस्ति।
५. पूर्वं कृष्णः नवनीतचोरः आसीत्, इदानीं द्वारकाधीशः अस्ति।
६. पूर्वं नगरस्य नाम भाग्यनगरम् आसीत्, इदानीं हैदराबादम् इति अस्ति।

७. भक्ताः पूर्वं मन्दिरस्य अन्तः आसन्, **इदानीं** बहिः सन्ति।

८. वयम् **इदानीम्** अमेरिकायां स्मः, श्वः भारतम् आगमिष्यामः।

९. यूयम् **इदानीं** कुत्र स्थ, **इदानीं** किं कुरुथ ?

१०. **इदानीं** भवान् किं पश्यति ? **इदानीं** सेनयोः मध्ये कृष्णार्जुनौ पश्यामि।

४. तालिकायाः साहाय्येन सप्त वाक्यानि रचयत -

कृष्णः / ललिता	इदानीम्	पश्यामः।
		गृहे सन्ति।
गोपाः / गोप्यः		महारासे सन्ति।
		रासं पश्यथ।
त्वं / यूयम्		द्वारे अस्ति।
		राधया सह अस्ति।
अहं / वयम्		किं करिष्यसि ?
		गच्छामि।

यथा - कृष्णः **इदानीं** राधया सह अस्ति।

१. --।

२. --।

३. --।

४. --।

५. --।

६. --।

७. --।

५. यथोदाहरणं वाक्यानि रचयत -

यथा - कृष्णः - मथुरा - द्वारका

पूर्वं कृष्णः मथुरायाम् आसीत्। **इदानीं** द्वारकायाम् अस्ति।

१. अर्जुनः - अरण्यम् - हस्तिनापुरम्

--। --।

२. भीमः - गुरुकुलम् - गृहम्

--। --।

३. कैलासमानसरोवरः - भारतम् - चीनदेशः

--------------------------------------- । -- ।

४. विजयः - अवन्तिका - द्वारका

--------------------------------------- । -- ।

५. सन्तोषः - किष्किन्धा - अयोध्या

--------------------------------------- । -- ।

६. मञ्जुनाथः - मायापुरी - काशी

--------------------------------------- । -- ।

७. हेमलता-उज्जयिनी-अमरावती

--------------------------------------- । -- ।

८. विष्णुरातः - बालः - युवकः

पूर्वं विष्णुरातः बालः आसीत्। **इदानीं** युवकः अस्ति।

--------------------------------------- । -- ।

९. गोपेशः - अज्ञः - प्राज्ञः

--------------------------------------- । -- ।

१०. केशवः - शिक्षकः - प्रधानशिक्षकः

--------------------------------------- । -- ।

११. योगेशः - निर्धनः - धनिकः

--------------------------------------- । -- ।

अद्यतन-ह्यस्तन-श्वस्तन-पूर्वतन-इदानीन्तनाः

एतत् सम्भाषणम् उच्चैः पठत -

पिता पुत्र ! तव विद्यालये इदानीं किं प्रचलति ?

पुत्रः पितः ! विद्यालये इदानीं गीताविषये साप्ताहिककार्यक्रमः प्रचलति।

पिता अद्य कार्यक्रमस्य कतिथं दिनम् आसीत् ?

पुत्रः अद्य कार्यक्रमस्य तृतीयं दिनम् आसीत्।

पिता **अद्यतनविषयः** कः ?

पुत्रः **अद्यतनविषयः** 'गीतायाः जीवने किं महत्त्वम्' इति अस्ति।

पिता : **ह्यस्तनविषयः** कः आसीत् ?

पुत्रः **ह्यस्तनविषयः** 'महाभारते कृष्णस्य भूमिका' इति आसीत्।

पिता : पुत्र ! **पूर्वतनविषयं** सम्यक् लिखितवान् न वा ?

पुत्रः आम्, सम्यक् लिखितवान्।

पिता भवतः **इदानीन्तनकार्यं** किम्? **श्वस्तनविषये** किं चिन्तनम् अस्ति?

पुत्रः **इदानीन्तनकार्यं** तु **श्वस्तनकार्यक्रमस्य** विषये चिन्तनम् अस्ति।

पिता उत्तमम्। तथैव करोतु।

६. सम्भाषणं पठित्वा रिक्तस्थानानि पूरयत -

१. -------------------------------- 'गीतायाः जीवने किं महत्त्वम्' इति अस्ति।

२. पुत्र ! ----------------- सम्यक् लिखितवान् न वा?

३. -------------------------------- 'महाभारते श्रीकृष्णस्य भूमिका' इति आसीत्।

४. ----------------------------------- किं चिन्तनम्?

५. ----------------------------------- कार्यक्रमस्य विषये चिन्तनम् अस्ति।

७. कोष्ठकस्य साहाय्येन पञ्चदशवाक्यानि रचयत -

	इदानीन्तन-		शृणोति, शृणोमि
	श्वस्तन -		श्रुतवान्
सः, सा, अहम्	ह्यस्तन -	पाठम्	श्रुतवती
	पूर्वतन -		श्रोष्यति, श्रोष्यामि
	अद्यतन -		

यथा - सः **इदानीन्तनपाठं** शृणोति।

१. --।

२. --।

३. --।

४. --।

५. --।

६. --।

७. --।

८. --।

९. --।

१०. --।

११. --।

१२. --।

१३. -- ।

१४. -- ।

८. **तालिकायां विद्यमानानि पदानि उपयुज्य यथोदाहरणं वाक्यानि लिखत -**

कर्णावती	अहमदाबादम्
सम्भाजीनगरम्	औरङ्गाबादम्
हरीगढनगरम्	अलीगढनगरम्
पाटलीपुत्रम्	पटनानगरम्
लक्ष्मीनगरम्	मुजप्फरनगरम्
अजयमेरुः	अजमेरनगरम्
चर्मण्वतीनदी	चम्बलनदी

यथा - कर्णावत्याः **इदानीन्तननाम** अहमदाबादम् अस्ति ।

अहमदाबादस्य **पूर्वतननाम** कर्णावती आसीत् ।

१. -- ।

-- ।

२. -- ।

-- ।

३. -- ।

-- ।

४. -- ।

-- ।

५. -- ।

-- ।

६. -- ।

-- ।

स्वाभ्यासः

१. यथोदाहरणं चत्वारि वाक्यानि रचयत -

यथा - **अद्य** सोमवासरः अस्ति, **अद्य** माघमासस्य अष्टमीतिथिः अस्ति, **अद्य** प्रथमः दिनाङ्कः अस्ति । **अद्य** गङ्गास्नानं करोमि ।

१. श्वः ---
--- ।

२. परश्वः ---
--- ।

३. प्रपरश्वः ---
--- ।

४. ह्यः ---
--- ।

५. परह्यः ---
--- ।

६. प्रपरह्यः ---
--- ।

२. 'इदानीम्' इति एतत् अव्ययम् उपयुज्य कानिचन वाक्यानि रचयत -

--- ।

--- ।

--- ।

--- ।

--- ।

३. अधो निर्दिष्टानां पदानां योगेन पञ्च वाक्यानि रचयत -

यथा - मनीषः **अद्यतनकार्यस्य** सज्जतां करोति ।

१. ह्यस्तनसमाचारपत्रं --- ।

२. श्वस्तनलेखम् --- ।

३. पूर्वतनचित्रम् --- ।

४. इदानीन्तनसूचनाम् --- ।

५. अद्यतनचिन्तनम् --- ।

उपसर्गाः

२५

उच्चैः पठत -

१. कुलक्षये सनातनाः कुलधर्माः **प्रणश्यन्ति**।

२. धर्मसंस्थापनार्थाय ईश्वरः युगे युगे **सम्भवति**।

३. केशव ! आहवे स्वजनं हत्वा श्रेयः न **अनुपश्यामि**।

४. पण्डिताः मृतेषु जीवत्सु च न **अनुशोचन्ति**।

५. श्रेष्ठः यत् प्रमाणं कुरुते लोकः तत् **अनुवर्तते**।

६. मुमुक्षुः प्रसन्नताम् **अधिगच्छति**।

७. धर्मे नष्टे कृत्स्नं कुलम् अधर्मः **अभिभवति**।

८. भवन्तः सर्वे भीष्मम् एव **अभिरक्षन्तु**।

९. निष्कामस्य रागादिविमुक्तस्य समग्रं कर्म **प्रविलीयते**।

१०. कृष्णः अर्जुनं धर्मम् **उपदिशति**।

११. सामान्यजनः आत्मविवरणं न **विजानाति**।

१२. स्थितप्रज्ञः शुभं प्राप्य न **अभिनन्दति**।

१३. यः ब्रह्मस्थितिं प्राप्नोति सः न **विमुह्यति**।

१४. कृष्णः अर्जुनं युद्धे **नियोजयति**।

१५. मुनिः संसारमार्गेण न **अनुवर्तयति**।

१६. निर्मलचित्तस्य बुद्धिः शीघ्रं **पर्यवतिष्ठते**।

१७. रागद्वेषशून्यः बन्धनात् अनायासेन **प्रमुच्यते**।

१८. धृतराष्ट्रः सिंहासने **उपविशति**।

१९. अर्जुनः योद्धुकामान् **निरीक्षते**।

२०. कामात् क्रोधः **अभिजायते**।

२१. सामान्यपुरुषस्य विषयेषु सङ्गः **उपजायते**।

२२. सङ्गात् कामः **सञ्जायते**।

२३. कर्मत्यागमात्रेण जनः आत्मज्ञानं न **समधिगच्छति**।

२४. अर्जुनस्य मुखं **परिशुष्यति**।

२५. अधर्मः यदि कुलानि **आवृणोति** तर्हि कुलस्त्रियः प्रदुष्यन्ति।

अवधेयम्

उपसर्गाः द्वाविंशतिः सन्ति। ते च -

प्र, परा, अप, सम्, अनु, अव, निस्, निर्, दुस्, दुर्, वि, आङ्, नि, अधि, अपि, अति, सु, उद्, अभि, प्रति, परि, उप इति।

उच्चैः पठत जानीत च -

उपसर्गः	धातुः	उपसर्गरहितं क्रियापदम्	उपसर्गसहितं क्रियापदम्
प्र	क्षाल्	क्षालयति	प्रक्षालयति
	ब्रू	आह	प्राह* १
	भाष्	भाषते	प्रभाषते

परा	भू	भवति	पराभवति
	अय्	अयते	पलायते* २
अप	कृ	करोति	अपकरोति
	मन्	मन्यते	अपमन्यते
सम्	ग्रह्	गृह्णाति	संगृह्णाति
	हृ	हरति	संहरति
	जन्	जायते	सञ्जायते
अनु	सृ	सरति	अनुसरति
	धाव्	धावति	अनुधावति
	सज्ज्	सज्जते	अनुषज्जते
अव	गम्	गच्छति	अवगच्छति
	नम्	नमति	अवनमति
	लोक्	लोकते	अवलोकते
निस्	सृ	सरति	निस्सरति
	स्पृह्	स्पृहयति	निस्स्पृहयति
निर्	गम्	गच्छति	निर्गच्छति
	वह्	वहति	निर्वहति
दुस्	कृ	करोति	दुष्करोति
	सह्	सहते	दुस्सहते
दुर् + आ	चर्	चरति	दुराचरति
दुर्	वृत्	वर्तते	दुर्वर्तते
वि	स्मृ	स्मरति	विस्मरति
	तृ	तरति	वितरति
	ईक्ष्	ईक्षते	वीक्षते

आ	गम्	गच्छति	आगच्छति
	नी	नयति	आनयति
	रभ्	रभते	आरभते
नि	क्षिप्	क्षिपति	निक्षिपति
	युज्	युङ्क्ते	नियुङ्क्ते
अधि	वस्	वसति	अधिवसति
	इङ्	....	अधीते* ३
अपि	धा	दधाति	पिदधाति* ४
अपि	धा	धत्ते	पिधत्ते* ४
अति	इण्	एति	अत्येति
	रिच्	रिच्यते	अतिरिच्यते
सु	स्ना	स्नाति	सुस्नाति
	भाष्	भाषते	सुभाषते
उद्	स्था	तिष्ठति	उत्तिष्ठति
	सृ	सृजति	उत्सृजति
	वह्	वहति	उद्वहति
अभि	ज्ञा	जानाति	अभिजानाति
	जन्	जायते	अभिजायते
प्रति	भा	भाति	प्रतिभाति
	ज्ञा	जानीते	प्रतिजानीते
परि	पाल्	पालयति	परिपालयति
	प्रच्छ्	पृच्छति	परिपृच्छति
	वृत्	वर्तते	परिवर्तते

उप	इ	एति	उपैति
	कृ	करोति	उपकरोति
	युज्	युङ्क्ते	उपयुङ्क्ते

* १. ब्रूञ्-धातुः उभयपदी। ब्रवीति, ब्रूते इति रूपद्वयम्। तस्य वर्तमानकाले 'आह' इत्यपि रूपान्तरमस्ति।
* २. 'परा + अयते' इति रूपे 'रा' इत्यस्य 'ला' भवति।
* ३. इङ्-धातुः 'अधि' उपसर्गेण सहितः एव प्रयुज्यते।
* ४. 'अपि + दधाति' 'अपि + धत्ते' इति रूपे अकारस्य लोपः भवति।

अभ्यासः

१. यथोदाहरणम् उपसर्गं क्रियापदं च योजयित्वा पदानि लिखत -

यथा - आ गच्छति आगच्छति

१. अनु	वदति	--------------	१८. वि	मुह्यति	--------------
२. अनु	करोति	--------------	१९. सम्	भवति	--------------
३. वि	लिखति	--------------	२०. उद्	गच्छति	--------------
४. प्र	हरति	--------------	२१. आ	रभते	--------------
५. नि	क्षिपति	--------------	२२. प्र	सिद्ध्यति	--------------
६. अप	करोति	--------------	२३. निर्	ईक्षते	--------------
७. परि	त्यजति	--------------	२४. प्र	जहाति	--------------
८. आ	दत्ते	--------------	२५. अभि	रक्षति	--------------
९. सम्	जायते	सञ्जायते	२६. परि	शुष्यति	--------------
१०. प्र	याति	--------------	२७. सम्	तुष्यति	सन्तुष्यति
११. उप	पद्यते	--------------	२८. उद्	डयते	उड्डयते
१२. वि	नश्यति	--------------	२९. अव	शिष्यते	--------------
१३. अव	आप्नोति	अवाप्नोति	३०. आ	वर्तते	--------------
१४. नि	बध्नाति	--------------	३१. उद्	भवति	उद्भवति
१५. वि	स्मरति	--------------	३२. उप	आस्ते	--------------
१६. अभि	रक्षति	--------------	३३. अनु	इच्छति	अन्विच्छति
१७. उप	विशति	--------------	३४. उप	रमते	--------------

३५. प्रति	घातयति	--------------	३७. परा	वर्तते	--------------
३६. परि	चरति	--------------	३८. परि	त्रायते	--------------

उपसर्गेण धात्वर्थो: बलादन्यत्र नीयते ।
प्रहाराहारसंहारविहारपरिहारवत् ॥

ह्व - हरति = प्र + हरति - प्रहरति, आ + हरति - आहरति, सम् + हरति - संहरति, वि + हरति - विहरति, परि + हरति - परिहरति

धात्वर्थं बाधते कश्चित् कश्चित् तमनुवर्तते ।
तमेव विशिनष्ट्यन्य: उपसर्गगतिस्त्रिधा ॥

उपसर्गनियमा:

१. उपसर्ग: धातो: पूर्वं भवति । यथा - **आ** + गच्छति = **आगच्छति** ।

२. उपसर्गेण कदाचित् धातो: अर्थ: परिवर्तते । यथा - स्मरति - **विस्मरति**, गच्छति - **आगच्छति**, वर्तते - **परिवर्तते**

३. कदाचित् उपसर्ग: धातो: अर्थस्य पोषणं करोति । यथा - शोभते - **सुशोभते**, आरभते - **प्रारभते**, चरति - **सञ्चरति**, जायते - **सञ्जायते**

४. कदाचित् धातो: पूर्वं द्वित्रा: उपसर्गा: भवन्ति । यथा - **प्रति** + **आ** + गच्छति = **प्रत्यागच्छति** ।
निर् + **आ** + करोति = **निराकरोति** । **वि** + **अति** + तरति = **व्यतितरति** ।

५. उपसर्गकारणात् कदाचित् परस्मैपदिधातु: आत्मनेपदित्वम्, आत्मनेपदिधातु: परस्मैपदित्वं च प्राप्नोति । यथा - **वि** + जयति (परस्मैपदी) - **विजयते** (आत्मनेपदी),
प्र + तिष्ठति (परस्मैपदी) - **प्रतिष्ठते** (आत्मनेपदी)
वि + क्रीणाति (परस्मैपदी) - **विक्रीणीते** (आत्मनेपदी),
अव + तिष्ठति (परस्मैपदी) - **अवतिष्ठते** (आत्मनेपदी)
वि + रमते (आत्मनेपदी) - **विरमति** (परस्मै.)

❖ **अलम्, बहिस्, अन्तर् इत्यादय: उपसर्गतुल्या: एव भवन्ति ।** यथा -
अलम् + करोति = अलङ्करोति । बहिस् + करोति = बहिष्करोति ।
अन्तर् + भवति = अन्तर्भवति । अन्तर् + वसति = अन्तर्वसति ।

❖ **स्वी, उष्णी, सज्जी इत्यादय: अपि उपसर्गतुल्या: एव भवन्ति ।** यथा -
स्वी + करोति = स्वीकरोति । उष्णी + करोति = उष्णीकरोति ।

२. यथोदाहरणम् उपसर्गं क्रियापदं च पृथक् कृत्वा लिखत -

यथा - समधिगच्छति **सम्+अधि** गच्छति

१. विपरिवर्तते	-----------	-----------	९. पर्यवतिष्ठते	-----------	-----------
२. सम्प्रेक्षते	-----------	-----------	१०. अपाकरोति	-----------	-----------
३. अभिनिविशते	-----------		११. प्रत्याहरति	-----------	-----------
४. समाचरति	-----------		१२. प्रत्युत्तरति	-----------	-----------
५. परिसमाप्नोति	-----------	-----------	१३. व्यवहरति	-----------	-----------
६. विनिवर्तते	-----------	-----------	१४. प्रणिपतति	-----------	-----------
७. समुदाहरति	-----------	-----------	१५. समवाप्नोति	-----------	-----------
८. प्रविलीयते	-----------	-----------			

३. यथोदाहरणम् उपसर्गसहितवाक्यानि रचयत -

यथा - भक्ताः देवं **सम्पूजयन्ति**। (सम् + पूज्)

१. बालकः मातरं ----------------------। (प्र + नम्)
२. महिलाः वस्त्राणि ----------------------। (प्र + क्षाल्)
३. खगाः आकाशे ----------------------। (उद् + डय्)
४. पाण्डवाः वने ----------------------। (वि + हृ)
५. छात्रा परीक्षार्थं गृहात् ----------------------। (निर् + गम्)
६. नौके जले ----------------------। (सम् + तृ)
७. दर्पणतः सूर्यप्रकाशः ----------------------। (परा + वृत्)
८. आकाशात् पर्जन्यधाराः ----------------------। (आ + पत्)
९. कृपणाः स्वधनं न ----------------------। (परि + त्यज्)
१०. महाभारतयुद्धे धर्मः ----------------------। (वि + जय्)
११. बालकाः ज्येष्ठान् ----------------------। (अनु + सृ)
१२. यशोदा कृष्णं ----------------------। (परि + पाल्)
१३. पाण्डवाः कौरवेभ्यः द्यूते ----------------------। (परा + भू)
१४. त्रेतायुगे ईश्वरः श्रीकृष्णरूपेण ----------------------। (सम् + भू)
१५. निर्गुणः मायया सगुणत्वेन ----------------------। (वि + परि + वृत्)
१६. वीरभद्रः रौद्ररूपेण ----------------------। (अभि + नि + विश्)
१७. वयं चलच्चित्रं ----------------------। (वि + ईक्ष्)
१८. अर्जुनः धनुर्विद्याम् ----------------------। (अधि + इण्)
१९. शिशुपालः कृष्णम् ----------------------। (उप + हस्)
२०. भ्रातरौ प्रसादं ----------------------। (वि + तृ)
२१. कृष्णः गोवर्धनगिरिं ----------------------। (उद् + धृ)

२२. क्रोधेन विवेकः ------------------------ । (वि + नश्)
२३. धीरः सङ्कटात् न ------------------------ । (परा + अय्)
२४. दुर्योधनः तृतीयसेनापतिरूपेण कर्णं ---------------- । (नि + युज्)
२५. व्यासः महाभारतं ---------------------- । (वि + लिख्)
२६. कज्जलेन नेत्रे ------------------------ । (सु + शुभ्)
२७. शुकनासः चन्द्रापीडाय उपदेशं ----------------- । (प्र + ब्रू)
२८. सीता सुवर्णमृगम् ---------------------- । (अव + लोक्)
२९. आञ्जनेयः रामभजनं कदापि न ------------------ । (वि + स्मृ)
३०. तौ स्नानार्थं जलं ---------------------- । (उष्णी + कृ)
३१. शिक्षकः छात्रान् ----------------------- । (परि + गण्)
३२. छात्राः गुरून् ----------------------- । (परि + प्रच्छ्)
३३. वक्तारौ मञ्चे ----------------------- । (उप + विश्)
३४. कामात् क्रोधः ----------------------- । (अभि + जन्)
३५. गङ्गा हिमालयात् ---------------------- । (निस् + सृ)

उच्चैः पठत जानीत च -

उपसर्गसहितं क्रियापदम्	लङ्लकारस्य रूपाणि	क्तवतुप्रत्ययान्तानि रूपाणि (पुंलिङ्गे)
आगच्छति	आ + अगच्छत् = आगच्छत्	आ + गतवान् = आगतवान्
आनयति	आ + अनयत् = आनयत्	आ + नीतवान् = आनीतवान्
प्रतिवदति	प्रति + अवदत् = प्रत्यवदत्	प्रति + उदितवान् = प्रत्युदितवान्
निराकरोति	निर् + आ + अकरोत् = निराकरोत्	निर् + आ + कृतवान् = निराकृतवान्
अनुकरोति	अनु + अकरोत् = अन्वकरोत्	अनु + कृतवान् = अनुकृतवान्
प्रविशति	प्र + अविशत् = प्राविशत्	प्र + विष्टवान् = प्रविष्टवान्
विलिखति	वि + अलिखत् = व्यलिखत्	वि + लिखितवान् = विलिखितवान्
परिहरति	परि + अहरत् = पर्यहरत्	परि + हृतवान् = परिहृतवान्
अवगच्छति	अव + अगच्छत् = अवागच्छत्	अव + गतवान् = अवगतवान्
नियुङ्क्ते	नि + अयुङ्क्त = न्ययुङ्क्त	नि + युक्तवान् = नियुक्तवान्
अवलोकते	अव + अलोकत = अवालोकत	अव + लोकितवान् = अवलोकितवान्
आदत्ते	आ + अदत्त = आदत्त	आ + दत्तवान् = आदत्तवान्

उपजायते	उप + अजायत = उपाजायत	उप + जातवान् = उपजातवान्
प्रपद्यते	प्र + अपद्यत = प्रापद्यत	प्र + पन्नवान् = प्रपन्नवान्
निवर्तते	नि + अवर्तत = न्यवर्तत	नि + वृत्तवान् = निवृत्तवान्

४. उदाहरणं दृष्ट्वा रिक्तस्थानानि पूरयत -

क्रियापदानि	लङ्-रूपाणि	क्तवतुप्रत्ययान्तरूपाणि
आहरति	**आ + अहरत् = आहरत्**	**आ + हृतवान् = आहृतवान्**
विनश्यति	**वि + अनश्यत् = व्यनश्यत्**	**वि + नष्टवान् = विनष्टवान्**
प्रक्षालयति		
अनुसरति		
निवसति	**नि + अवसत् = न्यवसत्**	**नि + उषितवान् = न्युषितवान्**
परिगणयति		
निक्षिपति		
आवर्तते		
उपपद्यते		
निरीक्षते		
आरभते		
संहरते		
विक्रीणीते		
पलायते	**परा + आयत = पलायत**	**परा + अयितवान् = पलायितवान्**

लङ्लकाररूपेण सह उपसर्गस्य प्रयोगे यदि सन्धेः प्राप्तिः भवति तर्हि तत्र अवश्यमेव सन्धिः करणीयः ।

५. उपसर्गयुक्तैः लङ्लकाररूपैः / क्तवतुप्रत्ययान्तरूपैः (पुंलिङ्गे) च वाक्यानि पूरयत -

यथा - श्रीकृष्णः शङ्खनादम् **आरभत / आरब्धवान्** । (आ + रभ्)

१. श्रीकृष्णः अर्जुनं गीतां ---------------- / ----------------------- । (प्र + वद्)

२. युधिष्ठिरः व्यासस्य पादौ ---------------- / ----------------------- । (प्र + क्षाल्)

३. गीताश्रवणेन अर्जुनस्य मोहः ---------------- / ----------------------- । (वि + नश्)

४. महाभारतयुद्धसमये कलिः **प्रादुरभवत् / प्रादुर्भूतवान्।** (प्र + आ + दुर् + भू)

५. सञ्जयः दिव्यनेत्रेण महाभारतयुद्धं ---------------- / ------------------------ । (प्र + दृश्-पश्य्)

६. कालयवनः कृष्णम् ---------------- / ------------------------ । (अनु + धाव्)

७. व्यासः महाभारतं **व्यरचयत्** / ------------------------ । (वि + रच्)

८. पाण्डवाः इन्द्रप्रस्थं राजधानीं ---------------- / ------------------------ । (प्र + स्था)

९. मम भक्ताः मद्भावं **सम्प्राप्नुवन् / सम्प्राप्तवन्तः** । (सम् + प्र + आप्)

१०. भीष्मः प्राणान् ---------------- / ------------------------ । (वि + सृ)

११. दुर्वासाः कुन्त्याः सेवया **समतुष्यत् / सन्तुष्टवान्।** (सम् + तुष्)

१२. अर्जुनः राजकुमार-उत्तरं ---------------- / ------------------------ । (प्रति + ग्रह्)

१३. मुनिः सायुज्यं ---------------- / ------------------------ । (सम् + अव + आप्)

१४. मुरलीधरं कृष्णं सर्वे ---------------- / ------------------------ । (परि + चि)

१५. भीमपुत्रं घटोत्कचं कौरवाः न ---------------- / ------------------------ । (अभि + ज्ञा)

१६. भीमः जरासन्धं गदया ---------------- / ------------------------ । (प्र + हृ)

१७. व्यासः शुकमुनिं भागवतम् ---------------- / ------------------------ । (उप + दिश्)

१८. अभिमन्युः प्राणान् ---------------- / ------------------------ । (परि + त्यज्)

१९. दुर्योधनः युद्धदिनानि ---------------- / ------------------------ । (परि + गण्)

२०. दुष्यन्तः शकुन्तलां ---------------- / ------------------------ । (वि + स्मृ)

अन्यशब्दैः सह अपि उपसर्गस्य प्रयोगः भवति। यथा -

१.	वि + ऊढम्	=	व्यूढम्	१४.	वि + भ्रमः	=	विभ्रमः
२.	उप + सम् + गम्य	=	उपसङ्गम्य	१५.	वि + ज्ञानम्	=	विज्ञानम्
३.	परि + आप्तम्	=	पर्याप्तम्	१६.	निर् + अहङ्कारः	=	निरहङ्कारः
४.	नि + वर्तितुम्	=	निवर्तितुम्	१७.	सम् + ग्रहः	=	सङ्ग्रहः
५.	निस् + चितम्	=	निश्चितम्	१८.	वि + शेषतः	=	विशेषतः
६.	परि + देवना	=	परिदेवना	१९.	प्र + लयः	=	प्रलयः
७.	सु + कृतम्	=	सुकृतम्	२०.	प्र + भा	=	प्रभा
८.	दुस् + कृतम्	=	दुष्कृतम्	२१.	प्रति + अक्षम्	=	प्रत्यक्षम्
९.	प्र + आप्तिः	=	प्राप्तिः	२२.	प्र + कीर्तिः	=	प्रकीर्तिः
१०.	सम् + भावना	=	सम्भावना	२३.	नि + वासः	=	निवासः
११.	सु + अल्पम्	=	स्वल्पम्	२४.	वि + क्रमः	=	विक्रमः
१२.	सम् + प्लुतोदकम्	=	सम्प्लुतोदकम्	२५.	सम् + उद् + धर्ता	=	समुद्धर्ता
१३.	सम् + मोहः	=	सम्मोहः	२६.	उद् + आ + हरणम्	=	उदाहरणम्

स्यमन्तकमणेः कथा

अभ्यासपाठः २८

एतां कथां सावधानं पठत -

एकदा उग्रस्य पुत्रः सत्राजितः कठोरतपश्चर्यां कुरुते। तपश्चर्यया सः सूर्यदेवम् आराधितवान्। सूर्यः प्रसन्नो भूत्वा 'वरं याचताम्' इति अवदत्। वररूपेण सः एकं स्यमन्तकमणिं प्राप्तवान्। एतं मणिं जागरूकतया रक्षतु इति सूर्यः उपदिशति। मणिं स्वीकृत्य सः गृहं प्रत्यागच्छत्।

एकदा सत्राजितस्य अनुजः तं मणिं कण्ठे धृतवान् कृष्णम् उक्तवान् च यत् अद्यतनं दिनम् आखेटाय उपयुक्तम् अस्ति इति। अतः तौ आखेटाय गतवन्तौ। वने सः कृष्णात् सुदूरं गतवान्। कृष्णः तस्य बहु अन्वेषणं कृतवान्। परन्तु सः न अमिलत्। अन्ते कृष्णः राजभवनम् आगतवान्।

वने कश्चन सिंहः प्रसेनं हतवान् मणिंस्वीकृतवान् च। ततः अग्रे जाम्बवान् नामकः भल्लूकः तं सिंहं हत्वा मणिं गृह्णाति। तत्र सत्राजितः स्वभ्रातुः मृत्योः मिथ्यारोपं श्रीकृष्णस्य उपरि आरोपितवान्। सः उक्तवान् - कृष्णः एव मम भ्रातरं हतवान् मणिं च स्वीकृतवान् इति। एतं मिथ्यारोपं निवारयितुं श्रीकृष्णः पुनः वनम् अगच्छत्। तत्र सः एकस्मिन् गुहाद्वारे मृतं सिंहम् अवालोकत। प्रसेनस्य वाहनम् अपि तत्रैव आसीत्। तदा संशयेन कृष्णः गुहायाः अन्तः प्रविष्टवान्। सः तत्र अपश्यत् यत् भल्लूकस्य पुत्रः सुकुमारः मणिना सह क्रीडति इति। समीपे एव भल्लूकस्य पुत्री जाम्बवती अपि आसीत्। जाम्बवान् अपरिचितं कृष्णं दृष्ट्वा युद्धस्य कृते उद्युक्तः भवति। तयोः मध्ये अष्टाविंशतिदिनानि यावत् घोरं युद्धं प्राचलत्। अन्ते पीडितः जाम्बवान् कृष्णं शरणं गतवान्। मणिना सह जाम्बवतीमपि समर्पितवान्।

अभ्यासः

१. एतां कथां पठित्वा रिक्तस्थानानि पूरयत -

१. एकदा उग्रस्य ------------------------ कठोरतपश्चर्यां -------------------------।
२. सूर्यः प्रसन्नः भूत्वा ------------------------- इति अवदत्।
३. ----------------- दिनम् आखेटाय उपयुक्तम् अस्ति --------------------।
४. परन्तु सः न ---------------।
५. ---------------- कश्चन सिंहः ------------------ हतवान्।
६. तत्र सः ------------------------ गुहाद्वारे मृतं सिंहम् अवालोकत।
७. ---------------- वाहनम् अपि तत्रैव आसीत्।
८. भल्लूकस्य पुत्रः --------------- मणिना सह ------------------ स्म।
९. समीपे एव भल्लूकस्य --------------------- अपि आसीत्।
१०. अन्ते पीडितः ---------------------- कृष्णं ---------------------- गतवान्।

२. गृहे भवान् कुत्र किं स्थापयति इति यथोदाहरणं लिखत -

यथा - अहं **कपाटिकायां वस्त्राणि** स्थापयामि ।

१. अहं (कोशः - धनम्) -- ।
२. अहं (स्यूतः - पुस्तकम्) -- ।
३. अहं (कण्डोलः - फलानि) -- ।
४. अहं (तूणीरः - बाणाः) -- ।
५. अहं (भूमिः - कटः) -- ।
६. अहम् (आधानी - पुष्पाणि) -- ।
७. अहं (शीतकपाटिका - अन्नम्) -- ।
८. अहम् (अङ्गणम् - द्विचक्रिका) -- ।

३. अधो लिखितानि लट्लकारस्य रूपाणि यथोदाहरणं परिवर्तयत -

लट्लकारः	लोट्लकारः	लङ्लकारः
१. अर्जुनः प्रश्नं **पृच्छति** ।	अर्जुनः प्रश्नं **पृच्छतु** ।	अर्जुनः प्रश्नम् **अपृच्छत्** ।
२. कृष्णः तम् उपदिशति ।	------------------------ ।	------------------------ ।
३. सञ्जयः धृतराष्ट्रं कथयति	------------------------ ।	------------------------ ।
४. भीष्मः कौरवान् रक्षति ।	------------------------ ।	------------------------ ।
५. धृतराष्ट्रः गान्धारीं वदति ।	------------------------ ।	------------------------ ।
६. द्रौपदी सेविकाम् आदिशति ।	------------------------ ।	------------------------ ।
७. शल्यः रथं वहति ।	------------------------ ।	------------------------ ।
८. भीमः गदया प्रहरति ।	------------------------ ।	------------------------ ।
९. राजा पुत्रान् पालयति ।	------------------------ ।	------------------------ ।
१०. कविः काव्यं लिखति ।	------------------------ ।	------------------------ ।

४. अधो लिखितानां पदानां विभक्तिं वचनं च लिखत -

यथा - नागपुरजनपदे **सप्तमीविभक्तिः** **एकवचनम्**

१. धनिकस्य	-----------	-----------	७. लेखनम्	-----------	-----------
२. कुटीरे	-----------	-----------	८. भवतः	-----------	-----------
३. जीवनम्	-----------	-----------	९. ईश्वरसेवायाम्	-----------	-----------
४. देवपूजायाम्	-----------	-----------	१०. विचारः	-----------	-----------
५. एतस्मात्	-----------	-----------	११. स्वकृतेः	-----------	-----------
६. कार्यात्	-----------	-----------	१२. कारणात्	-----------	-----------

१३. वासम् ----------- ----------- १५. जीवने ----------- -----------

१४. चित्तस्य ----------- -----------

५. **अधः रक्तवर्णाङ्कितेषु पदेषु प्रयुक्तां विभक्तिं निर्दिशत -**

१. **इन्द्रियस्य** इन्द्रियस्यार्थे **रागद्वेषौ** व्यवस्थितौ। (३.३५)

२. **बीजं मां सर्वभूतानां** विद्धि पार्थ सनातनम्। (७.१०)

३. **वेदेषु यज्ञेषु तपस्सु** चैव **दानेषु** यत् **पुण्यफलं** प्रदिष्टम्।........ (८.२८)

४. **राक्षसीम् आसुरीं** चैव **प्रकृतिं मोहिनीं** श्रिताः। (९.१२)

५. यान्ति **देवव्रताः देवान् पितॄन्** यान्ति **पितृव्रताः**। (९.२५)

६. **यथोदाहरणं प्रदत्तम् अभ्यासं पूरयत -**

यथा - पाठं पठति - पाठस्य पठनं करोति।

अर्थं चिन्तयति। - --।

ग्रन्थं लिखति। - --।

वार्तां पठति। - --।

शोधसारं लिखति। - --।

रमा रोदिति। - --।

अमात्यः (मन्त्री) उद्घोषयति। - --।

चलच्चित्रम् अवलोकयति। - --।

७. **निम्नलिखितम् उदाहरणं दृष्ट्वा वाक्यानि रचयत -**

यथा - पुस्तकम् - स्यूतः - पुस्तकं स्यूते अस्ति।

कथा - ग्रन्थः - --।

मीनः - नदी - --।

किश्तवाडः - जम्मूनगरम् - --।

बरेली - उत्तरप्रदेशः - --।

सङ्कलनम् - सङ्गणकम् - --।

चण्डीगढम् - भारतम् - --।

८. यथोदाहरणं क्तवतु-प्रत्ययान्तस्य स्थाने लङ्लकारस्य क्रियापदानि लिखत -

यथा -	पठितवान्	अपठत्		
	ज्ञातवान्	-------------	स्थितवान्	-------------
	स्मृतवान्	-------------	पाययितवान्	-------------
	उक्तवान्	-------------	चलितवान्	-------------
	चिन्तितवान्	-------------	श्रुतवान्	-------------
	भूतवान्	-------------	गतवान्	-------------

९. यथोदाहरणं लङ्लकारस्य क्रियापदस्य स्थाने क्तवतु-प्रत्ययान्तानि पदानि लिखत -

यथा -	चलति	चलितवान्		
	रटति	-------------	परामृशति	-------------
	क्रीणाति	-------------	बिभेति	-------------
	सूचयति	-------------	स्नाति	-------------
	मन्त्रयते	-------------	चोरयति	-------------
	रचयति	-------------	विद्यते	-------------

१०. यथानिर्देशम् उपसर्गं क्रियापदं च योजयित्वा उपसर्गसहितं क्रियापदं लिखत -

	उपसर्गः	क्रियापदम्	उपसर्गसहितम्	उपसर्गः	क्रियापदम्	उपसर्गसहितम्
यथा -	उप	विशति	उपविशति	वि	लिखति	-------------
	अनु	वदति	-------------	अभि	जानाति	-------------
	अप	गच्छति	-------------	उत्	सृजति	-------------
	सम्	जायते	-------------	नि	क्षिपति	-------------
	वि	नश्यति	-------------	परि	पालयति	-------------
	परि	त्यजति	-------------	उद्	गच्छति	-------------

स्वाभ्यासः

१. अधः प्रदत्तानि रिक्तस्थानानि यथोदाहरणं पूरयत -

यथा - वर्धते - वृक्षः वर्धते ।

१. विद्यते - ---------------------------- ।	४. एधते - ---------------------------- ।
२. भाषते - ---------------------------- ।	५. कल्पते - ---------------------------- ।
३. मोदते - ---------------------------- ।	६. ब्रूते - ---------------------------- ।

२. अधः प्रदत्तानां क्रियापदानां साहाय्येन यथोदाहरणं क्रमशः वाक्यानि रचयत -

(पठतु, लिखतु, उपविशतु, चिन्तयतु, खादतु, रचयतु, हसतु, क्रीणातु, नमतु, स्मरतु, वदतु)

यथा - पठतु - पुस्तकं पठतु ।

१. -- । २. -- ।

३. -- ।
४. -- ।
५. -- ।
६. -- ।
७. -- ।
८. -- ।
९. -- ।
१०. -- ।
११. -- ।

३. यथोदाहरणं वाक्यानि रचयत -

यथा - (१) - बालकः पञ्चभिः मित्रैः सह क्रीडति ।

२. -- ।
३. -- ।
४. -- ।
५. -- ।
६. -- ।
७. -- ।
८. -- ।
९. -- ।
१०. -- ।
११. -- ।
१२. -- ।

४. उदाहरणं दृष्ट्वा वाक्यानि रचयत -

यथा - ग्रन्थः - आचार्यः ग्रन्थं पठति ।

१. लेखः -- ।
२. अभितः -- ।
३. कोषः -- ।
४. भगवद्गीता -- ।
५. परितः -- ।
६. साहित्यम् -- ।
७. विज्ञानम् -- ।
८. संविधानम् -- ।
९. उभयतः -- ।
१०. व्याकरणम् -- ।
११. पुराणम् -- ।

५. कोष्ठके प्रदत्तानां क्रियापदानाम् आधारेण वाक्यानि रचयत -

(रक्षति, शेते, अभिवर्धते, पश्यति, रोचते, प्रकाशते, चिनोति, शृणोति, खिद्यते, उपास्ते)

१. -- ।
२. -- ।
३. -- ।
४. -- ।
५. -- ।
६. -- ।
७. -- ।
८. -- ।
९. -- ।
१०. -- ।

६. निम्नलिखितानि पदानि आधारीकृत्य वाक्यानि रचयत -

यथा - कुत्र - भवतः पिता कुत्र कार्यं करोति ?

१. कदा - -- ?
२. प्रपरह्यः - -- ।
३. परह्यः - -- ।
४. ह्यः - -- ।
५. अद्य - -- ।
६. श्वः - -- ।
७. परश्वः - -- ।
८. प्रपरश्वः - -- ।

अहं पुण्यस्य फलं प्राप्स्यामि

लृट्लकारः २७

एतां कथाम् उच्चैः पठत -

यदा अक्रूरः कृष्णं बलरामं च आनेतुं वृन्दावनं प्रति गच्छति, तदा सः मार्गे चिन्तयति - "अद्य मम भाग्योदयः जातः । अहं पुण्यस्य फलं **प्राप्स्यामि** । श्रीकृष्णस्य बलरामस्य च दर्शनं **करिष्यामि** । तौ मां पितृव्यः इति **वदिष्यतः**, कुशलं च **प्रक्ष्यतः** । अहं कृष्णस्य वंशीं **द्रक्ष्यामि** । 'किं त्वं मत्कृते वंशीं **वादयिष्यसि**' इति एवं तं **प्रक्ष्यामि** । तदा सः वंशीं **वादयिष्यति** । अहं तस्य मधुरं वंशीनादं **श्रोष्यामि** । सः वास्तविकः ईश्वरः अस्ति उत न इति अपि **ज्ञास्यामि** । पुनः नन्दराजं कुशलं **प्रक्ष्यामि** । अन्यैः गोपैः सह **मेलिष्यामि** । वृन्दावनस्य अभूतपूर्वशोभाम् **अवलोकयिष्यामि** । गोपीभिः सह **प्रलपिष्यामि** ।

तदनन्तरं कंसस्य गुप्तमन्त्रणां कृष्णं **बोधयिष्यामि** । सः किमर्थम् आह्वयति इति अपि **कथयिष्यामि** । 'भवान् न **आगमिष्यति** चेत् अपि उत्तमम् एव' इत्यपि **वदिष्यामि** । परन्तु सः मथुरागमने उत्सुकः **भविष्यति** । तदा सः मां **वदिष्यति**- "एतं विषयं यदि माता **ज्ञास्यति** तर्हि सा गमनस्य अवसरं न **दास्यति** । अतः मातुः पुरतः एतादृशः विषयः न प्रकटनीयः" इति ।

पुनः सः मां भोजनस्य कृते **आह्वास्यति** । यदा कृष्णेन सह अहं **भोक्ष्ये**, तदा मम मनः **मोदिष्यते** । तदनन्तरं कृष्णस्य बालक्रीडां **द्रक्ष्यामि** । यदा सः नवनीतं **याचिष्यते**, तदा गोप्यः **वक्ष्यन्ति** 'भवान् नृत्यतु' इति । तदा सः **नर्तिष्यति** । मातुः भयात् सः आभरणानि **धरिष्यति** । पुनः वृन्दावने **रंस्यते** । माम् अपि वृन्दावनं **भ्रामयिष्यति** । तस्य सखीनाम् अपि अहं दर्शनं **करिष्यामि** । यदि मया सह कृष्णः मथुराम् **आगमिष्यति** तर्हि दुष्टसेवकान् **हनिष्यति** । कंसम् अपि **मारयिष्यति** ।

एतत् सर्वम् अपि अक्रूरः मार्गे अचिन्तयत् । वृन्दावनं प्राप्नोत् । कृष्णस्य दर्शनं च अकरोत् । मार्गे यथा सः अचिन्तयत् तथा एव सर्वम् प्रावर्तत ।

उच्चैः पठत अवगच्छत च -

१. युवराजः अस्ति। सः महाराजः **भविष्यति**।

२. स्वधर्मं हित्वा त्वं पापम् **अवाप्स्यसि**।

३. गुरुः प्रश्नं **प्रक्ष्यति**। शिष्यः उत्तरं **दास्यति**।

४. अर्जुनः गीतोपदेशं **श्रोष्यति**। आत्मज्ञानं **प्राप्स्यति**।

५. कर्णः तपस्यां करिष्यति। अस्त्राणि अवाप्स्यति।

६. त्वं गीतां **श्रोष्यसि**। आनन्दितः **भविष्यसि**।

७. त्वं गीतां **श्रोष्यसि**। आनन्दितः **भविष्यसि**।

८. पाण्डवपुत्राः **क्रीडिष्यन्ति**। कौरवपुत्राः **शयिष्यन्ते**।

९. सः भक्तियोगस्य महत्त्वं ज्ञास्यति। ईश्वरं प्राप्स्यति।

१०. द्रोणाचार्यः चक्रव्यूहं **रचयिष्यति**। अभिमन्युः तस्य भेदनं **करिष्यति**।

११. यदि सर्वधर्मान् परित्यज्य मां शरणं **व्रजिष्यसि**। तर्हि सर्वपापेभ्यः मुक्तः **भविष्यसि**।

अभ्यासः

१. एतेषां प्रश्नानाम् उत्तराणि लिखत -

१. पुण्यस्य फलं प्राप्स्यामि इति कः वदति ? --।

२. अक्रूरः किं श्रोष्यति ? --।

३. अक्रूरः नन्दराजं किं प्रक्ष्यति ? --।

४. कृष्णः कं मारयिष्यति ? --।

५. कृष्णः कम् आह्वास्यति ? --।

६. कृष्णः किं याचिष्यते ? --।

७. कृष्णः दुष्टसेवकान्...... ? --।

८. सखीनां दर्शनं कः करिष्यति ? --।

९. गोप्यः यदा वक्ष्यन्ति तदा कृष्णः किं करिष्यति ?

--।

अधः प्रदत्तानां धातूनां रूपाणि पठत अवगच्छत च -

गम् (परस्मैपदी)		
एकवचनम्	**द्विवचनम्**	**बहुवचनम्**
गमिष्यति	गमिष्यतः	गमिष्यन्ति
गमिष्यसि	गमिष्यथः	गमिष्यथ
गमिष्यामि	गमिष्यावः	गमिष्यामः

खाद् (परस्मैपदी)		
एकवचनम्	**द्विवचनम्**	**बहुवचनम्**
खादिष्यति	खादिष्यतः	खादिष्यन्ति
खादिष्यसि	खादिष्यथः	खादिष्यथ
खादिष्यामि	खादिष्यावः	खादिष्यामः

पा (परस्मैपदी)			अर्च् (परस्मैपदी)		
एकवचनम्	द्विवचनम्	बहुवचनम्	एकवचनम्	द्विवचनम्	बहुवचनम्
पास्यति	पास्यतः	पास्यन्ति	अर्चिष्यति	अर्चिष्यतः	अर्चिष्यन्ति
पास्यसि	पास्यथः	पास्यथ	अर्चिष्यसि	अर्चिष्यथः	अर्चिष्यथ
पास्यामि	पास्यावः	पास्यामः	अर्चिष्यामि	अर्चिष्यावः	अर्चिष्यामः

शुभ् (आत्मनेपदी)			युध् (आत्मनेपदी)		
एकवचनम्	द्विवचनम्	बहुवचनम्	एकवचनम्	द्विवचनम्	बहुवचनम्
शोभिष्यते	शोभिष्येते	शोभिष्यन्ते	योत्स्यते	योत्स्येते	योत्स्यन्ते
शोभिष्यसे	शोभिष्येथे	शोभिष्यध्वे	योत्स्यसे	योत्स्येथे	योत्स्यध्वे
शोभिष्ये	शोभिष्यावहे	शोभिष्यामहे	योत्स्ये	योत्स्यावहे	योत्स्यामहे

नी (उभयपदी)					
एकवचनम्	द्विवचनम्	बहुवचनम्	एकवचनम्	द्विवचनम्	बहुवचनम्
नेष्यति	नेष्यतः	नेष्यन्ति	नेष्यते	नेष्येते	नेष्यन्ते
नेष्यसि	नेष्यथः	नेष्यथ	नेष्यसे	नेष्येथे	नेष्यध्वे
नेष्यामि	नेष्यावः	नेष्यामः	नेष्ये	नेष्यावहे	नेष्यामहे

क्री (उभयपदी)					
एकवचनम्	द्विवचनम्	बहुवचनम्	एकवचनम्	द्विवचनम्	बहुवचनम्
क्रेष्यति	क्रेष्यतः	क्रेष्यन्ति	क्रेष्यते	क्रेष्येते	क्रेष्यन्ते
क्रेष्यसि	क्रेष्यथः	क्रेष्यथ	क्रेष्यसे	क्रेष्येथे	क्रेष्यध्वे
क्रेष्यामि	क्रेष्यावः	क्रेष्यामः	क्रेष्ये	क्रेष्यावहे	क्रेष्यामहे

कृ (उभयपदी)						
एकवचनम्	द्विवचनम्	बहुवचनम्		एकवचनम्	द्विवचनम्	बहुवचनम्
करिष्यति	करिष्यतः	करिष्यन्ति		करिष्यते	करिष्येते	करिष्यन्ते
करिष्यसि	करिष्यथः	करिष्यथ		करिष्यसे	करिष्येथे	करिष्यध्वे
करिष्यामि	करिष्यावः	करिष्यामः		करिष्ये	करिष्यावहे	करिष्यामहे

चि (उभयपदी)						
एकवचनम्	द्विवचनम्	बहुवचनम्		एकवचनम्	द्विवचनम्	बहुवचनम्
चेष्यति	चेष्यतः	चेष्यन्ति		चेष्यते	चेष्येते	चेष्यन्ते
चेष्यसि	चेष्यथः	चेष्यथ		चेष्यसे	चेष्येथे	चेष्यध्वे
चेष्यामि	चेष्यावः	चेष्यामः		चेष्ये	चेष्यावहे	चेष्यामहे

ज्ञा (उभयपदी)						
एकवचनम्	द्विवचनम्	बहुवचनम्		एकवचनम्	द्विवचनम्	बहुवचनम्
ज्ञास्यति	ज्ञास्यतः	ज्ञास्यन्ति		ज्ञास्यते	ज्ञास्येते	ज्ञास्यन्ते
ज्ञास्यसि	ज्ञास्यथः	ज्ञास्यथ		ज्ञास्यसे	ज्ञास्येथे	ज्ञास्यध्वे
ज्ञास्यामि	ज्ञास्यावः	ज्ञास्यामः		ज्ञास्ये	ज्ञास्यावहे	ज्ञास्यामहे

२. एतान् गीताश्लोकान् उच्चैः पठत लृट्लकाररूपाणि रिक्तस्थानेषु लिखत -

यज्ज्ञात्वा न पुनर्मोहमेवं **यास्यसि** पाण्डव ।
येन भूतान्यशेषेण **द्रक्ष्यस्यात्**मन्यथो मयि ॥ (४.३५) (द्रक्ष्यसि)

इदमद्य मया लब्धमिमं **प्राप्स्ये** मनोरथम् ।
इदमस्तीदमपि मे **भविष्यति** पुनर्धनम् ॥ (१६.१३)

आढ्योऽभिजनवानस्मि कोऽन्योऽस्ति सदृशो मया ।
यक्ष्ये दास्यामि मोदिष्य इत्यज्ञानविमोहिताः ॥ (१६.१५) (मोदिष्ये)
य इमं परमं गुह्यं मद्भक्तेष्वभिधा**स्यति** ।
भक्तिं मयि परां कृत्वा मामे**वैष्यत्य**संशयः । (१८.६८) (एष्यति)

१. ------------------------------	५. ------------------------------
२. ------------------------------	६. ------------------------------
३. ------------------------------	७. ------------------------------
४. ------------------------------	८. ------------------------------

कानिचन विशेषक्रियापदानि

१. जि - जेष्यति	१४. युज् - योक्ष्यति / योक्ष्यते
२. इ - एष्यति	१५. रुद् - रोदिष्यति
३. श्रु - श्रोष्यति	१६. आ + नी - आनेष्यति / आनेष्यते
४. जागृ - जागरिष्यति	१७. विद् - वेत्स्यति
५. ध्मा - ध्मास्यति	१८. स्मृ - स्मरिष्यति
६. तॄ - तरिष्यति	१९. इष् - एषिष्यति
७. आ + ह्वे - आह्वास्यति / आह्वास्यते	२०. भुज् - भोक्ष्यते / भोक्ष्यति
८. मृज् - मार्क्ष्यति / मार्जिष्यति	२१. शुच् - शोचिष्यति
९. मन् - मंस्यते	२२. मिल - मेलिष्यति
१०. रम् - रंस्यते	२३. लिख् - लेखिष्यति
११. दृश् - द्रक्ष्यति	२४. प्रच्छ् - प्रक्ष्यति
१२. नृत् - नर्तिष्यति / नर्त्स्यति	२५. प्र + स्था - प्रस्थास्यति
१३. नि + वस् - निवत्स्यति	२६. उद् + स्था - उत्थास्यति

३. यथोदाहरणं भविष्यत्कालरूपाणि लिखत -

यथा - जागृ (प्र.पु.)	जागरिष्यति	जागरिष्यतः	जागरिष्यन्ति
१. मन् (प्र.पु.)	मंस्यते	------------------	------------------
२. स्मृ (म.पु.)	------------------	स्मरिष्यथः	------------------
३. खेल् (उ.पु.)	------------------	------------------	खेलिष्यामः
४. चल् (उ.पु.)	चलिष्यामि	------------------	------------------
५. दृश् (प्र.पु.)	------------------	द्रक्ष्यतः	------------------
६. मिल् (प्र.पु.)	------------------	------------------	मेलिष्यन्ति
७. विद् (म.पु.)	वेत्स्यसि	------------------	------------------
८. ध्मा (म.पु.)	------------------	ध्मास्यथः	------------------
९. फल् (म.पु.)	------------------	------------------	फलिष्यथ
१०. मृज् (उ.पु.)	मार्जिष्यामि	------------------	------------------
११. वद् (उ.पु.)	------------------	------------------	वदिष्यामः
१२. तॄ (प्र.पु.)	------------------	------------------	तरिष्यन्ति

१३. रुद् (प्र.पु.)	-------------------	रोदिष्यतः	-------------------
१४. श्रु (प्र.पु.)	श्रोष्यति	-------------------	-------------------
१५. दा (म.पु.)	दास्यसि	-------------------	-------------------
१६. प्रच्छ् (म.पु.)	-------------------	प्रक्ष्यथः	-------------------
१७. इष् (म.पु.)	-------------------	-------------------	एषिष्यथ
१८. शक् (उ.पु.)	-------------------	-------------------	शक्ष्यामः
१९. लभ् (उ.पु.)	लप्स्ये	-------------------	-------------------
२०. नृत् (उ.पु.)	-------------------	नर्तिष्यावः	-------------------
२१. हु (प्र.पु.)	-------------------	-------------------	होष्यन्ति
२२. मुद् (प्र.पु.)	-------------------	मोदिष्येते	-------------------
२३. युध् (प्र.पु.)	योत्स्यते	-------------------	-------------------
२४. युज् (उ.पु.)	योक्ष्यामि	-------------------	योक्ष्यामः
२५. रुध् (उ.पु.)	-------------------	रोत्स्यावः	-------------------
२६. वस् (म.पु.)	-------------------	-------------------	वत्स्यथ
२७. लज्ज् (प्र.पु.)	लज्जिष्यते	-------------------	-------------------
२८. क्रीड् (म.पु.)	-------------------	क्रीडिष्यथः	-------------------
२९. उप् विश् (उ.पु.)	-------------------	-------------------	उपवेक्ष्यामः
३०. त्यज् (म.पु.)	त्यक्ष्यसि	-------------------	-------------------
३१. मृ (प्र.पु.)	-------------------	-------------------	मरिष्यन्ति
३२. हन् (उ.पु.)	-------------------	हनिष्यावः	-------------------
३३. मुच् (म.पु.)	-------------------	-------------------	मोक्ष्यथ
३४. वन्द् (उ.पु.)	वन्दिष्ये	-------------------	-------------------
३५. हृष् (प्र.पु.)	-------------------	हर्षिष्यतः	-------------------
३६. धृ (म.पु.)	-------------------	-------------------	धरिष्यथ
३७. निन्द् (उ.पु.)	-------------------	निन्दिष्यावः	-------------------
३८. यज् (उ.पु.)	-------------------	-------------------	यक्ष्यन्ति
३९. सृज् (प्र.पु.)	स्रक्ष्यति	-------------------	-------------------
४०. सद् (प्र.पु.)	-------------------	सत्स्यतः	-------------------
४१. आ+रभ् (म.पु.)	-------------------	-------------------	आरप्स्यध्वे
४२. स्पर्ध् (म.पु.)	स्पर्धिष्यसे	-------------------	-------------------
४३. वप् (उ.पु.)	-------------------	वप्स्यावः	-------------------

४. यथोदाहरणं वचनं परिवर्त्य वाक्यानि लिखत -

यथा - सः महाभारतं पठिष्यति। ते महाभारतं पठिष्यन्ति।

१. त्वं मुखानि दृष्ट्वा तप्स्यसि। -- ।

२. अहं कौरवान् द्रक्ष्यामि। -- ।

३. पाण्डवः योत्स्यते। -- ।

४. भ्राता जलं पास्यति। -- ।

५. अहं विजयं प्राप्स्यामि। -- ।

६. अहं गीतां श्रोष्यामि। -- ।

७. त्वं सत्यं वदिष्यसि। -- ।

८. अहं भोजनं पक्ष्यामि। -- ।

९. अहं युद्धं करिष्यामि। -- ।

१०. अहं फलं खादिष्यामि। -- ।

५. यथोदाहरणं लट्लकारस्य वाक्यानि लृट्लकारे परिवर्तयत -

यथा - अर्जुनः भीष्मं प्रणमति। अर्जुनः भीष्मं प्रणंस्यति।

१. कृष्णः गीतां कथयति। -- ।

२. सञ्जयः युद्धं पश्यति। -- ।

३. विदुरः सदुपदेशं करोति। -- ।

४. धृतराष्ट्रः बदरीवनं गच्छति। -- ।

५. सः गान्धारीं नयति। -- ।

६. भीमः भोजनं पचति। -- ।

७. दुर्वासाः ऋषिः आगच्छति। -- ।

८. भीमः ऋषिम् आह्वयति। -- ।

९. नकुलसहदेवौ नमतः। -- ।

१०. त्वं स्वागतं करोषि। -- ।

११. युवां गीतां पठथः। -- ।

१२. यूयं क्रीडथ। -- ।

१३. अहम् अग्नौ जुहोमि। -- ।

१४. आवां मन्त्रान् स्मरावः। -- ।

१५. वयं वृन्दावनं चलामः। -- ।

१६. नन्दोत्सवे जनाः नृत्यन्ति। -- ।

१७. गोप्यः बाललीलां दृष्ट्वा हसन्ति। -- ।

१८. कृष्णः फलानि क्रीणाति। -- ।

१९. कृष्णस्य मथुरागमनसमये गोप्यः रुदन्ति। ---।

२०. रजकस्य वधं दृष्ट्वा अन्ये धावन्ति। ---।

२१. सौचिकः वस्त्रं सीव्यति। ---।

२२. मालाकारः गोपेभ्यः मालाः ददाति। ---।

२३. नागरिकाः कृष्णं पूजयन्ति। ---।

२४. नन्दराजः महाराजाय उपहारं ददाति। ---।

२५. कृष्णः मुष्टिकस्य प्राणान् हरति। ---।

२६. कंसः भीतः भवति। ---।

२७. कृष्णबलरामौ दैत्यान् पृच्छतः। ---।

२८. कृष्णः कंसं गृह्णाति। ---।

२९. रक्षकान् कृष्णः त्यजति। ---।

३०. कंसस्य वधं दृष्ट्वा जनाः मोदन्ते। ---।

३१. अवन्तिकां गत्वा कृष्णः अधीते। ------------------------------------ अध्येष्यते।

३२. कृष्णः मृतपुत्रम् आनेतुं शक्नोति। ---।

३३. कृष्णः मम मित्रम् अस्ति। ------------------------------------ भविष्यति।

३४. अहं मथुरां प्रति व्रजामि। ---।

६. मञ्जूषातः उचितं क्रियापदं चित्वा वाक्यानि पूरयत -

स्प्रक्ष्यन्ति, रोदिष्यति, ग्रहीष्यति, त्यक्ष्यन्ति, उपवेक्ष्यति, प्रक्ष्यन्ति,
श्रोष्यति, शक्ष्यन्ति, आगमिष्यामि, मेलिष्यति

१. पाण्डवाः गुरुं प्रश्नं ------------------------।

२. कृष्णः विदुरेण सह ------------------------------।

३. अर्जुनः श्वः शुभसूचनां --------------------।

४. कौरवाः मरिष्यन्ति चेत् गान्धारी -----------------।

५. पाण्डवाः कौरवान् पराजेतुं ---------------।

६. कृष्णः विदुरं वदति तव गृहम् एव ------------ इति।

७. युधिष्ठिरः श्वः राजसिंहासने ---------------।

८. कौरवाः युद्धेन विना राज्यं न --------------------।

९. क्रीडायां बालाः कृष्णं --------------------।

१०. भीमः जयद्रथं ---------------------------------।

७. यथोदाहरणं वाक्येषु विद्यमानानि लृट्लकारस्य रूपाणि चित्वा लिखत -

यथा - १.	**इषुभिः प्रतियोत्स्यामि पूजार्हावरिसूदन।**	**(२.४)**	**प्रतियोत्स्यामि**
२.	अथ चेत्त्वमिमं धर्म्यं सङ्ग्रामं न करिष्यसि।	(२.३३)	--------------------------
३.	ततः स्वधर्मं कीर्तिं च हित्वा पापमवाप्स्यसि।	(२.३३)	--------------------------
४.	अकीर्तिं चापि भूतानि कथयिष्यन्ति तेऽव्ययाम्।	(२.३४)	--------------------------
५.	भयाद्रणादुपरतं मंस्यन्ते त्वां महारथाः।	(२.३५)	--------------------------

६. अवाच्यवादांश्च बहून्वदिष्यन्ति तवाहिताः । (२.३६) ----------------------------

७. हतो वा प्राप्स्यसि स्वर्गं जित्वा वा भोक्ष्यसे महीम् । (२.३७) ------------- -------------

८. ततो युद्धाय युज्यस्व नैवं पापमवाप्स्यसि । (२.३८) ----------------------------

९. बुद्ध्या युक्तो यया पार्थ कर्मबन्धं प्रहास्यसि । (२.३९) ----------------------------

१०. प्रकृतिं यान्ति भूतानि निग्रहः किं करिष्यति । (३.३३) ----------------------------

८. यथोदाहरणम् उत्तरवाक्यानि पठत प्रश्नवाक्यानि लिखत च -

कस्मिंश्चित् विद्यालये सोमवासरात् कार्यक्रमः भविष्यति । तत्र कश्चन छात्रः स्वमित्रं पृच्छति -'कस्मिन् दिवसे किं भविष्यति इति माम् अपि बोधयतु' इति ।

यथा - सोमवासरे किं भविष्यति ?

सोमवासरे विदुषां महतीचर्चा भविष्यति ।

१. -- ?

मङ्गलवासरे पत्रकारः आगमिष्यति ।

२. -- ?

बुधवासरे पण्डिताः संस्कृतेन संस्कृतम् इत्यस्मिन् विषये चर्चिष्यन्ति ।

३. -- ?

गुरुवासरे बुधाः गीताविषये उद्बोधयिष्यन्ति ।

४. -- ?

सर्वेऽपि छात्राः शुक्रवासरे शङ्कराचार्यपादानाम् अध्यात्मवचनानि श्रोष्यन्ति ।

५. -- ?

शनिवासरे राष्ट्रपतेः समागमनं भविष्यति ।

६. -- ?

रविवासरे उत्तमेभ्यः छात्रेभ्यः पारितोषिकाणि प्रदास्यन्ते ।

स्वाभ्यासः

१. यथोदाहरणम् 'अहम्' इति कर्तारं योजयित्वा प्रश्नस्य उत्तरं लिखत -

"भवान् / भवती ____________"

१. कदा आगमिष्यति ? **अहं शनिवासरे आगमिष्यामि ।**

२. किम् आनेष्यति ? --- ।

३. वस्तूनि कुत्र त्यक्ष्यति ? --- ।

४. किं धृत्वा गमिष्यति ? --- ।

५. जन्तुशालां द्रक्ष्यति किम् ? -- ।

६. कुत्र स्थास्यति ? -- ।

७. वस्त्राणि कदा क्रेष्यति ? -- ।

८. कदा कृष्णम् अर्चिष्यति ? -- ।

९. क्रीडाम् अवलोकिष्यते किम् ? -- ।

१०. नारिकेलजलं पास्यति किम् ? -- ।

२. गीतायाः अधस्तनश्लोकेषु लृट्लकाररूपाणि अधोरेखया अङ्कयत उच्चैः पठत च -

१. एवमुक्त्वा हृषीकेशं गुडाकेशः परन्तप ।
न योत्स्य इति गोविन्दमुक्त्वा तूष्णीं बभूव ह ॥ (२.९)

२. न त्वेवाहं जातु नासं न त्वं नेमे जनाधिपाः ।
न चैव न भविष्यामः सर्वे वयमतः परम् ॥ (२.१२)

३. श्रुतिविप्रतिपन्ना ते यदा स्थास्यति निश्चला ।
समाधावचला बुद्धिस्तदा योगमवाप्स्यसि ॥ (२.५३)

४. देवान्भावयतानेन ते देवा भावयन्तु वः ।
परस्परं भावयन्तः श्रेयः परमवाप्स्यथ ॥ (३.११)

५. इष्टान्भोगान्हि वो देवा दास्यन्ते यज्ञभाविताः ।
तैर्दत्तानप्रदायैभ्यो यो भुङ्क्ते स्तेन एव सः ॥ (३.१२)

६. किं कर्म किमकर्मेति कवयोऽप्यत्र मोहिताः ।
तत्ते कर्म प्रवक्ष्यामि यज्ज्ञात्वा मोक्ष्यसेऽशुभात् ॥ (४.१६)

७. एवं बहुविधा यज्ञा वितता ब्रह्मणो मुखे ।
कर्मजान्विद्धि तान्सर्वानेवं ज्ञात्वा विमोक्ष्यसे ॥ (४.३२)

८. मय्यासक्तमनाः पार्थ योगं युञ्जन्मदाश्रयः ।
असंशयं समग्रं मां यथा ज्ञास्यसि तच्छृणु ॥ (७.१)

९. ज्ञानं तेऽहं सविज्ञानमिदं वक्ष्याम्यशेषतः ।
यज्ज्ञात्वा नेह भूयोऽन्यज्ज्ञातव्यमवशिष्यते ॥ (७.२)

१०. शुभाशुभफलैरेवं मोक्ष्यसे कर्मबन्धनैः ।
संन्यासयोगयुक्तात्मा विमुक्तो मामुपैष्यसि ॥ (९.२८)

११. असौ मया हतः शत्रुर्हनिष्ये चापरानपि ।
ईश्वरोऽहमहं भोगी सिद्धोऽहं बलवान्सुखी ॥ (१६.१४)

बलरामस्य तीर्थयात्रा...

पञ्चमीविभक्तिः, 'तः-पर्यन्तम्'

२८

एतां कथाम् उच्चैः पठत -



कौरवपाण्डवयोः युद्धे बलरामः कस्य अपि दलस्य पक्षं न इच्छति स्म । **एतस्मात् कारणात्** सः तीर्थदर्शनार्थं **द्वारकायाः** बहिः गतवान् । प्रथमं सः **द्वारकायाः** प्रभासक्षेत्रं गतवान् । तत्र सः स्नानं तर्पणं च कृतवान् । **प्रभासक्षेत्रात्** सरस्वती-उद्गमस्थानं प्रति गतवान् । मार्गे सः प्रथमं **प्रथूदकक्षेत्रं** गतवान् । प्रथूदकक्षेत्रात् **बिन्दुसरोवरं च** अगच्छत् । बिन्दुसरोवरात् सः त्रितकूपं प्रति गतवान् । पुनः **त्रितकूपात्** सुदर्शनक्षेत्रं प्रति आगतवान् । अनन्तरं सः **तस्मात् क्षेत्रात्** विशालक्षेत्रं गतवान् । विशालक्षेत्रे सः स्नानादिकं समापितवान् । चक्रतीर्थे पूर्ववाहिनीं सरस्वतीं नतवान् । तदनन्तरं बलरामः **सरस्वत्याः** गङ्गायमुनयोः प्रमुखतीर्थानां दर्शनं कृत्वा नैमिषारण्यक्षेत्रं गतवान् ।

तत्र ऋषीणां सत्सङ्गः प्रचलति स्म । सर्वे अपि ऋषयः **तीर्थयात्रायाः** आगतस्य बलरामस्य स्वागतं कृतवन्तः । तत्र बलरामः उन्नते आसने उपविष्टं व्यासशिष्यं दृष्टवान् । सः चिन्तितवान् - 'यद्यपि एषः पण्डितः तथापि **ऋषिभ्यः** उन्नते आसने उपवेशनं तु नैव उत्तमम् । प्रायः एषः आत्मानं ज्येष्ठं मन्यते । अद्य एतस्य अभिमानयुक्तं शरीरम् एव नाशयामि । **एतादृशेभ्यः दुष्टेभ्यः** भूमिः मुक्ता भवतु' इति । बलरामः **नियतिवशात् काष्ठपात्रात्** कुशां क्षिप्तवान् । तया कुशया व्यासशिष्यः मृतवान् । सर्वत्र एकः एव कोलाहलः अभवत् । ऋषयः उक्तवन्तः - "हा हा प्रभो ! **एतस्मात्** तु वयं कथां शृण्मः स्म । सत्रसमाप्तिपर्यन्तम् एतस्य निमित्तं वयं **रोगपीडादिभ्यः** रहितं जीवनं सङ्कल्पितवन्तः । परन्तु एषः तु अधर्मः अभवत् । तीर्थाटन-समये भवान् ब्रह्महत्यां कृतवान् ।

बलरामः उक्तवान्- "**एतस्मात् पापात्** अहं दण्डनीयः अस्मि । भवन्तः वदन्तु । अहं दण्डस्य पालनं करोमि" इति । ऋषयः उक्तवन्तः- "अस्माकं वाणी अपि सत्या भवतु, भवतः पराक्रमः अपि सत्यं भवतु तथा किमपि करोतु । बलरामः अवदत् - "एतस्य पुत्रः **एतस्मात्** अग्रे सर्वं कथयति । मम **अनुग्रहात् सः** विज्ञाता भविष्यति । इदानीम् **अस्मात् पापात्** अहं कथं मुक्तः भवामि एतदर्थं कठोरं प्रायश्चित्तं वदन्तु ।

ऋषयः उक्तवन्तः - "अत्र प्रत्येकस्मिन् सत्रे बल्वलनामकः दानवः आगच्छति । **तस्मात् दानवात्** अस्माकम् अत्यन्तं भयं भवति । यदि भवान् तस्य हननं करोति तर्हि अस्माकं महती सेवा भवति । तदनन्तरं भवान् एकवर्षं यावत् भारतस्य प्रत्येकं तीर्थं गत्वा स्नानं करोतु । तत्र **देवेभ्यः** वरं प्राप्नोतु । तेन भवान् शुद्धः भविष्यति । बलरामः एतद् अङ्गीकृतवान् ।

अस्यां कथायां वर्णाङ्कितानि पदानि पञ्चमीविभक्त्यन्तानि सन्ति ।

अभ्यासः

१. यथोदाहरणं तालिकायां पञ्चमीविभक्त्यन्तानि रूपाणि लिखत -

पदम्	एकवचनम्	द्विवचनम्	बहुवचनम्
यथा - पाण्डवः	**पाण्डवात्**	**पाण्डवाभ्याम्**	**पाण्डवेभ्यः**
क्षत्रियः			
गजेन्द्रः			
यज्ञः			
शाखा	**शाखायाः**	**शाखाभ्याम्**	**शाखाभ्यः**
सेना			
अम्बा			
गोपिका			
मुनिः	**मुनेः**	**मुनिभ्याम्**	**मुनिभ्यः**
ऋषिः			
गिरिः			
हरिः			
नदी	**नद्याः**	**नदीभ्याम्**	**नदीभ्यः**
मही			
स्त्री	स्त्रियाः		
वाणी			
साधुः	**साधोः**	**साधुभ्याम्**	**साधुभ्यः**
कुरुः			
गुरुः			

शम्भुः			
चमूः	चम्वाः	चमूभ्याम्	चमूभ्यः
वधूः			
पिता	पितुः	पितृभ्याम्	पितृभ्यः
ज्ञाता			
धाता			
नेता			
वारि	वारिणः	वारिभ्याम्	वारिभ्यः
ज्ञानम्	ज्ञानात्	ज्ञानाभ्याम्	ज्ञानेभ्यः
दानम्			
क्षेत्रम्			
रूपम्			

२. यथोदाहरणं कोष्ठके प्रदत्तानां पदानां पञ्चमीविभक्त्यन्तैः रूपैः रिक्तस्थानानि पूरयत -

यथा - कुन्त्याः हस्ताभ्यां **भीमः** पतति। (हस्तौ)

१. नकुलः ------------------------ अस्त्राणि अवतारयति। (वृक्षः)

२. दुर्योधनः -------------------------- संरक्षणं प्राप्नोति। (भीष्मः)

३. पाण्डवाः -------------------------------- इन्द्रप्रस्थं गच्छन्ति। (हस्तिनापुरम्)

४. कुन्ती ------------------------- पुत्रान् प्राप्तवती। (देवाः)

५. अर्जुनः ------------------------- पाशुपतास्त्रं प्राप्तवान्। (शिवः)

६. द्रुपदपुत्रः -------------------------- ज्ञानं प्राप्तवान्। (द्रोणः)

७. ----------------------- क्रोधः जायते। (कामः)

८. कृष्णः ------------------------------ मथुरां गच्छति। (वृन्दावनम्)

९. क्षीणपुण्याः देवाः -------------------------- भ्रष्टाः भवन्ति। (स्वर्गः)

१०. भगवद्गीता स्वयं पद्मनाभस्य -------------------------------- विनिःसृता। (मुखपद्मम्)

११. गुरुः शिष्यम् अज्ञानरूपात् ------------------------------ त्रायते। (अन्धकारः)

१२. द्रौपदी --------------------- प्रकटिता अभवत्। (अग्निः)

१३. अभिषेकार्थं सप्तभ्यः ---------------------- जलम् आनयन्तु। (नद्यः)

१४. सैनिकाः -------------------------------- आगच्छन्ति। (युद्धक्षेत्रम्)

१५. ---------------------- बिल्वपत्राणि शिवलिङ्गस्य उपरि पतन्ति। (वृक्षाः)

३. कः कस्मात् ज्ञानं प्राप्तवान् इति मञ्जूषायां लिखितम् अस्ति । तदाधारेण यथोदाहरणं वाक्यानि रचयत -

यथा - श्रीकृष्णः सान्दीपनेः ज्ञानं प्राप्तवान् ।

१. -- ।

२. -- ।

३. -- ।

४. -- ।

५. -- ।

६. -- ।

७. -- ।

८. -- ।

९. -- ।

श्रीकृष्णः	**सान्दीपनिः**
अर्जुनः	द्रोणः
कर्णः	परशुरामः
एकलव्यः	द्रोणः
अभिमन्युः	श्रीकृष्णः
विदुरः	भीष्मः
भीष्मः	परशुरामः
द्रुपदपुत्रः	द्रोणः
दुर्योधनः	बलरामः
धृतराष्ट्रः	भीष्मः

पञ्चमीविभक्तिः (उपपदम्)

एतत् सम्भाषणम् उच्चैः पठत -

रीतेशः मित्र उमेश ! गतरविवासरे भवान् कुत्र गतवान् आसीत् । अहं **नववादनात् आरभ्य** दशवादनपर्यन्तं भवतः गृहे आसम् ।

उमेशः गतरविवासरे अहं पित्रा सह भ्रमणाय समुद्रतटं गतवान् आसम् ।

रीतेशः एवं वा ? तत्र भवान् नौकाविहारं कृतवान् न वा ?

उमेशः न भोः ! पूर्वं तु अहं नौकाम् आरुढवान्, परन्तु उन्नतात् **तरङ्गात् भयम्** अभवत् । अतः **नौकायाः बहिः** आगतवान् । दुर्योगात् तस्मिन् एव क्षणे एका नौका जले मग्ना अभवत् । येन केन प्रकारेण पञ्चजनाः तीर्त्वा **समुद्रात् बहिः** आगताः । एकं बालकं नाविकः केनापि प्रकारेण **जलात् रक्षितवान्** ।

रीतेशः पुनः किम् अभवत् ?

उमेशः तदा एकवादनात् द्विवादनपर्यन्तं तटस्थिते उद्याने भ्रमणम् अभवत् । **आगमनात् पूर्वम्** अहं पित्रा सह भोजनं कृतवान् । पुनः द्विवादने **उद्यानात् बहिः** आगत्य गृहस्य आगमनाय यानं प्राप्तवान् । पञ्चवादने गृहं प्राप्तवान् । ततः **पञ्चवादनात् परम्** अहं गृहे एव आसम् ।

> परम्, पूर्वम्, भयम्, बहिः, रक्षति, त्रायते इति एतेषां प्रयोगे पञ्चमीविभक्तिः भवति ।

४. यथोदाहरणं मञ्जूषातः उचितानि पदानि चित्वा रिक्तस्थानानि पूरयत -

रक्षन्ति, बहिः, परम्, पूर्वम्, त्रायते, भीतः

यथा - ग्रामात् **पूर्वं** नदी प्रवहति।

१. वसन्तात् ------------------- ग्रीष्मः भवति।

२. राजपुरुषाः चोरेभ्यः ------------------------।

३. कंसः कृष्णात् --------------------- आसीत्।

४. ग्रामात् --------------------- मन्दिरम् अस्ति।

५. गुरुः पापात् ------------------------------।

५. कोष्ठकस्य साहाय्येन गीताश्लोकान् परिशील्य रिक्तस्थानानि पूरयत -

१. गाण्डीवं -- स्रंसते। (१.३०)

२. अस्माभिः अस्मात् ------------------------ निवर्तितुं कथं न ज्ञेयम्? (१.३९)

३. -------------------------------------- कुलस्त्रियः प्रदुष्यन्ति। (१.४१)

४. क्षत्रियस्य हि धर्म्यात् ---------------------- अन्यत् श्रेयः न विद्यते। (२.३१)

५. सम्भावितस्य च अकीर्तिः ------------------------ अतिरिच्यते। (२.३४)

६. अस्य धर्मस्य स्वल्पमपि महतः ------------------------ त्रायते। (२.४०)

७. इन्द्रियाणि ---------------------------- संहरते तस्य प्रज्ञा प्रतिष्ठिता। (२.५८)

८. पुरुषः कर्मणाम् -------------------------- नैष्कर्म्यं न अश्नुते। (३.४)

९. स्वनुष्ठितात् ------------------------- विगुणः स्वधर्मः श्रेयान्। (३.३५)

१०. द्रव्यमयात् ------------------------ ज्ञानयज्ञः श्रेयान्। (४.३३)

११. ------------------------------ कर्मयोगः विशिष्यते। (५.२)

१२. निर्द्वन्द्वः सः ------------------------ सुखं प्रमुच्यते। (५.३)

१३. --------------------------- एतस्य स्थिरां स्थितिम् अहं न पश्यामि। (६.३३)

१४. अहरागमे ------------------------- सर्वाः व्यक्तयः प्रभवन्ति। (८.१८)

१५. मया ---------------------------- तेजोमयं विश्वं दर्शितम्। (११.४७)

१६. तत् -------------------------------------- विद्धि। (१३.२६)

१७. --------------------------------------- ज्ञानं सञ्जायते। (१४.१७)

१८. वायुः --------------------------- गन्धान् इव एतानि गृहीत्वा संयाति। (१५.८)

१९. अहं क्षरम् अतीतः -------------------------- अपि च उत्तमः। (१५.१८)

२०. ---------------------- यत् कर्म आरभ्यते तत् तामसम् उच्यते। (१८.२५)

सम्यक् पठत अवगच्छत च -

अद्य चतुर्थः दिनाङ्कः अस्ति । **पञ्चमदिनाङ्कतः** विद्यालये एका पुस्तकमेला प्रचलिष्यति । इयं मेला **पञ्चमदिनाङ्कतः** आरभ्य दशमदिनाङ्कपर्यन्तं चलिष्यति । इयं प्रतिदिनं **सप्तवादनतः** आरभ्य सायं षड्वादनपर्यन्तं प्रचलति । मम विद्यालये इयं मेला **विगतपञ्चवर्षतः** प्रतिवर्षम् आयोज्यते । पूर्वाह्णे **नववादनतः** मेलायां जनानां सम्मर्दः अधिकः भवति । अस्यां मेलायां **बालवर्गतः** आरभ्य उच्चवर्गीयाः प्रायः सर्वे शिक्षाप्रेमिणः आगच्छन्ति । **आरम्भतः** अन्तपर्यन्तम् इयं मेला सम्यक् सम्पादिता भवति ।

अवधेयम्

पञ्चम्यन्तेभ्यः शब्देभ्यः **तसिल्-प्रत्ययः** भवति । तसिल्-प्रत्यये '**तः**' शिष्यते ।
यथा - विद्यालय + तसिल् = विद्यालयतः
विद्यालयात् - विद्यालयतः, ग्रामात् - ग्रामतः, वृन्दावनात् - वृन्दावनतः
छात्रः विद्यालयात् आगच्छति । छात्रः विद्यालयतः आगच्छति ।

६. यथोदाहरणं वर्णाङ्कितेन पदेन सह तसिल्-प्रत्ययं योजयित्वा वाक्यानि परिवर्तयत -

१.	सैनिकाः **युद्धभूमेः** आगच्छन्ति ।	सैनिकाः **युद्धभूमितः** आगच्छन्ति ।
२.	पाण्डवाः **राजभवनात्** गच्छन्ति ।	पाण्डवाः ------------------------- गच्छन्ति ।
३.	सः **पाटलिपुत्रात्** आगच्छति ।	सः ----------------------------- आगच्छति ।
४.	रामः **अयोध्यायाः** वनं गच्छति ।	रामः -------------------------- वनं गच्छति ।
५.	**हिमालयात्** नद्यः निर्गच्छन्ति ।	-------------------------- नद्यः निर्गच्छन्ति ।
६.	**समुद्रात्** रत्नानि उद्भवन्ति ।	-------------------------- रत्नानि उद्भवन्ति ।
७.	**यज्ञात्** पर्जन्यः भवति ।	---------------------------- पर्जन्यः भवति ।
८.	**क्रोधात्** सम्मोहः भवति ।	--------------------------- सम्मोहः भवति ।
९.	**बुद्धिनाशात्** जनाः प्रणश्यन्ति ।	-------------------------- जनाः प्रणश्यन्ति ।
१०.	**पर्जन्यात्** अन्नानि भवन्ति ।	-------------------------- अन्नानि भवन्ति ।

अवधेयम्

अद्य सोमवासरः अस्ति । **अद्य आरभ्य** विद्यालये संस्कृतसम्भाषणशिविरं प्रचलिष्यति । इदं शिबिरं **सोमवासरात् आरभ्य** शनिवासरपर्यन्तं प्रचलिष्यति । **सोमवासरतः आरभ्य** शिबिरसमाप्तिपर्यन्तं सर्वे संस्कृतभाषया एव सम्भाषणं करिष्यन्ति ।

एतेषु वाक्येषु **'आरभ्य'** इत्यस्य प्रयोगं सम्यक् पठत । **'आरभ्य'** इति शब्दः प्रायः पञ्चम्यन्तशब्देन सह अथवा तसिल् (तः) प्रत्ययान्तशब्देन सह प्रयुज्यते ।
यथा - चैत्रमासात् आरभ्य .... । चैत्रमासतः आरभ्य .... ।

७. **यथोदाहरणं कोष्ठके दत्तैः पदैः सह पञ्चमीविभक्तिं तथा च तसिल्-प्रत्ययं संयोज्य 'आरभ्य' इत्यनेन सह वाक्यानि पूरयत -**

यथा - **रविवासरात् आरभ्य** परीक्षा भविष्यति। (रविवासरः)

रविवासरतः आरभ्य परीक्षा भविष्यति।

१. ----------------- ------------------- रामलीला प्रचलिष्यति। (मङ्गलवासरः)

----------------- ------------------- रामलीला प्रचलिष्यति। (मङ्गलवासरः)

२. ---------------- -------------------- कन्याकुमारीपर्यन्तं भारतवर्षम्। (कश्मीरः)

---------------- -------------------- कन्याकुमारीपर्यन्तं भारतवर्षम्। (कश्मीरः)

३. ---------------- ------------------- गङ्गा बङ्गोपसागरपर्यन्तं विस्तृता। (हिमालयः)

--------------- ------------------- गङ्गा बङ्गोपसागरपर्यन्तं विस्तृता। (हिमालयः)

४. ----------------- ------------------ अयं मार्गः नगरं यावत् गच्छति। (ग्रामः)

---------------- ------------------ अयं मार्गः नगरं यावत् गच्छति। (ग्रामः)

५. ------------------ --------------- मन्दिरं यावत् इदम् उद्यानम्। (गृहम्)

------------------ --------------- मन्दिरं यावत् इदम् उद्यानम्। (गृहम्)

सर्वनामपदानां पञ्चमीविभक्त्यन्तरूपाणि -

प्रातिपदिकम्		एकवचनम्	द्विवचनम्	बहुवचनम्
तद्	पुंलिङ्गे नपुंसकलिङ्गे च	तस्मात्	ताभ्याम्	तेभ्यः
	स्त्रीलिङ्गे	तस्याः	ताभ्याम्	ताभ्यः
एतद्	पुंलिङ्गे नपुंसकलिङ्गे च	एतस्मात्	एताभ्याम्	एतेभ्यः
	स्त्रीलिङ्गे	एतस्याः	एताभ्याम्	एताभ्यः
यद्	पुंलिङ्गे नपुंसकलिङ्गे च	यस्मात्	याभ्याम्	येभ्यः
	स्त्रीलिङ्गे	यस्याः	याभ्याम्	याभ्यः
किम्	पुंलिङ्गे नपुंसकलिङ्गे च	कस्मात्	काभ्याम्	केभ्यः
	स्त्रीलिङ्गे	कस्याः	काभ्याम्	काभ्यः

भवत्	पुंलिङ्गे नपुंसकलिङ्गे च	भवतः	भवद्भ्याम्	भवद्भ्यः
	स्त्रीलिङ्गे	भवत्याः	भवतीभ्याम्	भवतीभ्यः
सर्व	पुंलिङ्गे नपुंसकलिङ्गे च	सर्वस्मात्	सर्वाभ्याम्	सर्वेभ्यः
	स्त्रीलिङ्गे	सर्वस्याः	सर्वाभ्याम्	सर्वाभ्यः
इदम्	पुंलिङ्गे नपुंसकलिङ्गे च	अस्मात्	आभ्याम्	एभ्यः
	स्त्रीलिङ्गे	अस्याः	आभ्याम्	आभ्यः
अस्मद्	त्रिषु लिङ्गेषु	मत्	आवाभ्याम्	अस्मत्
युष्मद्	त्रिषु लिङ्गेषु	त्वत्	युवाभ्याम्	युष्मत्

८. यथोदाहरणं सर्वनामशब्दानां पञ्चमीविभक्त्यन्तानि रूपाणि प्रयुज्य वाक्यानि पूरयत -

यथा - सः प्रकोष्ठः । **तस्मात्** आसन्दं स्वीकरोतु ।

१. एते मम शिक्षकाः । ------------------------ व्याकरणं पठितवती ।

२. अहं विक्रेता । ---------------------- लेखनपुस्तिकाः क्रीणन्तु ।

३. एतौ गायकौ । --------------------- गीतं शृण्मः ।

४. ते आरक्षकाः । --------------------- मार्गं जानातु ।

५. अत्र सर्वे अपि पण्डिताः । -------------------------- आशीर्वादं प्राप्नोमि ।

६. एतत् गङ्गोत्रीक्षेत्रम् । ------------------------- गङ्गा प्रवहति ।

७. एते क्रान्तिवीराः । सैनिकाः ------------------------ प्रेरणां लभन्ते ।

८. एतेषु कः अश्वः ? भवान् एतेषु ----------------------- पतितवान् ?

९. तत् वृन्दावनक्षेत्रम् । --------------------- कृष्णः मथुरां गतवान् ।

१०. कानि कारणानि ? दुर्जनाः ------------------- बिभ्यति ?

११. ताः गोपिकाः । --------------------- कृष्णगीतानि शृणु ।

१२. एषः आरम्भबिन्दुः । स्पर्धकाः -------------------- आरभ्य धावन्ति ।

१३. त्वम् अग्रजः । ---------------------- साहाय्यं याचे ।

१४. सा भगिनी वा ? ---------------------- परं मम अवसरः वा ?

१५. भवान् अधिवक्ता । --------------------- परामर्शम् इच्छामि ।

अधः दत्तौ श्लोकौ सम्यक् पठत पञ्चम्यन्तपदानि परिशीलयत च -

इन्द्रियाणि पराण्याहुरिन्द्रियेभ्यः परं मनः ।
मनसस्तु परा बुद्धिर्यो बुद्धेः परतस्तु सः ॥३.४२॥

पदच्छेदः - इन्द्रियाणि, पराणि, आहुः, इन्द्रियेभ्यः, परम्, मनः, मनसः, तु, परा, बुद्धिः, यः, बुद्धेः, परतः, तु, सः ।

एवं बुद्धेः परं बुद्ध्वा संस्तभ्यात्मानमात्मना ।
जहि शत्रुं महाबाहो कामरूपं दुरासदम् ॥३.४३॥

पदच्छेदः - एवम्, बुद्धेः, परम्, बुद्ध्वा, संस्तभ्य, आत्मानम्, आत्मना, जहि, शत्रुम्, महाबाहो, कामरूपम्, दुरासदम् ।

स्वाभ्यासः

भवान् स्व-दिनचर्यानुसारं किं कार्यं कदा आरभ्य कियत्कालपर्यन्तं करोति इति लिखत -

यथा - अरुणः **पञ्चवादनतः षट्वादनपर्यन्तं** व्यायामं करोति ।

१. अरुणः ------------------------- ---------------------- ईशस्तुतिं करोति ।
२. अरुणः ------------------------- ----------------------- अध्ययनं करोति ।
३. अरुणः ------------------------- ---------------------- विद्यालये तिष्ठति ।
४. अरुणः ------------------------- ------------------------------- क्रीडति ।

पाण्डवानां शस्त्रशिक्षणम्

२९

शीघ्रम् / मन्दम् / उच्चैः / शनैः / सम्यक्

द्रोणाचार्यस्य आश्रमे पाण्डवाः शस्त्रशिक्षणस्य आरम्भं कुर्वन्ति । द्रोणाचार्यः **शनैः शनैः** तान् शस्त्रविद्यां पाठयति । पाण्डवाः आरम्भे **मन्दं मन्दम्** अभ्यासं कुर्वन्ति ।

पाण्डवेषु अर्जुनः धनुर्विद्यायां **सम्यक्** रुचिं प्रकटयति । सः **शीघ्रं शीघ्रं** धनुर्विद्याम् अधिगच्छति । सर्वेऽपि पाण्डवाः **शनैः शनैः** शस्त्राभ्यासं कृतवन्तः शस्त्रविद्यायां नैपुण्यं च प्राप्तवन्तः । शस्त्राभ्याससमये द्रोणाचार्यः घोषविद्याम् अपि पाठयति । शस्त्रप्रयोगात् पूर्वं सर्वेऽपि **उच्चैः** शङ्खनादं कुर्वन्तु इति द्रोणाचार्यः पाण्डवान् सूचयति । **शनैः शनैः** सर्वेऽपि सम्यग् अध्ययनं कृतवन्तः । सर्वे अग्रेऽपि एवमेव अभ्यासं कुर्वन्तु । भवतां समेषाम् एतत् शस्त्रशिक्षणं लोककल्याणस्य कृते भवतु इति आशीर्वादं प्रयच्छति ।

अभ्यासः

१. पाठं पठित्वा अधो भागे प्रदत्तानि रिक्तस्थानानि यथोदाहरणं पूरयत -

यथा - द्रोणाचार्यः ---------- तान् शस्त्रविद्यां पाठयति ।

द्रोणाचार्यः **शनैः शनैः** तान् शस्त्रविद्यां पाठयति ।

१. पाण्डवाः आरम्भे ------------------------ अभ्यासं कुर्वन्ति ।

२. पाण्डवेषु अर्जुनः धनुर्विद्यायां -------------- रुचिं प्रकटयति ।

३. सः ------------------------------ धनुर्विद्याम् अधिगच्छति ।

४. सर्वेऽपि पाण्डवाः -------------------- शस्त्राभ्यासं कृतवन्तः ।

५. शस्त्रप्रयोगात् पूर्वं सर्वेऽपि ---------------- शङ्खनादं कुर्वन्तु ।

६. ------------------------- सर्वेऽपि सम्यग् अध्ययनं कृतवन्तः ।

२. अधः लिखितानां शब्दानां योजनेन यथोदाहरणं वाक्यनिर्माणं कुरुत -

अश्वः	शीघ्रम्	गजः	मन्दम्	वदति	सम्यक्
व्याघ्रः		पिपीलिका		लिखति	

मेघः	उच्चैः	कोकिलः	शनैः
राक्षसः		शुकः	

यथा - अश्वः शीघ्रं धावति ।

१. ------------------------- धावति ।

२. ------------------------- चलति ।

३. ------------------------- चलति ।

४. छात्रः सुभाषितं ------------------ ।

५. छात्रा चित्रं ---------------------- ।

६. ------------------------- गर्जति ।

७. ------------------------- हसति ।

८. ------------------------- गायति ।

९. ------------------------- कूजति ।

स्वाभ्यासः

१. मञ्जूषायां दत्तानि पदानि क्रियापदैः सह यथायोग्यं मेलयत -

शीघ्रम् / मन्दम् / उच्चैः / शनैः / सम्यक्

धावति	खादति	आक्रोशति	आह्वयति	चलति
स्थापयति	जानाति	भाषते	वदति	गायति

यथा - शीघ्रं धावति ।

-- ।

-- ।

-- ।

-- ।

-- ।

-- ।

-- ।

-- ।

-- ।

दृष्ट्वा तु पाण्डवानीकम्

'क्त्वा'प्रत्ययान्तानि

३०

उच्चैः पठत अवगच्छत च -

दृष्ट्वा तु पाण्डवानीकं व्यूढं दुर्योधनस्तदा।
आचार्यमुपसङ्गम्य राजावचनमब्रवीत्॥१.२॥

पदच्छेदः - दृष्ट्वा, तु, पाण्डवानीकम्, व्यूढम्, दुर्योधनः, तदा, आचार्यम्, उपसङ्गम्य, राजा, वचनम्, अब्रवीत्।

अन्वयः - तदा तु व्यूढं पाण्डवानीकं **दृष्ट्वा** राजा दुर्योधनः आचार्यम् उपसङ्गम्य वचनम् अब्रवीत्।

एवमुक्तो हृषीकेशो गुडाकेशेन भारत।
सेनयोरुभयोर्मध्ये स्थापयित्वा रथोत्तमम्॥१.२४॥

पदच्छेदः - एवम्, उक्तः, हृषीकेशः, गुडाकेशेन, भारत, सेनयोः, उभयोः, मध्ये, स्थापयित्वा, रथोत्तमम्।

अन्वयः - भारत ! एवं गुडाकेशेन उक्तः हृषीकेशः सेनयोः उभयोः मध्ये (भीष्मद्रोणप्रमुखतः सर्वेषां च महीक्षितां) रथोत्तमं **स्थापयित्वा** ('पार्थ ! एतान् समवेतान् कुरून् पश्य' इति उवाच।)

निमित्तानि च पश्यामि विपरीतानि केशव।
न च श्रेयोऽनुपश्यामि हत्वा स्वजनमाहवे॥१.३१॥

पदच्छेदः - निमित्तानि, च, पश्यामि, विपरीतानि, केशव, न, च, श्रेयः, अनुपश्यामि, हत्वा, स्वजनम्, आहवे।

अन्वयः - केशव ! विपरीतानि च निमित्तानि पश्यामि। आहवे स्वजनं **हत्वा** श्रेयः च न अनुपश्यामि।

येषामर्थे काङ्क्षितं नो राज्यं भोगाः सुखानि च।
त इमेऽवस्थिता युद्धे प्राणांस्त्यक्त्वा धनानि च॥१.३३॥

पदच्छेदः - येषाम्, अर्थे, काङ्क्षितम्, नः, राज्यम्, भोगाः, सुखानि, च, ते, इमे, अवस्थिताः, युद्धे, प्राणान्, त्यक्त्वा, धनानि, च।

अन्वयः - येषाम् अर्थे राज्यं भोगाः सुखानि च नः काङ्क्षितं ते इमे (आचार्याः पितरः पुत्राः तथा एव पितामहाः मातुलाः श्वशुराः पौत्राः श्यालाः तथा सम्बन्धिनः) प्राणान् धनानि च **त्यक्त्वा युद्धे अवस्थिताः** (सन्ति)।

एवमुक्त्वार्जुनः सङ्ख्ये रथोपस्थ उपाविशत्।
विसृज्य सशरं चापं शोकसंविग्नमानसः॥१.४७॥

पदच्छेदः - एवम्, उक्त्वा, अर्जुनः, सङ्ख्ये, रथोपस्थे, उपाविशत्, विसृज्य, सशरम्, चापम्, शोकसंविग्नमानसः।

अन्वयः - सङ्ख्ये शोकसंविग्नमानसः अर्जुनः एवम् **उक्त्वा** सशरं चापं विसृज्य रथोपस्थे उपाविशत्।

अभ्यासः

१. उपरि प्रदत्तेभ्यः श्लोकेभ्यः रक्तवर्णेन मुद्रितानि पदानि चित्वा लिखत -

----------------, ------------------, -----------------, ----------------, --------------

क्त्वा-प्रत्ययस्य वाक्यानुगुणं प्रयोगं पश्यत अवगच्छत च -

१. दुर्योधनः पाण्डवानीकम् **अपश्यत्**, आचार्यम् उपसङ्गम्य वचनम् अब्रवीत् ।
दुर्योधनः पाण्डवानीकं **दृष्ट्वा** आचार्यम् उपसङ्गम्य वचनम् अब्रवीत् ।

२. हृषीकेशः उभयोः सेनयोः मध्ये उत्तमं रथम् **अस्थापयत्**, गुडाकेशम् अवदत् ।
हृषीकेशः उभयोः सेनयोः मध्ये उत्तमं रथं **स्थापयित्वा** गुडाकेशम् अवदत् ।

३. आहवे (युद्धे) स्वजनं हन्मि, श्रेयः च न अनुपश्यामि ।
आहवे (युद्धे) स्वजनं **हत्वा** श्रेयः च न अनुपश्यामि ।

४. प्राणान् धनानि च त्यजन्ति, युद्धे अवस्थिताः (सन्ति) ।
प्राणान् धनानि च **त्यक्त्वा** युद्धे अवस्थिताः (सन्ति) ।

५. एवम् अवदत्, सशरं चापं विसृज्य रथोपस्थे उपाविशत् ।
एवम् **उक्त्वा** सशरं चापं विसृज्य रथोपस्थे उपाविशत् ।

अवधेयम्

यदा एकः एव कर्ता क्रियाद्वयं करोति तदा तस्मिन्वाक्ये प्रथमक्रियायाः '**क्त्वा**'प्रत्ययः भवति । (प्रथमा क्रिया क्त्वा प्रत्ययान्तेन निर्दिश्यते ।) यथा -

वाक्यम् - दुर्योधनः पाण्डवानीकम् **अपश्यत्**, आचार्यं च अब्रवीत् ।

क्त्वा-प्रयोगः - दुर्योधनः पाण्डवानीकं **दृष्ट्वा** आचार्यम् अब्रवीत् ।

'**क्त्वा**'प्रत्ययस्य '**त्वा**' इत्येतावान् भागः अवशिष्यते । अतः लोके अस्य '**त्वा**'प्रत्ययः इत्यपि व्यवहारः अस्ति ।

धातुः + क्त्वा	क्त्वान्तं रूपम्		धातुः + क्त्वा	क्त्वान्तं रूपम्
पठ् + क्त्वा	**पठित्वा**		दह् + क्त्वा	**दग्ध्वा**
भ्रम् + क्त्वा	**भ्रमित्वा**		प्रच्छ् + क्त्वा	**पृष्ट्वा**
क्रीड् + क्त्वा	**क्रीडित्वा**		कृष् + क्त्वा	**कृष्ट्वा**
धाव् + क्त्वा	**धावित्वा**		हृ + क्त्वा	**हृत्वा**
चल् + क्त्वा	**चलित्वा**		पच् + क्त्वा	**पक्त्वा**
वद् + क्त्वा	**उदित्वा**		ध्यै + क्त्वा	**ध्यात्वा**

त्यज् + क्त्वा	त्यक्त्वा		दा + क्त्वा	दत्त्वा
विद् + क्त्वा	विदित्वा		श्रु + क्त्वा	श्रुत्वा
लभ् + क्त्वा	लब्ध्वा		हा + क्त्वा	हित्वा
भू + क्त्वा	भूत्वा		ईक्ष् + क्त्वा	ईक्षित्वा
वृत् + क्त्वा	वर्तित्वा		भुज् + क्त्वा	भुक्त्वा
वृध् + क्त्वा	वर्धित्वा		मुद् + क्त्वा	मोदित्वा / मुद्त्वा
शी + क्त्वा	शयित्वा		ब्रू + क्त्वा	उक्त्वा
स्रंस् + क्त्वा	स्रंसित्वा		चेष्ट् + क्त्वा	चेष्टित्वा
मृ + क्त्वा	मृत्वा		भी + क्त्वा	भीत्वा
जन् + क्त्वा	जनित्वा		स्था + क्त्वा	स्थित्वा
ग्रह् + क्त्वा	गृहीत्वा		कम्प् + क्त्वा	कम्पित्वा
स्ना + क्त्वा	स्नात्वा		चुर् + क्त्वा	चोरयित्वा
स्मृ + क्त्वा	स्मृत्वा		रम् + क्त्वा	रत्वा
रच् + क्त्वा	रचयित्वा		गम् + क्त्वा	गत्वा
दृश् + क्त्वा	दृष्ट्वा		नम् + क्त्वा	नत्वा

२. यथोदाहरणं रिक्तस्थानानि पूरयत -

१. **स्था** - **स्थित्वा**
२. रक्ष् - ----------------------
३. रच् - ----------------------
४. दृश् - ----------------------
५. पूर् - ----------------------
६. कथ् - कथयित्वा
७. भू - ----------------------
८. चल् - ----------------------
९. चुर् - ----------------------
१०. खाद् - ----------------------
११. नी - ----------------------
१२. कृत् - कर्तित्वा
१३. वक्ति - उक्त्वा
१४. स्पृश् - ----------------------
१५. लिख् - ----------------------
१६. श्रु - ----------------------
१७. भक्ष् - भक्षयित्वा
१८. जि - ----------------------
१९. कृप् - ----------------------
२०. मुद् - ----------------------

३. यथोदाहरणं क्त्वान्तं रूपम् उपयुज्य वाक्यद्वयस्य योजनं कुरुत, तथा च भगवद्गीतायां तत्सङ्ख्याकं श्लोकं पठत -

यथा - अर्जुन ! शोकं त्यजतु । उत्तिष्ठतु । अर्जुन ! शोकं त्यक्त्वा उत्तिष्ठतु ।

१. तत् धाम गच्छति । न निवर्तन्ते ।

-- ।

२. दुर्योधनः पाण्डवानां सैन्यम् अपश्यत् । वचनम् अवदत् ।

-- ।

३. कृष्णः उभयोः सेनयोः मध्ये रथं स्थापितवान् । अवदत् ।

-- ।

४. स्वजनं पश्यति । अर्जुनस्य गात्राणि सीदन्ति ।

-- ।

५. बान्धवाः स्वप्राणान् धनानि च त्यजन्ति । युद्धे उपस्थिताः सन्ति ।

-- ।

६. वयं स्वजनं हन्मः । कथं सुखिनः भवामः ?

-- ।

७. अर्जुनः श्रीकृष्णम् एवं वक्ति । रथे उपविशति ।

-- ।

८. गुडाकेशः 'न योत्स्ये' इति गोविन्दं वक्ति । मौनं धरति ।

-- ।

९. त्वम् आत्मनः स्वरूपं वेत्सि । दुःखम् अनुभवितुं नार्हसि ।

-- ।

१०. कश्चन आत्मानं शृणोति । नैव जानाति ।

-- ।

११. सः युद्धे सर्वान् जयति । भूमेः अधिपतिः भवति ।

-- ।

१२. विजयपराजयौ समानं कुरु । युद्धाय युज्यस्व ।

-- ।

१३. भवान् एकाग्रमनस्कः भवतु । कर्माणि आचरतु ।

-- ।

१४. सः ब्राह्मीस्थितौ तिष्ठति । ब्रह्मानन्दं प्राप्नोति ।

-- ।

१५. सृष्टिकर्ता कल्पादौ प्रजाः सृष्टवान्। अवदत्।

-- ।

१६. गुणकर्मविभागयोः ज्ञाता पुनः गुणाः गुणेषु वर्तन्ते इति मन्यते। न सज्जते।

-- ।

१७. भवान् निष्कामः, ममताशून्यः विगतभयः च भवतु। युद्धं करोतु।

-- ।

१८. सः देहं त्यजति। पुनर्जन्म न एति।

-- ।

१९. तत् कर्म तुभ्यं प्रवदामि यत् जानासि। अशुभात् विमुच्यसे।

-- ।

२०. मुमुक्षुः यथार्थं जानाति। संसारबन्धनात् मुक्तः भवति।

-- ।

२१. श्रद्धालुः ज्ञानं लभते। शीघ्रं परां शान्तिम् अधिगच्छति।

-- ।

२२. भवान् अज्ञानेन समुत्पन्नं संशयं ज्ञानरूपेण खड्गेन छिनत्तु। निष्कामकर्म आचरतु।

-- ।

२३. मुनिः भगवन्तं सर्वभूतानां मित्रं सर्वलोकानां महेश्वरं च जानाति। मोक्षं प्राप्नोति।

-- ।

२४. योगी मनः एकाग्रं करोति। योगं साधयति।

-- ।

२५. ज्ञाता आनन्दं लभते। ततः अधिकम् अपरं न मन्यते।

-- ।

२६. योगनिष्ठः मनः स्वनिष्ठं करोति। अन्यत् किमपि न चिन्तयति।

-- ।

२७. योगभ्रष्टः पुण्यकृतां लोकेषु अनेकानि वर्षाणि वसति। पवित्राणां धनिनां गृहे जन्म प्राप्नोति।

-- ।

२८. सः अन्तकाले मामेव स्मरन् देहं मुञ्चति। मद्भावं याति।

-- ।

२९. योगी सर्वं वेत्ति। परं स्थानम् उपैति।

-- ।

३०. योगिनः ईश्वरं विनाशरहितं जानन्ति। एकाग्रचित्ताः भजन्ति।

-- ।

३१. ते स्वर्गलोकं भुञ्जते। पुण्ये क्षीणे सति इमं लोकम् आगच्छन्ति।

-- ।

३२. हरिः एवम् उक्तवान्। स्वस्य ईश्वरसम्बन्धिनं रूपं पार्थाय दर्शितवान्।

-- ।

३३. भुवनत्रयं तव उग्रम् अद्भुतं रूपं पश्यति। चिन्ताकुलम् अस्ति।

-- ।

३४. बहवो मुनयः सिद्धाः च स्वस्ति इति वदन्ति। अर्थगर्भैः स्तोत्रैः त्वां स्तुवन्ति।

-- ।

३५. शत्रून् जय। समृद्धं राज्यं भुङ्क्ष्व।

-- ।

३६. अदृष्टपूर्वं पश्यामि। सन्तुष्टः भवामि।

-- ।

३७. मम भयङ्करं रूपं पश्यतु। तव भयं मास्तु।

-- ।

३८. पुरुषः रजोगुणे प्रलयं गच्छति। कर्मासक्तेषु मनुष्येषु जायते।

-- ।

३९. बुद्धिमान् एतत् बोधति। कृतकृत्यः च भवति।

-- ।

४०. शास्त्रविधानोक्तं कर्म जानासि। इह कर्तुम् अर्हसि।

-- ।

४१. सः भक्त्या सर्वत्र व्याप्तं सच्चिदानन्दस्वरूपं मां जानाति। मय्येव लीनः भवति।

-- ।

४२. सः ईश्वरे परां भक्तिं करोति। ईश्वरम् एव अधिगच्छति।

-- ।

४३. अर्जुनः स्मृतिं लभते। श्रीकृष्णस्य वचनम् आचरति।

-- ।

एतानि वाक्यानि पठत क्त्वान्तरूपाणि अवलोकयत च -

१. भीष्मः गङ्गया सह **मिलित्वा** नमस्कृतवान्।

२. ईश्वरः भक्तं **त्रात्वा** धर्मरक्षणं कुरुते।

३. गुरून् **अहत्वा** भिक्षायाचनेन जीवामि।

४. अयं **भूत्वा** पुनः न उत्पद्यते।

५. अर्जुनः ध्वनिं **श्रुत्वा** बाणं प्रयुङ्क्ते। ६. द्रुपदः यज्ञं **कृत्वा** कन्यां प्राप्तवान्।

७. अभिमन्युः चक्रव्यूहं **भित्त्वा** अन्तः गतवान्।

८. सञ्जयः कृष्णार्जुनयोः संवादं **स्मृत्वा** हर्षम् अनुभवति।

९. दुःशासनः द्रौपदीं केशेषु **गृहीत्वा** राजसभायाम् आनयति।

१०. यदि त्वं धर्मसङ्ग्रामं न करिष्यसि तर्हि स्वधर्मं कीर्तिं च **हित्वा** पापम् अवाप्स्यसि।

४. यथोदाहरणं प्रदत्तस्य वाक्यस्य आधारेण वाक्यद्वयं रचयत -

यथा - जनाः गीतं **श्रुत्वा करताडनं कृतवन्तः**। जनाः गीतं **श्रुतवन्तः। करताडनं कृतवन्तः**।

१. विवेकः देवं वन्दित्वा मातापितरौ नतवान्। --।

२. जनाः ओदनं खादित्वा तक्रं पिबन्ति। --।

३. शिशुः बहु क्रीडित्वा शेते। --।

४. पण्डिताः ग्रन्थं पठित्वा चर्चां कुर्वन्ति। --।

५. माता गुरुः भूत्वा बालकं बोधयति। --।

६. वैद्यः रोगं ज्ञात्वा उपचारं करोति। --।

७. कल्पना पुष्पाणि चित्वा मालां करोति। --।

८. स्पर्धकः शीघ्रं धावित्वा लक्ष्यं प्राप्तवान्। --।

९. बालकः मार्जारस्य शावकं गृहीत्वा दुग्धं पायितवान्। --।

१०. कृषकः बीजानि उप्त्वा जलं सिञ्चति। --।

११. महिलाः शाटिकां धृत्वा मन्दिरं गच्छन्ति। --।

१२. बालिका हसित्वा पितरम् आलिङ्गति। --।

१३. नन्दिनी कवितां रचयित्वा पठति। --।

१४. नायकः संवादान् स्मृत्वा अभिनयति। --।

१५. पिता पुत्र्याः हितं चिन्तयित्वा कन्यादानं करोति। --।

१६. दाता वस्त्राणि क्रीत्वा वितरति। --।

१७. छात्राः ग्रन्थालये स्थित्वा अध्ययनं कुर्वन्ति। --।

१८. रजकः वस्त्राणि क्षालयित्वा समीकरोति। --।

१९. पाचकः पात्रे जलं स्थापयित्वा उष्णीकरोति। --।

२०. भिक्षुकः शुभवचनानि उक्त्वा भिक्षां स्वीकरोति। --।

२१. शिक्षिका विषयं ज्ञात्वा पाठयति। --।

२२. सूर्यमन्दिरं दृष्ट्वा जनाः विस्मिताः भवन्ति। --।

२३. क्षेत्रं कृष्ट्वा कृषकाः बीजानि वपन्ति। --।

२४. पूजकः दुग्धं नीत्वा देवाय अर्पितवान् । -- ।

२५. रोहिणी भूमिं मार्जयित्वा रङ्गावलीं लिखति । -- ।

२६. सद्भक्तः भवसागरं तीर्त्वा पारं गच्छति । -- ।

२७. काः शाकान् कर्तयित्वा पाकं कुर्वन्ति ? -- ।

२८. भवन्तः चित्रं लिखित्वा वर्णान् स्थापयन्तु । -- ।

२९. सर्वे क्रोधं जित्वा विवेकशीलाः भवन्तु । -- ।

३०. सर्वे गीतामाहात्म्यं गीत्वा गीतां पठन्तु । -- ।

पृथु-माहात्म्यम्

पृथुमहाराजः स्वस्य अतुल्येन पराक्रमेण दीर्घकालं यावत् राज्यं **कृत्वा** अन्ते राज्यं ज्येष्ठपुत्राय दत्तवान् । सः भार्यया अर्चिदेव्या सह तपः आचरितुं वनं गतवान् । अनेकानि दिनानि यावत् केवलं कन्दफलानि **खादित्वा** तदनन्तरं केवलं जलं **पीत्वा** जीवितवान् । अनन्तरं प्राणायामेन इन्द्रियाणाम् उपरि सम्पूर्णं विजयं प्राप्तवान् । ब्रह्मचैतन्यं विना तस्य चित्ते किमपि अन्यत् नासीत् । स्वस्य अन्तसमयं **ज्ञात्वा** सः वज्रासने उपविष्टवान् । प्राणान् अनन्ते लीनं **कृत्वा** देहं त्यक्तवान् च ।

महासाध्वी अर्चिदेवी सर्वदा पतिसेवायां मग्ना **भूत्वा** स्वशरीरस्य काञ्चित् अपि आस्थां विना पृथुमहाराजेन सह एकरूपा आसीत् । यदा महाराजः देहं त्यक्तवान् तदा सा अविलम्बं शान्तचित्ता सती शुचिः **भूत्वा** चितां रचितवती । चितायाम् अग्निं **ज्वालयित्वा** तिस्रः प्रदक्षिणाः **कृत्वा** अग्निप्रवेशं कृतवती । अनेन प्रकारेण परमधैर्येण पत्या सह गमनं कुर्वत्याः अर्चिदेव्याः पवित्रम् आचरणं **दृष्ट्वा** देवाः मङ्गलवाद्यानि अवादयन् पुष्पवृष्टिं च अकुर्वन् ।

उच्चलोकं **लङ्घयित्वा** उच्चतमलोकं गच्छन्तौ तौ दम्पती **दृष्ट्वा** सहस्राधिकाः वरदायिन्यः देव्यः तयोः स्तुतिं कृतवत्यः । ताः उक्तवत्यः- "अनेकेषां जन्मनाम् अनन्तरं मनुष्यजन्म प्राप्यते । मनुष्यस्य आयुः एतावत् लघु । तथापि एतौ विष्णुपदं प्राप्तवन्तौ" इति ।

एवं पृथुमहाराजः अर्चिदेव्या सह 'मोक्षप्राप्तेः साधनं मनुष्यजन्म' इति उपदेशं सम्यक्तया दर्शितवान् ।

५. यथोदाहरणं वाक्यानि रचयत -

यथा -

बालकः दन्तधावनं कृत्वा, प्रातराशं कृत्वा, पुस्तकं पठित्वा, चित्रं लिखित्वा, क्रीडित्वा, श्रान्तः भूत्वा शेते ।

१. कर्णः नदीं गच्छति । स्नानं करोति । अर्घ्यम् अर्पयति । इन्द्राय कवचं ददाति ।

--- ।

२. अर्जुनः गाण्डीवं गृह्णाति । युद्धक्षेत्रं गच्छति । गीता-उपदेशं शृणोति । युद्धं करोति ।

--- ।

३. माता पचति । बालिकया खादयति । पाठं पाठयति । शाययति ।

--- ।

स्वाभ्यासः

१. एतत्संख्याकेषु गीताश्लोकेषु क्त्वा-प्रत्ययान्तानां पदानां प्रयोगं परिशीलयत -

१.२८	२.६	४.२०	५.२७	५.२८	९.१	११.२३
११.२४	११.२५	११.५०	११.५१	१३.१२	१४.१	१५.८
१६.१०	१८.६	१८.८	१८.९	१८.१७		

शुचौ देशे प्रतिष्ठाप्य

'ल्यप्'प्रत्ययान्तानि

३१

गुरुणा उपदिष्टेन ज्ञानेन प्रत्यक्ष-अनुभवेन च यस्य चित्तं प्रसन्नं वर्तते, यः च निर्विकारः, यस्य च मृत्पिण्डे पाषाणे सुवर्णे च समानबुद्धिः भवति, सः समाधौ मग्नः जनः योगी इति उच्यते। सः योगी निर्जनप्रदेशे **संस्थित्य** शुचौ देशे आसनं **प्रतिष्ठाप्य** तस्य उपरि कुशान् **प्रसार्य** कुशानाम् उपरि कृष्णाजिनं स्थापयति। तदुपरि वस्त्रं **संस्थाप्य** तस्मिन् आसने **उपविश्य** अवधानेन चित्तप्रभृतीनां सर्वेषाम् इन्द्रियाणां नियमनं करोति। एवम् इन्द्रियाणि **नियम्य** सः नासिकाग्रं च **सम्प्रेक्ष्य** ध्यानपरः भवति। दृष्टिम् अन्यत्र **प्रसार्य**, दिशः **अवलोक्य** वा सः ध्यानभङ्गं न करोति। एवं दीर्घकालं **निध्याय** सः अन्तः वर्तमानम् आत्मानं पश्यति।

भगवद्गीतायाः षष्ठ-अध्यायस्य ११ तः १४ पर्यन्तं विद्यमानान् एतान् श्लोकान् सम्यक् पठत -

शुचौ देशे **प्रतिष्ठाप्य** स्थिरमासनमात्मनः।
नात्युच्छ्रितं नातिनीचं चैलाजिनकुशोत्तरम्॥ ६-११॥

तत्रैकाग्रं मनः कृत्वा यतचित्तेन्द्रियक्रियः।
उपविश्यासने युञ्ज्याद्योगमात्मविशुद्धये॥ ६-१२॥

समं कायशिरोग्रीवं धारयन्नचलं स्थिरः।
सम्प्रेक्ष्य नासिकाग्रं स्वं दिशश्चानवलोकयन्॥ ६-१३॥

प्रशान्तात्मा विगतभीर्ब्रह्मचारिव्रते स्थितः।
मनः **संयम्य** मच्चितो युक्त आसीत मत्परः॥ ६-१४॥

अत्र रक्तवर्णेन मुद्रितानि रूपाणि ल्यप्-प्रत्ययान्तानि सन्ति।

अवधेयम्

ल्यप्-प्रत्ययः क्त्वा-प्रत्ययस्य स्थाने विधीयमानः प्रत्ययः अस्ति। धातुः यदि उपसर्गसहितः भवति, तर्हि क्त्वा प्रत्ययस्य स्थाने ल्यप्-प्रत्ययः भवति। यथा - गत्वा, भूत्वा, ज्ञात्वा इत्यादीनि क्त्वाप्रत्ययान्तानि अव्ययानि सन्ति। आगत्य, सम्भूय, विज्ञाय इत्यादीनि ल्यप्-प्रत्ययान्तानि अव्ययानि सन्ति।

उपसर्गरहितं क्रियापदम् - क्त्वान्तम्	उपसर्गसहितं क्रियापदम् - ल्यबन्तम्
गच्छति - गत्वा	आगच्छति - आगत्य

नयति - नीत्वा	आनयति - आनीय
गृह्णाति - गृहीत्वा	संगृह्णाति - संगृह्य
स्मरति - स्मृत्वा	विस्मरति - विस्मृत्य
त्यजति - त्यक्त्वा	परित्यजति - परित्यज्य
भवति - भूत्वा	सम्भवति - सम्भूय

उच्चैः पठत जानीत च -

क्रियापदम्	क्त्वान्तरूपम्	उपसर्गसहितं क्रियापदम्	ल्यबन्तरूपम्
गच्छति	गत्वा	अवगच्छति	अवगत्य
करोति	कृत्वा	उपकरोति	उपकृत्य
लिखति	लिखित्वा/लेखित्वा	विलिखति	विलिख्य
क्रीणाति	क्रीत्वा	विक्रीणीते	विक्रीय
जानाति	ज्ञात्वा	विजानाति	विज्ञाय
स्थापयति	स्थापयित्वा	संस्थापयति	संस्थाप्य
प्रेषयति	प्रेषयित्वा	सम्प्रेषयति	सम्प्रेष्य
हरति	हृत्वा	संहरति	संहृत्य
नमति	नत्वा	प्रणमति	प्रणम्य
क्षालयति	क्षालयित्वा	प्रक्षालयति	प्रक्षाल्य
कर्षति	कृष्ट्वा	आकर्षति	आकृष्य
तिष्ठति	स्थित्वा	उत्तिष्ठति	उत्थाय
स्मरति	स्मृत्वा	संस्मरति	संस्मृत्य
भवति	भूत्वा	अनुभवति	अनुभूय
दिशति	दिष्ट्वा	निर्दिशति	निर्दिश्य
ईक्षते	ईक्षित्वा	निरीक्षते	निरीक्ष्य
भाषते	भाषित्वा	सम्भाषते	सम्भाष्य
वर्तते	वर्तित्वा	परिवर्तते	परिवृत्य

कुरुते	कृत्वा	परिष्कुरुते	परिष्कृत्य
धरति	धृत्वा	उद्धरति	उद्धृत्य
क्षिपति	क्षिप्त्वा	निक्षिपति	निक्षिप्य
पालयति	पालयित्वा	परिपालयति	परिपाल्य
ईक्षते	ईक्षित्वा	समीक्षते	समीक्ष्य

अभ्यासः

१. यथोदाहरणं ल्यबन्तपदानि लिखत -

क्रियापदानि		ल्यबन्तपदानि	क्रियापदानि		ल्यबन्तपदानि
यथा - प्र + क्षालयति	=	प्रक्षाल्य			
१. प्र + आप्नोति	=	----------------	१९. अभि + नन्दति	=	----------------
२. परा + भवति	=	----------------	२०. प्रति + जानाति	=	----------------
३. अप + हरति	=	----------------	२१. परि + गणयति	=	परिगणय्य
४. सम् + ईक्षते	=	----------------	२२. उप + करोति	=	----------------
५. अनु + चरति	=	----------------	२३. प्र + विशति	=	----------------
६. अव + गच्छति	=	----------------	२४. परा + वर्तते	=	----------------
७. निस् + सरति	=	----------------	२५. अप + आ + करोति	=	----------------
८. निर् + वहति	=	निरुह्य	२६. सम् + गृह्णाति	=	----------------
९. दुस् + सहते	=	दुस्सह्य	२७. अनु + सरति	=	----------------
१०. दुर् + आचरति	=	----------------	२८. अव + लोकते	=	----------------
११. वि + चारयति	=	----------------	२९. निस् + काशते	=	----------------
१२. आ + नयति	=	----------------	३०. निर् + ईक्षते	=	----------------
१३. नि + शमयति	=	----------------	३१. दुस् + करोति	=	----------------
१४. अधीते (अधि + इण्)	=	अधीत्य	३२. दुर् + भाषते	=	----------------
१५. अपि + दधाति	=	पिधाय	३३. वि + तरति	=	वितीर्य
१६. अति + रिच्यते	=	----------------	३४. आ + रभते	=	----------------
१७. सम् + भाषते	=	----------------	३५. नि + क्षिपति	=	----------------
१८. उत् + धरति	=	----------------	३६. सम् + स्थापयति	=	----------------

३७. अभि + नि + वेशयति	=	---------------	४४. वि + क्रीणीते	=	---------------
३८. दुर् + लभते	=	---------------	४५. प्र + नमति	=	---------------
३९. आ + कर्षति	=	---------------	४६. उप + विशति	=	---------------
४०. उत् + तिष्ठति	=	उत्थाय	४७. सम् + हरते	=	---------------
४१. अभि + वन्दति	=	---------------	४८. सम् + तुष्यति	=	---------------
४२. प्रति + अर्पयति	=	---------------	४९. नि + युङ्क्ते	=	---------------
४३. परि + पृच्छति	=	---------------			

२. मञ्जूषातः शुद्धं ल्यबन्तरूपं चित्वा रिक्तस्थानेषु लिखत -

१. **प्रपद्य**
२. ---------------------
३. ---------------------
४. ---------------------
५. ---------------------
६. ---------------------
७. ---------------------
८. ---------------------
९. ---------------------
१०. ---------------------

प्रपद्य	प्रपद्यत्वा
विचार्य	विचारयित्वा
उद्घाटयित्वा	उद्घाट्य
सम्भाषयित्वा	सम्भाष्य
विकृत्वा	विकृत्य
परिवेष्य	परिवेषयित्वा
उत्थित्वा	उत्थाय
समाप्य	समापयित्वा
प्रविष्ट्वा	प्रविश्य
आहूय	आहूत्वा

३. यथोदाहरणं कोष्ठकात् शुद्धं ल्यबन्तरूपं चित्वा रिक्तस्थानेषु लिखत -

यथा - कर्मकरः कार्यालयं **प्रविश्य** हस्ताक्षरं करोति। (प्रविशति, प्रविश्य, प्रविष्ट्वा, प्रविष्टवान्)

१. भक्ताः देवं ------------------- स्तोत्रं गायन्ति। (प्रणमन्ति, प्रणम्य, प्रणमित्वा, प्रणमति)
२. विजयः पाठं ------------------- उत्तराणि लिखति। (पठति, सम्पठति, सम्पठ, सम्पठ्य)
३. शिक्षकः चित्रं सम्यक् ------------------ दोषान् दर्शयति। (अवलोक्य, अवलोकयित्वा, आलोकयतु, अवालोकयति)
४. अमितः धनं ------------------ समाधानम् अनुभवति। (वितीर्य, वितरति, वितीर्णवान्, व्यतरत्)
५. दाता ------------------- विस्मरति। (उपकरोति, उपकृत्य, उपकृत, उपकार्य)
६. श्रेष्ठाः कार्यम् ------------------- मध्ये न त्यजन्ति। (आरम्भ्यते, आरभन्ते, आरभ्यते, आरभ्य)
७. पात्रं सम्यक् ------------------- शुद्धं जलं स्थापयतु। (प्रक्षालयित्वा, प्रक्षालयतु, प्रक्षाल्य, प्रक्षाय)
८. ईश्वरः भूतले -------------------- सद्भक्तान् उद्धरति। (अवतरिय, अवतीर्य, अवतरित्वा, अवतीर्त्वा)

४. यथोदाहरणं ल्यबन्तरूपाणि उपयुज्य वाक्यद्वयस्य योजनं कुरुत -

(साहाय्यार्थं तत्तत्संख्याकं गीताश्लोकं द्रष्टुं शक्नुमः ।)

यथा - दुर्योधनः आचार्यम् उपसङ्गच्छति । वचनं ब्रवीति । (१.२)

दुर्योधनः आचार्यम् उपसङ्गम्य वचनं ब्रवीति ।

१. अर्जुनः चापम् उद्धरति । इदं वाक्यं वदति ।

-- ।

२. अर्जुनः तान् सर्वान् बन्धून् समीक्षते । विषादेन ब्रूते । (१.२७)

-- ।

३. अर्जुनः सशरं चापं विसृजति । रथोपस्थे उपविशति । (१.४७)

-- ।

४. मानवः जीर्णानि वस्त्राणि विजहाति । नवानि गृह्णाति । (२.२२)

-- ।

५. सर्वाणि इन्द्रियाणि यः संयमति । तिष्ठति तस्य प्रज्ञा निश्चला भवति । (२.६१)

-- ।

६. यः पुरुषः सर्वान् कामान् परित्यजति । निरहङ्कारः चलति, सः शान्तिं प्राप्नोति । (२.७१)

-- ।

७. सः ब्राह्मीं स्थितिं प्राप्नोति । न विमुह्यति । (२.७२)

-- ।

८. हे कृष्ण ! एकं निश्चिनोतु । वदतु । (३.२)

-- ।

९. यः मूढः पुरुषः इन्द्रियाणि संयमति । चित्तेन विषयान् च चिन्तयति, सः मिथ्याचारः उच्यते । (३.६)

-- ।

१०. यः इन्द्रियाणि वशीकरोति । कर्मयोगम् आरभते सः श्रेष्ठः कथ्यते ।

-- ।

११. कामः ज्ञानम् आवृणोति । देहिनं विमोहयति । (३.४०)

-- ।

१२. सर्वजीवानाम् ईश्वरः अहं स्वां प्रकृतिम् अधितिष्ठामि । स्वमायया सम्भवामि । (४.६)

-- ।

१३. ब्रह्मज्ञः अप्रियं प्राप्नोति । न उद्विजति । (५.२०)

-- ।

१४. मुनिः चञ्चलं चित्तं यतः यतः निश्चरति ततः ततः नियमति। ध्यानं करोति। (६.२६)

-- ।

१५. हे कृष्ण ! भ्रष्टचित्तः योगफलं न प्राप्नोति। कां गतिं गच्छति ? (६.३७)

-- ।

१६. योगभ्रष्टः पुण्यलोकान् प्राप्नोति। निवासं कृत्वा सज्जनानां गृहे अभिजायते। (६.४१)

-- ।

१७. अनेकाभिः इच्छाभिः केचन जनाः जप-उपवासादि-नियमान् आश्रयन्ति। अन्यदेवताः भजन्ते। (७.२०)

-- ।

१८. जनाः माम् आश्रयन्ति। परब्रह्म जानन्ति। (७.२९)

-- ।

१९. मुनिः भ्रुवोः मध्ये प्राणान् आवेशयति। स्थिरचित्तेन परं पुरुषम् उपैति। (८.१०)

-- ।

२०. सर्वाणि इन्द्रियाणि संयमति। चित्तं निरोधयति। प्राणान् शिरसि आधरति। समाधिं प्राप्नोति। (८.१२)

-- ।

२१. परमां गतिं प्राप्तः महापुरुषः माम् उपैति। पुनर्जन्म न लभते। (८.१५)

-- ।

२२. भक्ताः अव्यक्तः अक्षरः इति परमां गतिं प्राप्नुवन्ति। न निवर्तन्ते। (८.२१)

-- ।

२३. स्त्रियः, वैश्याः, शूद्राः अपि मां व्यपाश्रयन्ति। परमां गतिं यान्ति। (९.३२)

-- ।

२४. अर्जुनः कृष्णं प्राणमत्। अवदत्। (११.१४)

-- ।

२५. ये चित्तं मयि आवेशयन्ति। परया श्रद्धया माम् उपासते ते योगिश्रेष्ठाः उच्यन्ते। (१२.२)

-- ।

२६. भवान् सर्वाणि कार्याणि समर्पयतु। अनन्यभक्त्या ईश्वरं भजतु।

-- ।

२७. परब्रह्म सकलं विश्वम् आवृणोति। तिष्ठति। (१३.१३)

-- ।

२८. मम भक्तः ज्ञातव्यं सर्वं विजानाति। मत्स्वरूपाय कल्पते। (१३.१८)

-- ।

२९. योगिनः ब्रह्मज्ञानम् उपाश्रयन्ति । ईश्वरस्य स्वरूपं प्राप्नुवन्ति । (१४.२)

-- ।

३०. ईश्वरः इन्द्रियाणि अधितिष्ठति । विषयान् उपसेवते । (१५.९)

-- ।

३१. ईश्वरः भूमिम् आविशति । बलेन भूतानि धारयति । (१५.१३)

-- ।

३२. यः शास्त्रविधिम् उत्सृजति । स्वच्छन्दं वर्तते सः कार्यसिद्धिं न लभते । (१६.२३)

-- ।

३३. ब्रह्मज्ञाता ओम् इति उदाहरति । यज्ञादिक्रियाः करोति । (१७.२४)

-- ।

३४. सः शान्तः अहङ्कारादिदोषान् विमुञ्चति । ब्रह्मत्वं जानाति । (१८.५३)

-- ।

३५. अहङ्कारम् आश्रयसि । न योत्स्ये इति चिन्तयसि । (१८.५९)

-- ।

३६. सर्वधर्मान् परित्यज । माम् एकं शरणं व्रज । (१८.६६)

-- ।

३७. केशवार्जुनयोः अद्भुतं संवादं संस्मरामि । भूयः हृष्यामि । (१८.७६)

-- ।

३८. हरेः अतीव अद्भुतं रूपं संस्मरामि । मम महान् विस्मयः भवति । (१८.७७)

-- ।

५. यथोदाहरणं प्रदत्तस्य वाक्यस्य आधारेण वाक्यद्वयं रचयत -

यथा - राधिका बालकान् **आहूय** मधुरं ददाति । राधिका बालकान् **आह्वयति । मधुरं ददाति ।**

१. यजमानः गणेशमूर्तिं संस्थाप्य पूजनं करोति ।

-- ।

२. कृषकः व्रीहिं विक्रीय धनम् अर्जयति ।

-- ।

३. द्रुपदः उत्पत्य आम्रफलं गृह्णाति ।

-- ।

४. विद्या मातरम् अनुसृत्य शाटिकां धरति ।

-- ।

५. वैज्ञानिकः शास्त्रं विज्ञाय प्रयोगं करोति।

-- ।

६. रामः राजभोगान् परित्यज्य वनवासं स्वीकरोति।

-- ।

७. गृहस्थः सुखासने उपविश्य ध्यानं करोति।

-- ।

८. शिशुपालः दुर्भाष्य कृष्णम् अपमानयति।

-- ।

९. वैदेही श्रीरामं संस्मृत्य भजनं गायति।

-- ।

१०. विनायकः प्रश्नान् अवगम्य उत्तराणि लिखति।

-- ।

११. श्रीकृष्णः विहस्य उत्तीर्णवान्।

-- ।

१२. मातुलः भागिनेयम् अभिनन्द्य मधुरं खादति।

-- ।

स्वाभ्यासः

६. एतत्संख्याकेषु गीताश्लोकेषु ल्यबन्तरूपाणि परिशीलयत -

१.३६	२.८	२.३१	३.३०	३.४१	६.२४	८.१६	८.२५
९.३	१०.१६	११.३५	११.४४	१२.४	१४.९	१५.१७	१६.१०
१७.१		१७.११	१७.१२	१७.२१			

ज्ञानवर्धिनी

- गीतायाम् अध्यायाः - अष्टादश
- गीतायां श्लोकाः - सप्तशतम्
- महाभारते पर्वाणि - अष्टादश
- महाभारते उपपर्वाणि - शतम्
- महाभारते श्लोकाः - लक्षम्

गीता सुगीता कर्तव्या

च / अपि / एव / इति / यत् **३२**

एतत् सम्भाषणम् उच्चैः पठत अवगच्छत च -

पौत्रः पितामह ! भवान् यथा भगवद्गीतां पठति तथैव अहम् **अपि** पठितुं प्रयत्नं करोमि । परं कस्यचिद् **अपि** श्लोकस्य अर्थं न अवगच्छामि । **यत्** किञ्चित् अल्पम् अवगच्छामि तदपि शीघ्रम् एव विस्मरामि । तर्हि मम गीतापठनेन कः लाभः ?
(पितामहः मलिनं घटं स्वीकृत्य वदति **यत्**...)

पितामहः : वत्स ! 'एतं मलिनं घटं स्वीकृत्य नदीं गच्छ जलं पूरयित्वा च आनय' **इति** ।
(पौत्रः तथैव करोति वदति **च** ।)

पौत्रः 'पितामह ! अहं पञ्चवारं घटं पूरितवान् । तथा**पि** तस्य कश्चित् **अपि** लाभः नास्ति कारणं घटे छिद्रम् अस्ति । भवान् एतत् जानाति चेत् **अपि** मां तदेव कार्यं कर्तुं किमर्थम् आदिष्टवान्' **इति** ।

पितामहः : वदामि, घटं सम्यक् अवलोकय ।
(पौत्रः घटम् अवलोक्य आश्चर्येण वदति **यत्** ..)

पौत्रः पितामह ! मलिनः घटः तु स्वच्छः अभवत् । तत्र मम अवधानम् एव नासीत् ।

पितामहः : सत्यम् ! जीवने **अपि** एवम् **एव** भवति । यदा वयं किमपि पुस्तकं प्रतिदिनं पठामः तदा तत् अस्माकं बुद्धौ कुत्रचित् अङ्कितं भवति । अतः त्वं गीतायाः प्रत्येकम् शब्दं न स्मरसि तथा**पि** तां प्रतिदिनं पठ । कस्मिंश्चिद् दिने अवश्यम् **एव** तस्य लाभं प्राप्स्यसि ।

पौत्रः आम्, अवश्यम् **एव** पठिष्यामि । संपूर्णां गीतां कण्ठस्थाम् **अपि** करिष्यामि ।

पितामहः : शुभं भवतु ।

एतानि वाक्यानि उच्चैः पठत जानीत च -

१. अत्र युद्धे भीमः, अर्जुनः, विराटः द्रुपदः **च** सन्ति ।

२. काशिराजः, कुन्तिभोजः शैब्यः **च** योद्धुं सन्नद्धाः ।

३. मम सैन्यस्य नायकाः भवान्, भीष्मः, कर्णः कृपः **च** सन्ति ।

४. कृष्णः, धनञ्जयः सौभद्रः **च** पृथक् पृथक् शङ्खान् अधमन् ।

५. हे कृष्ण ! अहं विजयम्, राज्यं सुखानि **च** न इच्छामि ।

एतत्सङ्ख्याकेषु गीताश्लोकेषु चकारस्य प्रयोगं परिशीलयत -

२.५२	३.२२	५.१	६.३५	८.५	१०.३
३.४	३.३९	५.५	७.१७	९.१७	१०.९
३.८	४.२२	६.३०	८.२	९.२४	

अवधेयम्

'**च**' इति अव्ययस्य प्रयोगः '**समुच्चयः**' इत्यर्थे भवति ।
यथा - सन्दीपः स्तोत्रं गीतां **च** पठति ।
अमृता फलं, शाकं पत्रं **च** नयति ।

अपि

एतानि वाक्यानि उच्चैः पठत -

१. अर्जुनः आचार्यान् मातुलान् पुत्रान् भ्रातॄन् **अपि** पश्यति ।

२. काशिराजः कुन्तिभोजः शैब्यः च **अपि** युद्धं कुर्वन्ति ।

३. द्रोणं भीष्मं जयद्रथं कर्णं च **अपि** मारय / जहि ।

४. ब्राह्मीस्थितौ स्थित्वा अन्तकाले **अपि** ब्रह्मनिर्वाणम् ऋच्छति ।

५. न हि कश्चित् क्षणम् **अपि** जातु तिष्ठति अकर्मकृत् ।

एतेषु वाक्येषु 'अपि' इति अव्ययम् अवलोकयत -

१. भीमः अर्जुनः इव कर्णः **अपि** कुन्तीपुत्रः आसीत् ।

२. कृष्णेन सह पाण्डवाः **अपि** शङ्खनादम् अकुर्वन् ।

३. कृष्णः अर्जुनस्य केवलं सारथिः न, गुरुः **अपि** आसीत् ।

४. जातस्य मृत्युः निश्चितः, मृतस्य जन्म अपि निश्चितम् ।

५. अयुक्तस्य बुद्धिः नास्ति, शान्तिः **अपि** नास्ति ।

६. ये जनाः भगवतः मतम् अनुसरन्ति, ते कर्मभिः **अपि** मुच्यन्ते ।

७. किं कर्म भवति, किम् अकर्म भवति इति विषयेषु कवीनाम् **अपि** मोहः भवति ।
८. यः साङ्ख्ययोगयोः एकम् अपि सम्यक् आचरति सः द्वयोः **अपि** फलं प्राप्नोति ।
९. तपस्विभ्यः, ज्ञानिभ्यः, कर्मिभ्यः **अपि** योगी श्रेष्ठः भवति ।
१०. ईश्वरः अतीतं, वर्तमानं, भविष्यम् **अपि** जानाति ।
११. यत् कार्यं कुर्मः तत् सर्वम् **अपि** ईश्वरार्पणं करणीयम् ।
१२. अर्जुनः भगवतः यद् दिव्यं रूपं दृष्टवान् तत् देवाः **अपि** द्रष्टुम् इच्छन्ति ।
१३. गीतोपदेशस्य श्रवणेन अर्जुनस्य मोहः नष्टः, स्मृतिः **अपि** लब्धा ।

अवधेयम्

'**अपि**' इति अव्ययस्य प्रयोगः सर्वैः विभक्त्यन्तरूपैः सह कर्तुं शक्यः । यथा -

अर्जुनः अपि कुन्त्याः पुत्रः ।
दुर्योधनः **अर्जुनम्** अपि हन्तुम् इच्छति ।
अर्जुनेन अपि द्यूते पराजयः प्राप्तः ।
दुश्शासनः **अर्जुनाय** अपि क्रुध्यति ।
अर्जुनात् अपि कौरवाः भीताः ।
कुन्ती **अर्जुनस्य** अपि आशयं ज्ञातुम् इच्छति ।
श्रीकृष्णस्य वचनं श्रुत्वा **अर्जुने** अपि उत्साहः आगतः ।

श्लोकद्वयम् उच्चैः पठत -

एव

त्वमेव माता च पिता त्वमेव, त्वमेव बन्धुश्च सखा त्वमेव ।
त्वमेव विद्या द्रविणं त्वमेव, त्वमेव सर्वं मम देव देव ॥

पदच्छेदः - त्वम्, **एव,** माता, च, पिता, त्वम्, **एव,** त्वम्, **एव,** बन्धुः, च, सखा, त्वम्, **एव,** त्वम्, **एव,** विद्या, द्रविणं, त्वम्, **एव,** त्वम्, **एव,** सर्वं, मम, देव, देव ।

अयनेषु च सर्वेषु यथाभागमवस्थिताः ।
भीष्ममेवाभिरक्षन्तु भवन्तः सर्व एव हि ॥

पदच्छेदः - अयनेषु, च, सर्वेषु, यथाभागम्, अवस्थिताः, भीष्मम्, **एव,** अभिरक्षन्तु, भवन्तः, सर्व, **एव,** हि ।

अवधेयम्

'**एव**' इति अव्ययस्य प्रयोगः '**निश्चयः**' इत्यर्थे क्रियते । एतत् अन्यस्य निवारणं करोति ।
'**एव**' इति अव्ययस्य प्रयोगं सर्वविभक्त्यन्तपदैः सह अपि कर्तुं शक्नुमः ।

अभ्यासः

१. यथोदाहरणं वाक्यानि संयोज्य लिखत -

१. **तव अधिकारः**	वसुधा एव कुटुम्बकम् अस्ति ।
२. **सेवफलस्य वर्णः**	एव सिद्धिं प्राप्तवन्तः ।

३. स्वतन्त्रतादिनम्	रक्तः एव भवति।
४. बालकस्य प्रथमगुरुः	करोति एव।
५. हंसः सरस्वत्याः	माता एव भवति।
६. जनकादयः कर्मणा	भाषाणां जननी एव अस्ति।
७. देवः भक्तस्य रक्षणं	अगस्तमासे एव भवति।
८. अन्तिमविजयः	**कर्मणि एव अस्ति।**
९. संस्कृतं सर्वासां	सत्यस्य एव भवति।
१०. उदारचरितानां	एव वाहनम् अस्ति।

१. तव अधिकारः कर्मणि एव अस्ति। २. -- ।

३. -- । ४. -- ।

५. -- । ६. -- ।

७. -- । ८. -- ।

९. -- । १०. -- ।

२. (✓) चिह्नस्य स्थाने 'एव', (✗) चिह्नस्य स्थाने 'न' इति पदम् उपयुज्य यथोदाहरणं वाक्यनिर्माणं कुरुत -

१. अर्जुनः	धनुर्धरः ✓	गदाधरः ✗
२. श्रीकृष्णः	खड्गधरः ✗	चक्रधरः ✓
३. कर्णः	क्षत्रियः ✓	ब्राह्मणः ✗
४. भीष्मः	युवकः ✗	वृद्धः ✓
५. विदुरः	नीतिज्ञः ✓	सामान्यः ✗
६. सत्यवती	युधिष्ठिरमाता ✗	व्यासमाता ✓
७. सञ्जयः	मन्त्री ✗	सारथिः ✓
८. कुरुक्षेत्रम्	राजधानी ✗	युद्धभूमिः ✓

यथा - १. अर्जुनःगदाधरःन, सःधनुर्धरः एव अस्ति।

२. -- ।

३. -- ।

४. -- ।

५. -- ।

६. -- ।

७. -- ।

८. -- ।

एतानि वाक्यानि उच्चैः पठत जानीत च -

१. 'अस्माकम् अधिकारः कर्मणि एव अस्ति, न तु फले' **इति** कर्मयोगस्य सारः अस्ति ।

२. 'हे भ्रातरः ! भगिन्यः !' **इति** शब्दैः विवेकानन्दः अमेरिकादेशस्य जनान् संबोधितवान् ।

३. 'स्वराज्यं मम जन्मसिद्धः अधिकारः' **इति** लोकमान्यः तिलकमहोदयः वदति स्म ।

४. 'चक्रारपङ्क्तिरिव गच्छति भाग्यपङ्क्तिः' **इति** भासस्य वचनम् ।

५. 'बालकः पूर्वजन्मसंस्कारान् स्वीकृत्य जायते' **इति** भारतीयाः मन्यन्ते ।

६. 'संस्कृतं संगणकस्य कृते अत्यन्तम् उपयुक्तम्' **इति** वैज्ञानिकाः वदन्ति ।

अवधेयम्

यदा कस्यापि अन्यस्य जनस्य ग्रन्थस्य वा वचनं, कथनं, सन्देशः इत्यादीनाम् उद्धरणं क्रियते तदा वचन-कथन-सन्देशादीनाम् अन्ते '**इति**' इत्यस्य अव्ययस्य प्रयोगः भवति । अव्ययात् पूर्वं वचनं कथनं वा यथावत् उच्यते ।
यथा -'अहं गीतां पठामि' **इति** पुत्रः मातरं वदति ।

३. 'इति' पदं प्रयुज्य यथोदाहरणं वाक्यप्रयोगं कुरुत -

यथा - 'उपभुज्य त्यजत' । पाश्चात्त्यानाम् उक्तिः ।   'उपभुज्य त्यजत' **इति** पाश्चात्त्यानाम् उक्तिः ।

१. 'ब्रह्मसत्यं जगन्मिथ्या' । वेदान्तमतं वर्तते ।

-- ।

२. 'जननी जन्मभूमिः च स्वर्गाद् अपि गरीयसी' । रामस्य वचनं प्रसिद्धम् ।

-- ।

३. 'विविधतायाम् एकता' । भारतस्य वैशिष्ट्यम् अस्ति ।

-- ।

४. काश्मीरं भारतस्य नन्दनवनम् । जनाः वदन्ति ।

-- ।

५. 'नारायणं नमस्कृत्य....' । महाभारतस्य प्रथमश्लोकः अस्ति ।

-- ।

४. यथोदाहरणं वाक्यानि लिखत -

यथा - 'हितं मनोहारि च दुर्लभं वचः ।' - भारविः
'हितं मनोहारि च दुर्लभं वचः' इति भारवेः वचनम् ।

१. 'मामकाः पाण्डवाः च किम् अकुर्वत ?' - धृतराष्ट्रः

--- ।

२. 'कथं भीष्मम् अहं सङ्ख्ये द्रोणं च मधुसूदन ।' - अर्जुनः

--- ।

३. 'परोपकारः पुण्याय पापाय परपीडनम् ।' - महर्षिव्यासः

--- ।

४. 'यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवताः ।' - मनुस्मृतिः

--- ।

५. 'अहं मम झांसीं न ददामि ।' - झांसीराज्ञी

--- ।

एतानि वाक्यानि उच्चैः पठत -

यत्

१. न योत्स्य इति गोविन्दम् उक्त्वा तूष्णीं बभूव ह ।
गोविन्दम् उक्त्वा तूष्णीं बभूव ह यत् न योत्स्ये ।

२. साङ्ख्ययोगौ पृथक् शास्त्रे स्तः इति बालाः वदन्ति, न तु पण्डिताः ।
बालाः वदन्ति न तु पण्डिताः यत् साङ्ख्ययोगौ पृथक् शास्त्रे स्तः ।

३. तव रूपम् ऐश्वरं द्रष्टुम् इच्छामि इति अर्जुनः योगेश्वरं वदति ।
अर्जुनः योगेश्वरं वदति यत् तव रूपम् ऐश्वरं द्रष्टुम् इच्छामि ।

४. किं कर्म किं च अकर्म इति विषये कवयः अपि मोहिताः भवन्ति ।
अस्मिन् विषये कवयः अपि मोहिताः भवन्ति यत् किं कर्म किम् अकर्म ?

५. 'प्रसीद देवेश ! जगन्निवास !' इति भीतः अर्जुनः कृष्णं प्रार्थयते ।
भीतः अर्जुनः कृष्णं प्रार्थयते यत् प्रसीद देवेश ! जगन्निवास !

अवधेयम्

> **'इति'** इत्यस्य प्रयोगद्वारा यत् उच्यते तत् **'यत्'** इति पदस्य योगेन अपि वक्तुं शक्यते ।
> यथा - 'जलम् एव जीवनम्' **इति** सर्वे वदन्ति । = सर्वे वदन्ति **यत्** जलम् एव जीवनम् ।

५. 'यत्' इति पदम् उपयुज्य वाक्यानि रचयत -

१. माम् अनेन स्वचक्षुषा द्रष्टुं न शक्नोषि - ईश्वरः कथयति ।

--- ।

२. भारतं विश्वगुरुः भवतु - सर्वे इच्छन्ति ।

-- ।

३. उत्तरं यत् समुद्रस्य हिमाद्रेः च एव दक्षिणम् - भारतस्य भौगोलिकं वर्णनं पुराणेषु अपि दृश्यते ।

-- ।

४. कर्णः कुन्त्याः पुत्रः अस्ति - सत्यं पाण्डवाः न जानन्ति स्म ।

-- ।

५. सर्वे धर्माः अन्ततो गत्वा एकम् एव ईश्वरं प्राप्नुवन्ति - रामकृष्णपरमहंसः वदति स्म ।

-- ।

६. 'इति' पदस्य स्थाने 'यत्' पदं प्रयुज्य वाक्यानि रचयत -

१. 'अहं मम सर्वाणि पूर्वजन्मानि जानामि' इति श्रीकृष्णः वदति ।

-- ।

२. 'निसर्गस्य रक्षणं कुर्मः, न तु नाशम् इति पर्यावरणज्ञाः वदन्ति ।

-- ।

३. 'वनस्पतिषु अपि प्राणाः भवन्ति' इति डॉ. जगदीशचन्द्रः बसुः बोधितवान् ।

-- ।

४. 'पुराणम् इति एव न साधु सर्वम्' इति कालिदासस्य मतम् अस्ति ।

-- ।

५. 'विद्याविहीनः पशुभिः समानः' इति सुभाषितं वदति ।

-- ।

६. संस्कृतभाषा जनभाषा भवेत् इति अस्माकं लक्ष्यम् अस्ति ।

-- ।

७. 'ऋग्वेदः' विश्वस्य प्रथमं साहित्यम् अस्ति इति सर्वे अङ्गीकुर्वन्ति ।

-- ।

८. 'न हि ज्ञानेनसदृशं पवित्रम् इह विद्यते' इति भगवद्गीतायां लिखितम् अस्ति ।

-- ।

९. 'अहं सर्वस्य प्रभवः मत्तः सर्वं प्रवर्तते' इति कृष्णः अर्जुनं वदति ।

-- ।

१०. 'अवश्यम् एव भोक्तव्यं कृतं कर्म शुभाशुभम्' इति गरुडपुराणे लिखितम् अस्ति ।

-- ।

विचित्रः नकुलः

चतुर्थीविभक्तिः **२२**

एतां कथाम् उच्चैः पठत -

कुरुक्षेत्रयुद्धस्य समाप्तेः अनन्तरं युधिष्ठिरः अश्वमेधयज्ञं कृतवान्। तत्र सः **सर्वेभ्यः ब्राह्मणेभ्यः सर्वाभ्यः प्रजाभ्यः** च धन-धेनु-वस्त्र-आभूषणादीनि दत्तवान्।

तदानीं किञ्चन आश्चर्यं घटितम्। यज्ञस्य पूर्णाहुत्याः अनन्तरं कश्चन नकुलः तत्र आगतवान्। तस्य दर्शनं सर्वेषां **विस्मयाय** अभवत्। यतः तस्य अर्धं शरीरं सुवर्णमयम् आसीत्। सः तत्र धूलौ विलुण्ठनं कृतवान्। अनन्तरम् उच्चैः उक्तवान् - "भोः ब्राह्मणाः ! एषः यज्ञः तथा **पुण्याय** न अभवत् यथा अहं चिन्तितवान्" इति।

ब्राह्मणाः पृष्टवन्तः - "किमर्थं भवान् तथा वदति ?"

नकुलः उक्तवान् - "मम अर्धं शरीरं सुवर्णमयम् अस्ति। अत्र विलुण्ठनेन पूर्णं शरीरं सुवर्णमयं भवेत् इति अहं चिन्तितवान्। किन्तु तथा न अभवत्" इति।

ब्राह्मणाः पृष्टवन्तः - "भवतः अर्धं शरीरं कथं सुवर्णमयम् अभवत् ?" इति।

नकुलः तेषां **विश्वासाय** स्वस्य पूर्वतनकथाम् उक्तवान् - "कुरुक्षेत्रे कश्चन ब्राह्मणः निवसति स्म। सः **कुटुम्बभरणाय** उञ्छवृत्तिम् (पतितानि धान्यानि संगृह्य तैः जीवनम्) आश्रितवान् आसीत्। तस्य कुटुम्बजनाः सर्वे अपि सर्वदा **"हरये** नमः, **विष्णवे** नमः, **वासुदेवाय** नमः" इति वदन्तः कृष्णमेव स्मरन्ति स्म।

कदाचित् तस्मिन् प्रदेशे दुर्भिक्षः अभवत्। ब्राह्मणस्य गृहे **खादनाय** अन्नं नास्ति। **पानाय** जलम् अपि नास्ति। तथापि ते सर्वे कृष्णभजनं न त्यक्तवन्तः। दिनद्वयम् एवं गतम्। तृतीये दिने ब्राह्मणः अतीव कष्टेन प्रस्थपरिमितं धान्यं प्राप्तवान्। तेन सक्तून् निर्मितवान्। ततः कृष्णपूजां कृत्वा सक्तून् नैवेद्यरूपेण **कृष्णाय** समर्पितवान्। तदनन्तरं नैवेद्यं विभज्य पादभागं **पत्न्यै**, पादभागं **पुत्राय**, पादभागं **स्नुषायै** च दत्तवान्। पुनः पादभागं **स्वस्मै** रक्षित्वा **खादनाय** उद्युक्तः अभवत्।

तदा एव कश्चन अतिथिः आगतवान्। ब्राह्मणः **तस्मै** स्वागतम् उक्त्वा तं **भोजनाय** उपवेशितवान्। **स्वस्मै** रक्षितस्य नैवेद्यस्य पादभागम् **अतिथये** अर्पितवान् च। परन्तु पादभागः अतिथेः **सन्तोषाय** न अभवत्। तदा ब्राह्मणी पतिम् उक्तवती - "भवान् मम भागं **विप्राय** ददातु" इति। सः दत्तवान्। तथापि अतिथिः सन्तुष्टः न अभवत्।

एवमेव स्नुषा पुत्रः च स्वभागं समर्पितवन्तौ। ततः पूर्णोदरः अतिथिः ब्राह्मणम् उक्तवान् - "इदानीं सन्तुष्टः अस्मि। अहं धर्मदेवः। तव **परीक्षणाय** आगतवान्। भवान् सकुटुम्बं स्वर्गं गच्छतु" इति। ततः ब्राह्मणः विमानेन सकुटुम्बं स्वर्गं गतवान्।"

एवं कथां समाप्य नकुलः उक्तवान् - "एतत् सर्वम् अहं बिलात् पश्यन् आसम्। अनन्तरं समीपं गत्वा तत्र पतितान् सक्तून् भुक्तवान्। तत्र पतिते जले विलुण्ठनं कृतवान्। तेन मम अर्धं शरीरं सुवर्णमयम् अभवत्। अवशिष्टं शरीरं सुवर्णमयं कर्तुम्

अत्र आगतवान्। तथैव कृतवान् अपि, परन्तु तत् सुवर्णमयं न अभवत्। अहं **ब्राह्मणेभ्यः** न असूयामि, **महाराजाय** अपि न द्रुह्यामि" इति।

तत् श्रुत्वा सर्वे विस्मिताः अभवन्। स्वस्य दानविषये गर्वभावं वहतः युधिष्ठिरस्य गर्वभङ्गः अभवत्।

एतस्यां कथायां रक्तवर्णेन मुद्रितानि सर्वाणि रूपाणि चतुर्थीविभक्त्यन्तानि सन्ति।

एतानि चतुर्थीविभक्त्यन्तानि रूपाणि उच्चैः पठत जानीत च -

चतुर्थीविभक्तिः			
प्रातिपदिकम्	**एकवचनम्**	**द्विवचनम्**	**बहुवचनम्**
पाण्डव	पाण्डवाय	पाण्डवाभ्याम्	पाण्डवेभ्यः
क्षत्रिय	क्षत्रियाय	क्षत्रियाभ्याम्	क्षत्रियेभ्यः
सेना	सेनायै	सेनाभ्याम्	सेनाभ्यः
शाखा	शाखायै	शाखाभ्याम्	शाखाभ्यः
मही	मह्यै	महीभ्याम्	महीभ्यः
जननी	जनन्यै	जननीभ्याम्	जननीभ्यः
मित्र	मित्राय	मित्राभ्याम्	मित्रेभ्यः
मुख	मुखाय	मुखाभ्याम्	मुखेभ्यः

अधः लिखितानि वाक्यानि अवधानेन पठत -

१. माता **पुत्राय** आशीर्वादं ददाति।
२. गुरुः **शिष्याय** ज्ञानं ददाति।
३. कृष्णः **अर्जुनाय** उपदेशं ददाति।
४. दुर्योधनः **युधिष्ठिराय** राज्यं न ददाति।
५. भीमः **द्रौपद्यै** पुष्पं ददाति।
६. महर्षिः दुर्वासाः **कुन्त्यै** मन्त्रं ददाति।
७. पाण्डवाः **सज्जनेभ्यः** रक्षणं ददति।
८. कृषकाः **वृक्षेभ्यः** जलं ददति।

अभ्यासः

१. कथां पठित्वा उत्तराणि लिखत -

१. युधिष्ठिरः केभ्यः किं किं दत्तवान्? ---।
२. नकुलः किमर्थं स्वस्य पूर्वतनकथाम् उक्तवान्? ---।
३. ब्राह्मणः उञ्छवृत्तिं किमर्थम् आश्रितवान्? ---।
४. कुटुम्बजनाः किं वदन्तः कृष्णमेव स्मरन्ति स्म? ---।
५. सः सक्तून् नैवेद्यरूपेण कस्मै समर्पितवान्? ---।

६. कस्मै रक्षितस्य नैवेद्यस्य पादभागं कस्मै अर्पितवान् ? -- ।
७. ब्राह्मणी पतिं किम् उक्तवती ? -- ।
८. धर्मदेवः किमर्थम् आगतवान् ? -- ।
९. नकुलः केभ्यः न असूयति ? -- ।
१०. नकुलः कस्मै न द्रुह्यति ? -- ।

अवधेयम्

यत्र दानक्रिया भवति तत्र यस्मै दीयते तस्य चतुर्थीविभक्तिः भवति ।

२. श्रीकृष्णः कस्मै किं दत्तवान् इति अधस्तन-तालिकायाः साहाय्येन यथोदाहरणं लिखत -

श्रीकृष्णः	भक्तः अर्जुनः यशोदा पत्नी कुन्ती द्रौपदी मित्राणि कलत्राणि सर्वे	मोक्षः गीतोपदेशः मातृसुखम् कल्पवृक्षः परामर्शः अक्षयवस्त्रं नवनीतं उपहाराः आनन्दः	दत्तवान् ।

यथा - श्रीकृष्णः भक्ताय मोक्षं दत्तवान् ।

१. -- ।
२. -- ।
३. -- ।
४. -- ।
५. -- ।
६. -- ।
७. -- ।
८. -- ।

उच्चैः पठत जानीत च -

अजन्तपुंलिङ्गशब्दाः (चतुर्थीविभक्तिः)

प्रातिपदिकम्	एकवचनम्	द्विवचनम्	बहुवचनम्
नायक	नायकाय	नायकाभ्याम्	नायकेभ्यः
स्थितप्रज्ञ	स्थितप्रज्ञाय	स्थितप्रज्ञाभ्याम्	स्थितप्रज्ञेभ्यः
गन्धर्व	गन्धर्वाय	गन्धर्वाभ्याम्	गन्धर्वेभ्यः
कूर्म	कूर्माय	कूर्माभ्याम्	कूर्मेभ्यः
मुनि	मुनये	मुनिभ्याम्	मुनिभ्यः
कवि	कवये	कविभ्याम्	कविभ्यः
महर्षि	महर्षये	महर्षिभ्याम्	महर्षिभ्यः
प्रजापति	प्रजापतये	प्रजापतिभ्याम्	प्रजापतिभ्यः
शस्त्रपाणि	शस्त्रपाणये	शस्त्रपाणिभ्याम्	शस्त्रपाणिभ्यः
वायु	वायवे	वायुभ्याम्	वायुभ्यः
प्रभु	प्रभवे	प्रभुभ्याम्	प्रभुभ्यः
क्रतु	क्रतवे	क्रतुभ्याम्	क्रतुभ्यः
मुमुक्षु	मुमुक्षवे	मुमुक्षुभ्याम्	मुमुक्षुभ्यः
युयुत्सु	युयुत्सवे	युयुत्सुभ्याम्	युयुत्सुभ्यः
विभु	विभवे	विभुभ्याम्	विभुभ्यः
धाता	धात्रे	धातृभ्याम्	धातृभ्यः
विधाता	विधात्रे	विधातृभ्याम्	विधातृभ्यः
भ्राता	भ्रात्रे	भ्रातृभ्याम्	भ्रातृभ्यः

अजन्तनपुंसकलिङ्गशब्दाः (चतुर्थीविभक्तिः)

प्रातिपदिकम्	एकवचनम्	द्विवचनम्	बहुवचनम्
हृदय	हृदयाय	हृदयाभ्याम्	हृदयेभ्यः
दधि	दध्ने	दधिभ्याम्	दधिभ्यः

वारि	वारिणे	वारिभ्याम्	वारिभ्यः
मधु	मधुने	मधुभ्याम्	मधुभ्यः

अजन्तस्त्रीलिङ्गशब्दाः (चतुर्थीविभक्तिः)

प्रातिपदिकम्	**एकवचनम्**	**द्विवचनम्**	**बहुवचनम्**
देवता	देवतायै	देवताभ्याम्	देवताभ्यः
भाषा	भाषायै	भाषाभ्याम्	भाषाभ्यः
मेधा	मेधायै	मेधाभ्याम्	मेधाभ्यः
मति	मत्यै / मतये	मतिभ्याम्	मतिभ्यः
स्मृति	स्मृत्यै / स्मृतये	स्मृतिभ्याम्	स्मृतिभ्यः
श्रुति	श्रुत्यै / श्रुतये	श्रुतिभ्याम्	श्रुतिभ्यः
दैवी	दैव्यै	दैवीभ्याम्	दैवीभ्यः
नारी	नार्यै	नारीभ्याम्	नारीभ्यः
धेनु	धेन्वै	धेनुभ्याम्	धेनुभ्यः
तनु	तन्वै	तनुभ्याम्	तनुभ्यः
चमू	चम्वै	चमूभ्याम्	चमूभ्यः
माता	मात्रे	मातृभ्याम्	मातृभ्यः
दुहिता	दुहित्रे	दुहितृभ्याम्	दुहितृभ्यः
याता	यात्रे	यातृभ्याम्	यातृभ्यः

३. यथोदाहरणं चतुर्थीविभक्त्यन्तैः रूपैः रिक्तस्थानानि पूरयत -

	शब्दः	**एकवचनम्**	**द्विवचनम्**	**बहुवचनम्**
यथा - १.	**पुरुष**	**पुरुषाय**	**पुरुषाभ्याम्**	**पुरुषेभ्यः**
२.	क्षत्रिय	क्षत्रियाय	----------------	----------------
३.	सैनिक	----------------	सैनिकाभ्याम्	----------------
४.	**अरि**	**अरये**	**अरिभ्याम्**	**अरिभ्यः**
५.	समाधि	----------------	----------------	----------------

६. उपाधि	-----------------	-----------------	-----------------
७. पति	पत्ये	-----------------	-----------------
८. भूपति	भूपतये	-----------------	-----------------
९. गुरु	**गुरवे**	**गुरुभ्याम्**	**गुरुभ्यः**
१०. बन्धु	-----------------	-----------------	-----------------
११. कुरु	-----------------	-----------------	-----------------
१२. ऋतु	-----------------	-----------------	-----------------
१३. चिकीर्षु	-----------------	-----------------	-----------------
१४. कर्ता	**कर्त्रे**	**कर्तृभ्याम्**	**कर्तृभ्यः**
१५. धर्ता	-----------------	-----------------	-----------------
१६. भर्ता	-----------------	-----------------	-----------------
१७. हर्ता	-----------------	-----------------	-----------------
१८. श्रोता	-----------------	-----------------	-----------------
१९. लता	**लतायै**	**लताभ्याम्**	**लताभ्यः**
२०. माया	-----------------	-----------------	-----------------
२१. मुक्ति	**मुक्त्यै / मुक्तये**	**मुक्तिभ्याम्**	**मुक्तिभ्यः**
२२. विभूति	---------/---------	-----------------	-----------------
२३. भक्ति	---------/---------	-----------------	-----------------
२४. वीथि	---------/---------	-----------------	-----------------
२५. बुद्धि	---------/---------	-----------------	-----------------
२६. नदी	**नद्यै**	**नदीभ्याम्**	**नदीभ्यः**
२७. गौरी	-----------------	-----------------	-----------------
२८. रज्जु	**रज्ज्वै / रज्जवे**	**रज्जुभ्याम्**	**रज्जुभ्यः**
२९. धेनु	---------/---------	-----------------	-----------------
३०. तनु	---------/---------	-----------------	-----------------
३१. चमू	**चम्वै**	**चमूभ्याम्**	**चमूभ्यः**
३२. वधू	-----------------	-----------------	-----------------
३३. माता	**मात्रे**	**मातृभ्याम्**	**मातृभ्यः**
३४. स्वसा	-----------------	-----------------	-----------------
३५. ननान्दा	-----------------	-----------------	-----------------
३६. क्षेत्र	**क्षेत्राय**	**क्षेत्राभ्याम्**	**क्षेत्रेभ्यः**

३७. निर्वाण	-----------------	-----------------	-----------------
३८. मधु	**मधुने**	**मधुभ्याम्**	**मधुभ्यः**
३९. जानु	-----------------	-----------------	-----------------
४०. वस्तु	-----------------	-----------------	-----------------

४. कोष्ठके विद्यमानस्य पदस्य चतुर्थीविभक्त्यन्तेन रूपेण वाक्यानि पूरयत -

यथा - जरासन्धः (कृष्णार्जुनौ) **कृष्णार्जुनाभ्यां** युद्धाय अनुमतिं न दत्तवान्।

१. माता (कृष्णबलरामौ) ------------------------------------- मधुरं दत्तवती।

२. सान्दीपनिगुरुः (कृष्णकुचेलौ) -------------------------------- दण्डं ददाति।

३. च्यवन-ऋषिः (अश्विनीकुमारौ) ---------------------------- सोमरसं ददाति।

४. सनकादयः (द्वारपालौ) ------------------------------------- शापं दत्तवन्तः।

५. शबरी (रामलक्ष्मणौ) -------------------------------- बदरीफलानि ददाति।

६. श्रीरामः (पुत्रौ) -- पुरस्कारं दत्तवान्।

७. भक्तः (भिक्षुकौ) -- अन्नं दत्तवान्।

८. सेनापतिः (सेने) -------------------------------------- आयुधानि दत्तवान्।

९. श्रीकृष्णः (पत्न्यौ) -------------------------------------- उपायनं दत्तवान्।

१०. पिता (पुत्र्यौ) -- सान्त्वनां दत्तवान्।

५. यथोदाहरणं रिक्तस्थानानि पूरयत -

यथा - भीष्मः (पाण्डवाः) **पाण्डवेभ्यः** आशीर्वादं ददाति।

१. कुन्ती (पाण्डुपुत्राः) ---------------------------- भोजनं ददाति।

२. सेनापतिः कर्णः (सैनिकाः) ------------------ निर्देशम् अददात्।

३. गान्धारी (राजसेविकाः) -------------------- पुरस्कारं दास्यति।

४. द्रोणाचार्यः (योद्धारः) ------------------------ प्रशिक्षणं ददाति।

५. धृतराष्ट्रः (कौरवाः) -------------------- गुह्यसूचनाम् अददात्।

६. बृहन्नला (नर्तक्यः) ---------------- नृत्यकलाप्रशिक्षणं ददाति।

७. पाञ्चाली (स्वपुत्राः) ------------------- सत्प्रेरणाम् अयच्छत्।

६. उदाहरणं दृष्ट्वा त्रीणि वाक्यानि लिखत -

यथा - भ्राता **अनुजाय** फलं ददाति, भ्राता **अनुजाभ्यां** फलं ददाति, भ्राता **अनुजेभ्यः** फलं ददाति।

१. महाराजः सेवकाय आभरणं ददाति, --

--।

२. शिष्यः आचार्याय गुरुदक्षिणां ददाति, --

-- ।

३. माता पुत्र्यै वस्त्रं ददाति, --

-- ।

अवधेयम्

सर्वनामशब्दानां चतुर्थीविभक्त्यन्तानि रूपाणि सावधानं पठत अवगच्छत च -

पुंलिङ्गरूपाणि			
प्रातिपदिकम्	एकवचनम्	द्विवचनम्	बहुवचनम्
तत्	तस्मै	ताभ्याम्	तेभ्यः
एतत्	एतस्मै	एताभ्याम्	एतेभ्यः
किम्	कस्मै	काभ्याम्	केभ्यः
इदम्	अस्मै	आभ्याम्	एभ्यः
सर्व	सर्वस्मै	सर्वाभ्याम्	सर्वेभ्यः
अन्य	अन्यस्मै	अन्याभ्याम्	अन्येभ्यः
भवत्	भवते	भवद्भ्याम्	भवद्भ्यः

स्त्रीलिङ्गरूपाणि		
एकवचनम्	द्विवचनम्	बहुवचनम्
तस्यै	ताभ्याम्	ताभ्यः
एतस्यै	एताभ्याम्	एताभ्यः
कस्यै	काभ्याम्	काभ्यः
अस्यै	आभ्याम्	आभ्यः
सर्वस्यै	सर्वाभ्याम्	सर्वाभ्यः
अन्यस्यै	अन्याभ्याम्	अन्याभ्यः
भवत्यै	भवतीभ्याम्	भवतीभ्यः

सूचना - (नपुंसकलिङ्गे रूपाणि पुंलिङ्गवत् भवन्ति)

अस्मद् - त्रिषु लिङ्गेषु	मह्यम्	आवाभ्याम्	अस्मभ्यम्
युष्मद् - त्रिषु लिङ्गेषु	तुभ्यम्	युवाभ्याम्	युष्मभ्यम्

सूचना : अस्मद्-युष्मद्-सर्वनामशब्दयोः रूपाणि त्रिषु लिङ्गेषु समानानि भवन्ति ।

७. कोष्ठके विद्यमानस्य सर्वनामशब्दस्य चतुर्थीविभक्त्यन्तेन रूपेण यथोदाहरणं रिक्तस्थानानि पूरयत -

यथा - द्रोणाचार्यः गुरुः अस्ति । **तस्मै** (सः) गां ददातु ।

१. भीमः अस्ति । (सः) ------------------------------ विषमोदकं ददातु ।

२. कृष्णबलरामौ आगतवन्तौ । (तौ) ------------------- सम्माननं ददातु ।

३. पाण्डवानाम् अज्ञातवासः समाप्तः । (ते) ----------------- राज्यं ददातु ।

४. गान्धारी अस्ति । (एषा) ---------------------------- अपि ज्ञानं ददातु ।

५. कुन्तीद्रौपद्यौ स्तः । (एते) ------------------------------- उपदेशं ददातु ।

६. सेनाः सन्ति । (एताः) ------------------------------------ आज्ञां ददातु ।

७. अहम् अस्मि। (अहम्) --------------------------- सेनापतिपदं ददातु।
८. दुर्योधनः (त्वम्) ---------------- अङ्गराज्यं ददाति इति अहं वदामि।

तादर्थ्ये चतुर्थी

८. यथोदाहरणं वाक्यानि लिखत -

यथा - द्रुपदः --------- (सैनिकः) सैन्यवेषम् आनयति।
द्रुपदः **सैनिकाय** सैन्यवेषम् आनयति।

द्रुपदः	१. ------------------------------ (पुत्र) चापः	आनयति
	२. ------------------------------ (पुत्री) शिबिका	
	३. ------------------------------ (पत्नी) आभरणम्	
	४. ------------------------------ (माता) शाटिकाम्	
द्रुपदः	५. ------------------------------ (मित्रम्) फलम्	आनयति
	६. ------------------------------ (गुप्तचरः) अश्वः	
	७. ------------------------------ (भ्रमणम्) रथः	
	८. ------------------------------ (आरोग्यम्) औषधम्	

अवधेयम्

तादर्थ्ये चतुर्थी - कार्यं यस्य निमित्तं यदर्थं वा भवति, तस्य चतुर्थीविभक्तिः भवति। एषा एव '**तादर्थ्यचतुर्थी**' इति कथ्यते। यथा - पिता **पुत्राय** वस्त्रम् आनयति।
(अत्र पितुः वस्त्रानयस्य उद्देशः पुत्रः। अतः तस्य चतुर्थीविभक्तिः।)

किमर्थम्

९. यथोदाहरणं रिक्तस्थानानि पूरयत -

यथा - जनाः **किमर्थं** कर्माणि कुर्वन्ति ? **सुखाय** (सुखम्)
१. भक्ताः किमर्थं कीर्तनं कुर्वन्ति ? ------------------------ (आनन्दः)
२. छात्राः किमर्थं पठन्ति ? ------------------------ (ज्ञानम्)
३. भ्रातरः किमर्थं गच्छन्ति ? ------------------------ (पाठनम्)
४. साधवः किमर्थं जीवन्ति ? ------------------------ (परोपकारम्)
५. पर्यटकाः किमर्थम् आगच्छन्ति ? ------------------------ (भ्रमणम्)
६. गौः किमर्थं पालनीया ? ------------------------ (पूजनम्)
७. ऋषयः प्राणायामं किमर्थं कुर्वन्ति ? ------------------------ (आत्मशुद्धिः)

८. भक्ताः देवपरिक्रमां किमर्थं कुर्वन्ति ? ------------------------ (भक्तिप्राप्तिः)
९. सर्वैः तर्पणं किमर्थं कर्तव्यम् ? ------------------------ (वंशवृद्धिः)
१०. मुनयः किमर्थं तपः आचरन्ति ? ------------------------ (मुक्तिः)
११. मोहनः वृक्षं किमर्थम् आरोहति ? ------------------------ (फलत्रोटनम्)
१२. बालकः वाराणसीं किमर्थं गतवान् ? ------------------------ (ज्ञानार्जनम्)
१३. पिता विदेशं किमर्थं गच्छति ? ------------------------ (धनार्जनम्)
१४. माता दरिद्रान् किमर्थं भोजयति ? ------------------------ (पुण्यम्)
१५. पुत्रौ किमर्थं कलहं कुरुतः ? ------------------------ (क्रीडनम्)
१६. पुत्र्यौ किमर्थं धावतः ? ------------------------ (लक्ष्यस्पर्शनम्)
१७. मित्रे किमर्थम् आगच्छतः ? ------------------------ (मेलनम्)
१८. साधवः यत्र तत्र किमर्थं व्रजन्ति ? ------------------------ (धर्मप्रचारः)
१९. भक्ताः मन्दिरं किमर्थं गच्छन्ति ? ------------------------ (देवदर्शनम्)
२०. तरवः किमर्थं फलन्ति ? ------------------------ (परोपकारः)

'रोचते' इति क्रियापद-प्रयोगे चतुर्थी

१०. यथोदाहरणं वाक्यानि लिखत पठत च -

यथा -	भीमः	युद्धम्	**भीमाय** युद्धं रोचते ।
	युधिष्ठिरः	राज्यम्	१. -- ।
	अर्जुनः	द्वारका	२. -- ।
	नकुलः	सेवा	३. -- ।
	अभिमन्युः	शस्त्राभ्यासः	४. -- ।
	विदुरः	भक्तिः	५. -- ।
	धनञ्जयः	गाण्डीवम्	६. -- ।
	भवान्	किम्	७. -- ?
	त्वम्	किम्	८. -- ?
	अहम्	मधुरम्	९. -- ।
	सर्वे	भारतम्	१०. -- ।

'नमः' इत्यस्य प्रयोगे चतुर्थी

११. यथोदाहरणं वाक्यानि लिखत -

यथा - (कृष्णः) कृष्णाय नमः ।

१. (नारायणः) -------------------- नमः । २. (देवकीनन्दनः) -------------------- नमः ।

३. (शारदा)	---------------------- नमः।	१०. (राधाकृष्णौ)	---------------------- नमः।
४. (वामनः)	---------------------- नमः।	११. (उमामहेश्वरौ)	---------------------- नमः।
५. (गणपतिः)	---------------------- नमः।	१२. (देवाः)	---------------------- नमः।
६. (राधा)	---------------------- नमः।	१३. (ऋषयः)	---------------------- नमः।
७. (दुर्गा)	---------------------- नमः।	१४. (देव्यः)	---------------------- नमः।
८. (सरस्वती)	---------------------- नमः।	१५. (गोमातरः)	---------------------- नमः।
९. (महालक्ष्मीः)	---------------------- नमः।		

अवधेयम्

➢ **'रोचते'** इत्यस्य प्रयोगे यस्मै रोचते तस्य चतुर्थीविभक्तिः भवति। यत् रोचते तस्य तु प्रथमाविभक्तिः एव। यथा - **भीमाय** मधुरं रोचते। **अर्जुनाय** शुश्रूषा रोचते।

➢ **'नमः'** इति शब्दस्य योगः यत्र तस्य पदस्य चतुर्थीविभक्तिः भवति।
यथा - **गुरवे** नमः। **गुरुभ्यः** नमः।

क्रुध्यति / ईर्ष्यति / द्रुह्यति / असूयति

१२. कः कस्मै क्रुध्यति, ईर्ष्यति, द्रुह्यति, असूयति वा इति यथोदाहरणं वाक्यानि लिखत -

यथा -	धृतराष्ट्रः - भीमः - क्रुध्यति।	धृतराष्ट्रः **भीमाय** क्रुध्यति।
१.	कंसः - कृष्णः - क्रुध्यति।	--- ।
२.	मेघनादः - लक्ष्मणः - क्रुध्यति।	--- ।
३.	मूर्खः - हितोपदेशकः - क्रुध्यति।	--- ।
४.	दुर्जनः - पत्नी - क्रुध्यति।	--- ।
५.	कौरवाः - पाण्डवाः - ईर्ष्यन्ति।	--- ।
६.	दैत्याः - देवाः - ईर्ष्यन्ति।	--- ।
७.	दुर्जनाः - सज्जनाः - ईर्ष्यन्ति।	--- ।
८.	निर्धनाः - धनिकाः - ईर्ष्यन्ति।	--- ।
९.	बकासुरः - कृष्णः - द्रुह्यति।	--- ।
१०.	दुर्योधनः - कृष्णः - द्रुह्यति।	--- ।
११.	द्रोणादयः - अभिमन्युः - द्रुह्यन्ति।	--- ।
१२.	भिक्षुकः - धनिकः - असूयति।	--- ।
१३.	अज्ञः - प्राज्ञः - असूयति।	--- ।

१४. धूर्तः - अर्चकः - असूयति । -- ।

१५. शिशुपालः - कृष्णः - असूयति । -- ।

अवधेयम्

क्रुध्यति (कुप्यति), ईर्ष्यति, द्रुह्यति, असूयति इत्येतेषां प्रयोगः यत्र क्रियते तत्र क्रोधादीनां पात्रस्य चतुर्थीविभक्तिः भवति ।
यथा - राकेशः **पुत्राय क्रुध्यति (कुप्यति) / ईर्ष्यति / द्रुह्यति / असूयति** ।

१३. यथोदाहरणं वाक्यानि लिखत -

'कल्पतेः' इत्यस्य प्रयोगे चतुर्थी

१. ध्यानम्	शान्तिः	कल्पते
२. परोपकारः	सेवा	
३. परधर्मः	भयम्	
४. ज्ञानम्	मोक्षः	
५. जलम्	जीवनम्	
६. विद्या	ज्ञानम्	
७. धनम्	दानम्	
८. शक्तिः	रक्षणम्	
९. विषयध्यानम्	विनाशः	
१०. कृष्णदर्शनम्	आनन्दः	

१. ध्यानं **शान्त्यै** कल्पते ।
२. ---------------------------------- ।
३. ---------------------------------- ।
४. ---------------------------------- ।
५. ---------------------------------- ।
६. ---------------------------------- ।
७. ---------------------------------- ।
८. ---------------------------------- ।
९. ---------------------------------- ।
१०. ---------------------------------- ।

१४. अधः सूचितेषु श्लोकेषु यानि चतुर्थीविभक्त्यन्तरूपाणि सन्ति तानि रिक्तस्थलेषु लिखत -

नमो नमस्तेऽखिलकारणाय निष्कारणायाद्भुतकारणाय ।
सर्वागमाम्नायमहार्णवाय नमोऽपवर्गाय परायणाय ॥

कृष्णाय वासुदेवाय हरये **परमात्मने** ।
प्रणतक्लेशनाशाय गोविन्दाय नमो नमः ॥

नमः शान्ताय घोराय मूढाय **गुणधर्मिणे** ।
निर्विशेषाय साम्याय नमो ज्ञानघनाय च ॥

प्रपन्नपारिजाताय तोत्रवेत्रैकपाणये ।
ज्ञानमुद्राय कृष्णाय **गीतामृतदुहे** नमः ॥

परित्राणाय साधूनां विनाशाय च दुष्कृताम् ।
धर्मसंस्थापनार्थाय सम्भवामि युगे युगे ॥

रौद्रायै नमो नित्यायै गौर्यै धात्र्यै नमो नमः ।
ज्योत्स्नायै चेन्दुरूपिण्यै सुखायै सततं नमः ॥

----

१५. कोष्ठकस्य साहाय्येन गीताश्लोकान् परिशीलय रिक्तस्थानानि पूरयत -

१. सङ्करः कुलघ्नानां कुलस्य च ---------------------------- एव भवति । (१.४२)
२. सः ------------------------------ कल्पते । (२.१५)
३. तस्मात् ------------------------- कृतनिश्चयः उत्तिष्ठ । (२.३७)
४. तस्मात् ------------------------- युज्यस्व । (२.५०)
५. तैः दत्तान् ------------------- अप्रदाय यः भुङ्क्ते सः स्तेनः एव । (३.१२)
६. विवस्वान् -------------------------- प्राह । (४.१)
७. मनुः ---------------------------- अब्रवीत् । (४.१)
८. साधूनां ----------------------------, दुष्कृतां च -----------------------,
---------------------------------- च युगे युगे सम्भवामि । (४.८)
९. योगिनः सङ्गं त्यक्त्वा ----------------------------- कर्म कुर्वन्ति । (५.११)
१०. मनः एकाग्रं कृत्वा ----------------------------- योगं युञ्ज्यात् । (६.१२)
११. मनुष्याणां सहस्रेषु कश्चित् ----------------------- यतति । (७.३)
१२. माम् आश्रित्य -- यतन्ति । (७.२९)
१३. अहं ---------------------------- ते हितकाम्यया वक्ष्यामि । (१०.१)
१४. ------------------------------ त्वया यत् उक्तं तेन मम मोहः विगतः । (११.१)
१५. हरिः परमम् ऐश्वरं रूपं ---------------------- दर्शयामास । (११.९)
१६. समृद्धवेगाः लोकाः तव वक्त्राणि -------------------- विशन्ति । (११.२९)
१७. मद्भक्तः एतत् विज्ञाय --------------------------- उपपद्यते । (१३.१८)
१८. सः --------------------------- कल्पते । (१४.२६)
१९. अल्पबुद्धयः जगतः -------------------------- प्रभवन्ति । (१६.९)
२०. ------------------------ यत् दानं दीयते तत् तामसम् । (१७.२२)
२१. कदाचन ---------------------------------- न वाच्यम् । (१८.६७)

तत्र श्रीः विजयः

अव्ययानि

३४

एतां कथाम् उच्चैः पठत -

अव्ययानि

पुरा यदा श्रीकृष्णः मध्याह्ने विश्रान्तिं स्वीकुर्वन् आसीत् **तदा** दुर्योधनः अर्जुनः **च** तस्य प्रासादम् आगतवन्तौ। दुर्योधनः **किञ्चित्** कालं **पूर्वम्** आगतवान्। अहङ्कारी सः कृष्णस्य मस्तकस्य **समीपे** स्थितवान्। अर्जुनः **तु** सुशीलः विनम्रः **च** आसीत्। **अतः** सः श्रीकृष्णस्य चरणयोः **समीपे** स्थितवान्। **यदा** श्रीकृष्णः जागरितः **तदा** सर्वप्रथमं सः अर्जुनं दृष्टवान्। **यदा च** सः मुखं परिवर्तितवान् दुर्योधनम् **अपि** दृष्टवान्। तौ द्वौ **तत्र किमर्थम्** आगतवन्तौ **इति** कृष्णः **ज्ञातुम्** इष्टवान्।

अर्जुनः उक्तवान् - "भगवन्! **शीघ्रम् एव** युद्धारम्भः भविष्यति **इति** भवान् जानाति **एव। तदर्थम्** अहं भवन्तम् इच्छामि" **इति**। दुर्योधनः कथितवान्-"अहम् **अपि** भवतः साहाय्यं **स्वीकर्तुम्** इच्छामि। अहं तस्य अपेक्षया **पूर्वम्** आगतवान्, **अतः** भवान् पूर्वं मम इच्छां पूरयतु" **इति**। श्रीकृष्णः प्रत्युत्तरं दत्तवान् - "भवान् **पूर्वम्** आगतवान् **इति सत्यम् एव। तथापि** अहं तु अर्जुनं **पूर्वं** दृष्टवान्। **अतः** तस्मै प्रथमम् अवसरं दास्यामि।

अर्जुनः **अतीव** आनन्देन कृष्णम् उक्तवान् - "अहं भवन्तम् इच्छामि" **इति**। दुर्योधनः चिन्तितवान् "अर्जुनः कीदृशः मूर्खः अस्ति ? सः कृष्णम् एव **इच्छति**" इति। श्रीकृष्णः स्पष्टीकृतवान्- "भवान् माम् इच्छति। **परम्** अहं युद्धं **न** करिष्यामि। **केवलं** भवतः सारथिः भविष्यामि। युवयोः द्वयोः एकतरस्य **समीपे** अहं भविष्यामि, अपरस्य **समीपे च** मम सैन्यं भविष्यति" **इति**।

दुर्योधनः चिन्तितवान् **यत्** "एकाकी कृष्णः शस्त्रैः **विना किं** करिष्यति ?" **इति**। अतः 'मम कृते सैन्यम् एव ददातु' इति उक्तवान्।

अर्जुनः श्रीकृष्णस्य परमभक्तः आसीत्, **अतः** अर्जुनस्य श्रीकृष्णे पूर्णः विश्वासः आसीत्। **यत्र** श्रीकृष्णः भविष्यति तस्य पक्षस्य **एव** विजयः भविष्यति **इति** सः **सम्यक्** ज्ञातवान्। तस्मात् सः योगेश्वरं चितवान्। दुर्योधनः अविवेकी आसीत्, तस्मात् सः सेनां **स्वीकर्तुम्** इष्टवान्।

गीतायाः अन्तिमश्लोके अपि तदेव प्रतिपादितं वर्तते -

यत्र योगेश्वरः कृष्णो **यत्र** पार्थो धनुर्धरः।
तत्र श्रीर्विजयो भूतिर्ध्रुवा नीतिर्मतिर्मम ॥

अवधेयम्

त्रिषु लिङ्गेषु, सप्तसु विभक्तिषु, त्रिषु वचनेषु च यत् विकारं न प्राप्नोति तत् अव्ययम्।

सदृशं त्रिषु लिङ्गेषु सर्वासु च विभक्तिषु।
वचनेषु च सर्वेषु यन्न व्येति तदव्ययम्॥

➤ **त्रिषु लिङ्गेषु**

अर्जुनः **अपि** इच्छति। कुन्ती **अपि** इच्छति। सैन्यम् **अपि** इच्छति।

➤ **सप्तसु विभक्तिषु**

अर्जुनः **अपि** पश्यति। अर्जुनम् **अपि** वदामः। अर्जुनेन सह कर्णः **अपि** युद्ध्यते।
अर्जुनाय **अपि** द्रुह्यति। अर्जुनात् **अपि** श्रेष्ठः धनुर्धरः नास्ति।
अर्जुनस्य **अपि** बान्धवाः कौरवाः। अर्जुने **अपि** कृष्णः विश्वसिति।

त्रिषु वचनेषु

राजा अपि आनन्दितः भवति।
राजानौ अपि आनन्दितौ भवतः।
राजानः अपि आनन्दिताः भवन्ति।

यदा-तदा, यथा-तथा, यत्र-तत्र इत्यादीनि नित्यसम्बद्धानि अव्ययानि। अर्थात् यस्मिन् वाक्ये **'यदा'** इत्यस्य प्रयोगः भवति तस्मिन् वाक्ये **'तदा'** इत्यस्य अपि प्रयोगः भवति।

यदा-तदा

- **यदा** मनुष्यः सर्वान् कामान् प्रजहाति **तदा** सः स्थितप्रज्ञः उच्यते।
  यदा बुद्धिः मोहकलिलम् अपाकरोति **तदा** सा निश्चला भवति।

अभ्यासः

१. 'यदा-तदा' अव्यययोः योजनेन वाक्यानि रचयत -

यथा - युयुत्सवः समवेताः। ते किम् अकुर्वत? **यदा** युयुत्सवः समवेताः **तदा** ते किम् अकुर्वत?

१. कुलक्षयः भवति। कुलधर्माः प्रणश्यन्ति।
---।

२. दुर्योधनः पाण्डवसैन्यं दृष्टवान्। आचार्यम् उक्तवान्।
---।

३. भेरीनादः जातः। तुमुलः ध्वनिः उत्पन्नः।
---।

४. युद्धार्थं सर्वे व्यवस्थिताः । पार्थः विषादं न्यवेदयत् ।

-- ।

५. इन्द्रियाणि संहरति । मनुष्यस्य प्रज्ञा प्रतिष्ठिता भवति ।

-- ।

६. बुद्धिनाशः भवति । सर्वं प्रणश्यति ।

-- ।

७. सर्वभूतानां निशा भवति । संयमी जागर्ति ।

-- ।

८. धर्मस्य ग्लानिः भवति । प्रभुः आत्मानं सृजति ।

-- ।

९. अज्ञाननाशः जायते । ज्ञानं परं प्रकाशयति ।

-- ।

१०. चित्तम् आत्मनि स्थिरं भवति । योगी युक्तः कथ्यते ।

-- ।

११. देवः विश्वरूपम् अदर्शयत् । तस्मिन् पार्थः समग्रं विश्वम् अपश्यत् ।

-- ।

१२. पुरुषः सर्वभूतेषु एकत्वं पश्यति । सः ब्रह्मभावं समाप्नोति ।

-- ।

एतानि वाक्यानि श्लोकं च उच्चैः पठत -

यथा-तथा

- **यथा** नदीनदाः सर्वे सागरे यान्ति संस्थितिम् ।
  तथैवाश्रमिणः सर्वे गृहस्थे यान्ति संस्थितिम् ॥
- **यथा** पूर्वैः मुमुक्षुभिः कर्म कृतं **तथा** एव त्वम् अपि कुरु ।
- **यथा** प्रज्ज्वलितः अग्निः काष्ठान् भस्मसात् कुरुते **तथा** ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुते ।
- **यथा** आत्मा आत्मनः बन्धुः **तथा** एव सः आत्मनः रिपुः अपि भवति ।
- **यथा** गुरुः **तथा** शिष्यः ।
- **यथा** पाण्डवाः सज्जनाः **तथा** कर्णः न आसीत् ।

२. 'यथा-तथा' अव्ययोः योजनेन यथोदाहरणं वाक्यानि पूरयत -

यथा - ---- अस्माकं बलम् अस्ति ----- पाण्डवानां नास्ति ।

यथा अस्माकं बलम् अस्ति **तथा** पाण्डवानां नास्ति ।

१. ----------- मनुष्यः नवीनानि वस्त्राणि धरति ----------- आत्मा नवीनानि शरीराणि धरति ।

२. ----------- नदी समुद्रं प्रविशति ----------- सर्वे कामाःयं प्रविशन्ति सः शान्तिम् आप्नोति ।

३. ----------- श्रेष्ठाः आचरन्ति ----------- सामान्याः अनुकुर्वन्ति ।

४. ----------- अनश्नतः योगः नास्ति ----------- स्वप्नशीलस्य अपि नास्ति।

५. -----------. आकाशे वायुः भवति ----------- ईश्वरे सर्वभूतानि भवन्ति।

६. --------- पतङ्गा अग्निं प्रविशन्ति ----------- जनाः कृष्णमुखं प्रविशन्ति इति अर्जुनः अपश्यत्।

७. ----------- रविः विश्वं प्रकाशयति ----------- क्षेत्री क्षेत्रं प्रकाशयति।

३. यथोदाहरणं समुचितं पदं संयोज्य वाक्यानि पूरयत -

यथा - यथा राजा आज्ञां ददाति **तथा न सामान्यः** ।

१. यथा हंसः नीरक्षीरविवेके निपुणः	क - तथा न अन्ये।
२. यथा कालिदासस्य उपमा प्रसिद्धा	ख - तथा न अन्या ।
३. यथा माता गृहकार्येषु दक्षा भवति	ग - तथा न अन्यः।
४. यथा ईश्वरस्य इच्छा बलीयसी भवति	घ - तथा न अन्यस्य कवेः।
५. यथा सज्जनाः परोपकारशीलाः भवन्ति	ङ - तथा न अन्येषु।
६. यथा स्फटिकं स्वच्छं भवति	च - तथा न अन्यस्य।
७. यथा संगणकयन्त्रं शीघ्रं गणनां करोति	छ - तथा न अन्यः पक्षी।
८. यथा उत्तमवक्ता भाषणं करोति	ज - तथा न अन्यत् किमपि।
९. यथा सैनिकेषु धैर्यं भवति	झ - तथा न अन्यत् यन्त्रम्।

एतं श्लोकम् उच्चैः पठत -

धूमेनाव्रियते वह्निर्यथादर्शो मलेन च।
यथोल्बेनावृतो गर्भस्तथा तेनेदमावृतम्॥

धूमेन आव्रियते वह्निः **यथा** आदर्शो मलेन च।
यथा उल्बेन आवृतो गर्भः **तथा** तेन इदम् आवृतम्

यत्र-तत्र

- **यत्र** तडागः भवति **तत्र** राजहंसाः अपि भवन्ति।
- **यत्र** सुवृष्टिः भवति **तत्र** सस्यानि सम्यक् भवन्ति।
- **यत्र** वृक्षाः भवन्ति **तत्र** सुवृष्टिः भवति।
- **यत्र** बालाः भवन्ति **तत्र** कोलाहलः भवति।
- **यत्र** मूर्खाः भवन्ति **तत्र** कलहः भवति।

४. यथोदाहरणं 'यत्र-तत्र' इति अव्ययद्वयस्य योजनं कृत्वा प्रदत्तानां शब्दानां साहाय्येन वाक्यानि रचयत -

यथा - श्रीकृष्णः - विजयः **यत्र श्रीकृष्णः अस्ति तत्र विजयः अस्ति।**

१. धूमः - अग्निः --।

२. लोभः - पापम् --।

३. भक्तः - देवः -- ।

४. लम्पटः - अशान्तिः -- ।

५. कोकिला - कलगानम् -- ।

६. रुग्णः - चिकित्सकः -- ।

७. सुखम् - सन्तोषः -- ।

८. अधर्मः - पराजयः -- ।

९. यन्त्रागाराणि - प्रदूषणम् -- ।

एतत् लघु सम्भाषणम् उच्चैः पठत -

किन्तु/निश्चयेन/प्रायशः/खलु/अपेक्षया

सुरेशः अहं प्रातः विलम्बेन उत्थितवान् । **प्रायशः** अद्य विलम्बः भवेत् । अहं गीतावर्गं गन्तुम् इच्छामि, किन्तु बसयानं न आगच्छति । किं करोमि ?

गणेशः बसयानस्य **अपेक्षया** द्विचक्रिकया गच्छतु ।

सुरेशः **किन्तु** यदि तदर्थं गृहं गच्छामि तर्हि विलम्बः भवेत् खलु ? अस्तु । अहं मम वाहनम् आनयामि । (सुरेशः आगत्य ....)

सुरेशः आगच्छतु । चिन्ता मास्तु । **निश्चयेन** पञ्चनिमेषेभ्यः पूर्वं तत्र प्राप्स्यामः ।

५. किन्तु, निश्चयेन, प्रायशः, खलु, अपेक्षया इत्येतेषु उचितम् अव्ययं स्वीकृत्य रिक्तस्थानानि पूरयत -

यथा - कर्णः वीरः आसीत् । **किन्तु** तस्य वाणीसंयमः न आसीत् ।

१. दुर्योधनः धर्मं जानाति स्म । ------------------------ तस्मिन् तस्य प्रवृत्तिः न आसीत् ।

२. धृतराष्ट्रः उचितं जानाति स्म । ------------------------ सः पुत्रमोहेन वक्तुं न अशक्नोत् ।

३. अग्रे समयः नास्ति । अतः अद्य -------------------- सङ्कल्पितं कार्यं पूर्णं करोमि ।

४. अधुना ------------------------ जनाः नगरेषु वस्तुम् इच्छन्ति ।

५. आकाशे मेघाः सन्ति । वृष्टिः भविष्यति ------------------------ ?

६. बलरामस्य -------------------- कृष्णः सौम्यः आसीत् ।

७. धनस्य ---------------------- उत्तमविचाराणां संग्रहं कुर्मः ।

८. तद् एकं वद येन अहं ---------------------- श्रेयः आप्नुयाम् ।

९. संन्यासस्य -------------------- कर्म श्रेष्ठं भवति ।

१०. देवः सद्भक्तानां योगक्षेमं ---------------------- वहति ।

अभ्यासेन तु कौन्तेय !

तृतीयाविभक्तिः **३५**

उच्चैः पठत अवगच्छत च -

असंशयं महाबाहो मनो दुर्निग्रहं चलम्।
अभ्यासेन तु कौन्तेय वैराग्येण च गृह्यते ॥श्रीमद्भग. ६.३५॥

पदच्छेदः - असंशयम्, महाबाहो, मनः, दुर्निग्रहम्, चलम्, अभ्यासेन, तु, कौन्तेय, वैराग्येण, च, गृह्यते ॥

अन्वयः - महाबाहो ! असंशयं मनः दुर्निग्रहं चलम्। कौन्तेय ! **अभ्यासेन** तु **वैराग्येण** च गृह्यते।

पश्यैतां पाण्डुपुत्राणामाचार्य महतीं चमूम्।
व्यूढां द्रुपदपुत्रेण तव शिष्येण धीमता ॥श्रीमद्भग. १.३॥

पदच्छेदः - पश्य, एताम्, पाण्डुपुत्राणाम्, आचार्य, महतीम्, चमूम्, व्यूढाम्, द्रुपदपुत्रेण, तव, शिष्येण, धीमता ॥

अन्वयः - भोः आचार्य ! तव **धीमता शिष्येण द्रुपदपुत्रेण** व्यूढां पाण्डुपुत्राणाम् एतां महतीं चमूं पश्य।

यत्साङ्ख्यैः प्राप्यते स्थानं तद्योगैरपि गम्यते।
एकं साङ्ख्यं च योगं च यः पश्यति स पश्यति ॥श्रीमद्भग. ५.५॥

पदच्छेदः - यत्, साङ्ख्यैः, प्राप्यते, स्थानम्, तत्, योगैः, अपि, गम्यते। एकम्, साङ्ख्यम्, च, योगम्, च, यः, पश्यति, सः, पश्यति ॥

अन्वयः - यत् स्थानं **साङ्ख्यैः** प्राप्यते तत् **योगैः** अपि गम्यते। यः साङ्ख्यं च योगं च एकं पश्यति सः पश्यति।

निर्मानमोहा जितसङ्गदोषा अध्यात्मनित्या विनिवृत्तकामाः।
द्वन्द्वैर्विमुक्ताः सुखदुःखसञ्ज्ञैर्गच्छन्त्यमूढाः पदमव्ययं तत् ॥श्रीमद्भग. १५.५॥

पदच्छेदः - निर्मानमोहाः, जितसङ्गदोषाः, अध्यात्मनित्याः, विनिवृत्तकामाः। द्वन्द्वैः, विमुक्ताः, सुखदुःखसञ्ज्ञैः, गच्छन्ति, अमूढाः पदम्, अव्ययम्, तत् ॥

अन्वयः - निर्मानमोहाः जितसङ्गदोषाः अध्यात्मनित्याः विनिवृत्तकामाः **सुखदुःखसञ्ज्ञैः द्वन्द्वैः** विमुक्ताः अमूढाः तत् अव्ययं पदं गच्छन्ति।

अथवा बहुनैतेन किं ज्ञातेन तवार्जुन।
विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगत् ॥श्रीमद्भग. १०.४२॥

पदच्छेदः - अथवा, बहुना, एतेन, किम्, ज्ञातेन, तव, अर्जुन। विष्टभ्य, अहम्, इदम्, कृत्स्नम्, एकांशेन, स्थितः, जगत् ॥

अन्वयः - अर्जुन ! अथवा **एतेन बहुना ज्ञातेन** तव किम् ? अहम् इदं कृत्स्नं जगत् **एकांशेन** **विष्टभ्य** स्थितः।

श्रद्धया परया तप्तं तपस्तत् त्रिविधं नरैः।
अफलाकाङ्क्षिभिर्युक्तैः सात्त्विकं परिचक्षते ॥श्रीमद्भग. १७.१७॥

पदच्छेदः - श्रद्धया, परया, तप्तम्, तपः, तत्, त्रिविधम्, नरैः । अफलाकाङ्क्षिभिः, युक्तैः, सात्त्विकम्, परिचक्षते ॥

अन्वयः - **अफलाकाङ्क्षिभिः युक्तैः नरैः परया श्रद्धया** तप्तं त्रिविधं तत् तपः सात्त्विकं परिचक्षते ।

नाहं वेदैर्न तपसा न दानेन न चेज्यया ।

शक्य एवंविधो द्रष्टुं दृष्टवानसि मां यथा ॥श्रीमद्भग. ११.५३॥

पदच्छेदः - न, अहम्, वेदैः, न, तपसा, न, दानेन, न, च, इज्यया । शक्यः, एवंविधः, द्रष्टुम्, दृष्टवान्, असि, माम्, यथा ॥

अन्वयः - अहम् एवंविधः **वेदैः** न, **तपसा** न, **दानेन** न, **इज्यया** च न द्रष्टुं शक्यः यथा मां दृष्टवान् असि ।

भक्त्या त्वनन्यया शक्य अहमेवंविधोऽर्जुन ।

ज्ञातुं द्रष्टुं च तत्त्वेन प्रवेष्टुं च परन्तप ॥श्रीमद्भग. ११.५४॥

पदच्छेदः - भक्त्या, तु, अनन्यया, शक्यः, अहम्, एवंविधः, अर्जुन । ज्ञातुम्, द्रष्टुम्, च, तत्त्वेन, प्रवेष्टुम्, च, परन्तप ॥

अन्वयः - परन्तप, अर्जुन ! अहम् **अनन्यया भक्त्या** तु एवंविधः **तत्त्वेन** ज्ञातुं द्रष्टुं च प्रवेष्टुं च शक्यः ।

उपरि प्रदत्तेभ्यः श्लोकेभ्यः रक्तवर्णेन मुद्रितानि पदानि चित्वा लिखत -

----

तृतीयाविभक्तेः अभ्यासाय एतं गद्यांशं पठत -

एकदा **आत्मना** सह शरीरस्य अङ्गानां विवादः अभवत् । सर्वाणि अपि अङ्गानि स्व-स्वप्रभावं कथयन्ति स्म । मुखम् अकथयत् - "शरीरे अहम् एव प्रधानम् । यतः सर्वे **मुखेन** एव वदन्ति ।"

तदा नेत्रे अवदताम् - "आवयोः प्रभावः सर्वाधिकः अस्ति । यतः सर्वे **नेत्राभ्याम्** एव पश्यन्ति ।" नासिका उक्तवती - "अहम् एव प्रधाना । जनाः **नासिकया** एव जिघ्रन्ति, गन्धं च जानन्ति ।" तदा कर्णौ उक्तवन्तौ - "आवां सर्वोत्तमौ स्वः । जीवाः **कर्णाभ्याम्** एव ध्वनिं शृण्वन्ति ।" ततः जिह्वा **उग्रतया** अवदत् - "मम प्रभावः सर्वाधिकः । भोज्यपदार्थानां स्वादं **जिह्वया** एव अवगच्छन्ति जनाः । ते **जिह्वया** विना किमपि स्पष्टं वक्तुं न शक्नुवन्ति ।"

एतत् श्रुत्वा हस्तौ अवदताम् - "कथं भोः ! आवयोः प्रभावः न्यूनः किम् ? जगति सर्वाणि कार्याणि **हस्ताभ्याम्** एव सिध्यन्ति ।" तदा पादौ अपि अवदताम् - "अलम् **अतिविकत्थनेन** । आवयोः प्रभावः सर्वाधिकः अस्ति । **पादाभ्याम्** एव जनाः कुत्रापि गन्तुं शक्नुवन्ति ।"

एवम् सर्वे अवयवाः स्वस्य प्राधान्यं प्रतिपादितवन्तः । परन्तु कश्चित् अपि निर्णयः न जातः । तदा आत्मा मौनभङ्गं

कृत्वा अवदत् - "अलं **विवादेन**। भोः ! भवन्तः एव कथयन्तु - आत्मना एव सर्वाणि इन्द्रियाणि सञ्चालितानि भवन्ति, न वा ? आत्मना विना सर्वाणि इन्द्रियाणि निष्क्रियाणि भवन्ति, न वा ? आत्मना एव सर्वेषाम् अस्तित्वम् अस्ति, न वा ? भवत्सु यदि कश्चित् न भविष्यति तथापि प्राणी जीविष्यति, न वा ? किम् एतत् सत्यम् ?"

आत्मनः वचनानि श्रुत्वा सर्वाणि अङ्गानि मौनानि अभवन्। सर्वे **स्वेच्छया** स्वीकृतवन्तः - "इन्द्रियाणाम् आत्मा एव नाथः" इति। एवं पुनः आत्मना सह अङ्गानां मैत्री अभवत्।

अधः तालिकायां दत्तानि तृतीयाविभक्त्यन्तानि रूपाणि पठत अवगच्छत च -

प्रातिपदिकम्	एकवचनम्	द्विवचनम्	बहुवचनम्
देव	देवेन	देवाभ्याम्	देवैः
वैद्य	वैद्येन	वैद्याभ्याम्	वैद्यैः
यज्ञ	यज्ञेन	यज्ञाभ्याम्	यज्ञैः
कवि	कविना	कविभ्याम्	कविभिः
हरि	हरिणा	हरिभ्याम्	हरिभिः
कपि	कपिना	कपिभ्याम्	कपिभिः
भानु	भानुना	भानुभ्याम्	भानुभिः
गुरु	गुरुणा	गुरुभ्याम्	गुरुभिः
साधु	साधुना	साधुभ्याम्	साधुभिः
कर्तृ	कर्त्रा	कर्तृभ्याम्	कर्तृभिः
वक्तृ	वक्त्रा	वक्तृभ्याम्	वक्तृभिः
नेतृ	नेत्रा	नेतृभ्याम्	नेतृभिः
गीता	गीतया	गीताभ्याम्	गीताभिः
माला	मालया	मालाभ्याम्	मालाभिः
गति	गत्या	गतिभ्याम्	गतिभिः
मति	मत्या	मतिभ्याम्	मतिभिः
उक्ति	उक्त्या	उक्तिभ्याम्	उक्तिभिः
मही	मह्या	महीभ्याम्	महीभिः
स्त्री	स्त्रिया	स्त्रीभ्याम्	स्त्रीभिः

लेखनी	लेखन्या	लेखनीभ्याम्	लेखनीभिः
धेनु	धेन्वा	धेनुभ्याम्	धेनुभिः
मनु	मनुना	मनुभ्याम्	मनुभिः
साधु	साधुना	साधुभ्याम्	साधुभिः
चञ्चू	चञ्च्वा	चञ्चूभ्याम्	चञ्चूभिः
वधू	वध्वा	वधूभ्याम्	वधूभिः
चमू	चम्वा	चमूभ्याम्	चमूभिः
मूल	मूलेन	मूलाभ्याम्	मूलैः
जल	जलेन	जलाभ्याम्	जलैः
नक्षत्र	नक्षत्रेण	नक्षत्राभ्याम्	नक्षत्रैः

अभ्यासः

१. यथोदाहरणं तृतीयाविभक्त्यन्तरूपैः रिक्तस्थानानि पूरयत -

पदम्	एकवचनम्	द्विवचनम्	बहुवचनम्
कर्णः	**कर्णेन**	**कर्णाभ्याम्**	**कर्णैः**
शङ्खः			
रथः			
बाणः			
अग्निः	**अग्निना**	**अग्निभ्याम्**	**अग्निभिः**
विधिः			
अहिः			
गिरिः			
प्रभुः	**प्रभुणा**	**प्रभुभ्याम्**	**प्रभुभिः**
पशुः			
रिपुः			

बन्धुः			
द्रष्टा	द्रष्ट्रा	द्रष्टृभ्याम्	द्रष्टृभिः
भ्राता			
कर्ता			
श्रोता			
श्रद्धा	श्रद्धया	श्रद्धाभ्याम्	श्रद्धाभिः
माया			
दया			
रात्रिः	रात्र्या	रात्रिभ्याम्	रात्रिभिः
स्मृतिः			
शान्तिः			
सिद्धिः			
वाणी	वाण्या	वाणीभ्याम्	वाणीभिः
लक्ष्मीः	लक्ष्म्या	लक्ष्मीभ्याम्	लक्ष्मीभिः
श्रीः	श्रिया		
ह्रीः			
रेणुः	रेण्वा	रेणुभ्याम्	रेणुभिः
तनुः			

२. कोष्ठके प्रदत्तस्य पदस्य तृतीयाविभक्त्यन्तेन रूपेण यथोदाहरणं रिक्तस्थानानि पूरयत -

यथा - अर्जुनः **बाणैः** कौरवसैनिकान् हन्ति । (बाणाः)

१. भीमः ------------------------ दुर्योधनं ताडितवान् । (गदा)

२. सारथिः ------------------------- अश्वान् ताडयति । (कशा)

३. चित्रकारः ------------------------- चित्रं रञ्जयति । (वर्णाः)

४. सैनिकाः ----------------------------- युद्धं कुर्वन्ति । (अस्त्राणि)

५. अर्जुनः ------------------- गङ्गाम् अवतारितवान् । (बाणः)

६. धृष्टद्युम्नः ---------------------- द्रोणाचार्यं हतवान् । (खड्गः)

७. पूजकः ------------------------------ देवं पूजयति। (पुष्पाणि)

८. धृतराष्ट्रः --------------------------- ग्रस्तः आसीत्। (पुत्रमोहः)

९. वयं ------------------------------------ कार्यं कुर्मः। (हस्तौ)

१०. सञ्जयः -------------------- महाभारतयुद्धं पश्यति। (दिव्यदृष्टिः)

११. कृष्णः -------------------------- शिशुपालं हतवान्। (चक्रम्)

१२. द्रौपदी ------------------------ सभागृहात् गतवती। (क्रोधः)

१३. नकुलः ------------------- स्थालिकाः निर्मितवान्। (पर्णानि)

१४. अर्जुनः -------------------------- रथे उपाविशत्। (शोकः)

१५. ---------------------------------- शरीरं पुष्णाति। (आहारः)

१६. ---------------------------- कार्याणि सिध्यन्ति। (प्रयत्नः)

१७. सेविका ------------------------ वृक्षान् सिञ्चति। (जलम्)

१८. जन्तवः ---------------------------------- मुह्यन्ति। (सः)

१९. -------------------------------- चित्तं शान्तं भवति। (योगः)

२०. भक्ताः ------------------------------ देवं पूजयन्ति। (पुष्पाणि)

३. यथोदाहरणं कोष्ठकात् उचितं रूपं चित्वा रिक्तस्थानानि पूरयत -

यथा - मनुष्यः **बुद्ध्या** कार्यं करोति। (बुद्ध्या, बुद्धिः, बुद्धेः बुद्धौ)

१. उद्धवः ------------------------------ कृष्णं नमति। (भक्तिः, भक्तिषु, भक्त्या, भक्त्याम्)

२. पाण्डवाः --------------------------- वनं गतवन्तः। (पद्भ्याम्, पदे, पदानि, पदस्य)

३. माधवः --------------------------- समयं दर्शयति। (घटीम्, घटीभ्यः, घट्या, घटेः)

४. पूजकः वासुदेवं ------------------------ लिम्पति। (चन्दनात्, चन्दनेन, चन्दनस्य, चन्दनम्)

५. माता ------------------------------- पुत्रं भोजयति। (प्रीतिः, प्रीत्या, प्रीतीः, प्रीतिभ्यः)

६. गजपालः ------------------------ गजान् बध्नाति। (रज्जुभिः, रज्जुः, रज्जुभ्यः, रज्जवः)

अवधेयम्

सह, साकम्, समम्, सार्धम् इत्येतेषां योगे तृतीयाविभक्तिः भवति। अर्थात् येन सह एतेषां योगः भवति तस्य तृतीयाविभक्तिः भवति। चतुर्णां शब्दानाम् अर्थः समानः एव अस्ति।

यथा - **रामेण सह** सीता वनं गतवती। **दुर्योधनेन साकं** भीमः युद्धं कृतवान्।

४. यथोदाहरणं सह, साकम्, समम्, सार्धम् इत्येतेषां प्रयोगं कृत्वा रिक्तस्थानानि पूरयत -

यथा - **सीतया सह** रामः वनं गतवान्।

१. आत्मना ----------------- शरीरस्य अङ्गानां विवादः अभवत्।
२. पाण्डवानां कौरवैः --------------------------- युद्धम् अभवत्।
३. द्रौपद्या ------------------------------- पाण्डवाः वनं गतवन्तः।
४. पित्रा --------------------------------- पुत्रः विद्यालयं गच्छति।
५. मात्रा ------------------------------------ पुत्री मन्दिरं गच्छति।
६. गुरुणा ---------------------------------- शिष्याः अपि पठन्ति।

५. यथोदाहरणं कोष्ठके दत्तेषु शब्देषु तृतीयाविभक्तिं संयोज्य रिक्तस्थानानि पूरयत -

यथा - शकुन्तला **हरिणशावकेन** सह क्रीडति। (हरिणशावकः)

१. बालकाः ------------------------- सह क्रीडन्ति। (बालकाः)
२. दुग्धम् ------------------------------ सह मिलति। (जलम्)
३. अहम् ---------------------- साकं नगरं गच्छामि। (त्वम्)
४. ओङ्कारः ---------------------------- सह पठति। (श्रीनाथः)
५. छात्राः --------------- साकं सूत्रोच्चारणं कुर्वन्ति। (शिक्षकः)
६. शिशुः ---------------------------- सार्धं क्रीडति। (माता)
७. कृष्णः ------------------- सह भीष्मं प्रति धावति। (चक्रम्)

अवधेयम्

'**विना**' योगे तृतीयाविभक्तिः भवति। अर्थात् येन सह '**विना**'शब्दस्य योगः भवति तस्य तृतीया विभक्तिः भवति। यथा - **कृष्णेन विना** राधा खिन्ना।

'**विना**' शब्दस्य योगे द्वितीयाविभक्तिः पञ्चमीविभक्तिः चापि भवतः।
यथा - **रामं** विना अयोध्या शून्या। **रामात् विना** अयोध्या शून्या।

६. यथोदाहरणं 'विना' इति पदस्य प्रयोगं कृत्वा रिक्तस्थानानि पूरयत -

यथा - मात्रा **विना** शिशुः रोदिति।

१. ज्ञानेन ------------------------ जीवनं व्यर्थम्।
२. सुगन्धेन ------------------------ पुष्पं व्यर्थम्।
३. रामेण -------------------------- कः रक्षकः ?
४. सूर्येण ---------------------- रात्रिः न गच्छति।
५. पुस्तकेन ------------------ अध्ययनम् असम्भवम्।
६. विनयेन ------------------------ विद्या व्यर्था।

७. यथोदाहरणं कोष्ठके प्रदत्तेषु शब्देषु तृतीयाविभक्तिं संयोज्य रिक्तस्थानपूर्तिं कुरुत -

यथा - **मुखेन** विना जनाः वक्तुं न शक्नुवन्ति। (मुखम्)

१. -------------------------------- विना सुखं न भवति। (सन्तोषः)

२. -------------------------------- विना सफलता न लभ्यते। (श्रमः)

३. -------------------------------- विना कृष्णः खिन्नः। (राधा)

४. -------------------------------- विना वीरस्य शोभा न भवति। (शौर्यम्)

५. -------------------------------- विना सरोवरस्य शोभा न भवति। (कमलम्)

६. -------------------------------- विना धनं व्यर्थम्। (दानम्)

अधः तालिकायां विद्यमानानि सर्वनामशब्दानां तृतीयाविभक्त्यन्तानि रूपाणि सावधानं पठत स्मरत च -

पदम्	एकवचनम्	द्विवचनम्	बहुवचनम्
सः	तेन	ताभ्याम्	तैः
सा	तया	ताभ्याम्	ताभिः
तत्	तेन	ताभ्याम्	तैः
एषः	एतेन	एताभ्याम्	एतैः
एषा	एतया	एताभ्याम्	एताभिः
एतत्	एतेन	एताभ्याम्	एतैः
कः	केन	काभ्याम्	कैः
का	कया	काभ्याम्	काभिः
किम्	केन	काभ्याम्	कैः
भवान्	भवता	भवद्भ्याम्	भवद्भिः
भवती	भवत्या	भवतीभ्याम्	भवतीभिः
अहम्	मया	आवाभ्याम्	अस्माभिः
त्वम्	त्वया	युवाभ्याम्	युष्माभिः
सर्वः	सर्वेण	सर्वाभ्याम्	सर्वैः
सर्वा	सर्वया	सर्वाभ्याम्	सर्वाभिः
सर्वम्	सर्वेण	सर्वाभ्याम्	सर्वैः

८. **यथोदाहरणं मञ्जूषातः उचितं रूपं चित्वा रिक्तस्थानानि पूरयत -**

यथा - **एतया** लेखन्या लेखं लिखतु।

१. मनोजः --------------------- स्यूतेन सह धनम् अपि नीतवान्।
२. ------------------------------- प्रकारेण महाभारतं पठामि ?
३. ---------------------------------- भाषया सम्भाषणं कुर्मः ?
४. -------------------------------- उपनेत्रेण चलच्चित्रं पश्य।
५. -------------------------- सह भवत्योः माता अपि गच्छति।
६. -------------------------------- विना कार्यक्रमः न शोभते।
७. ------------------------------------ द्रोणीभ्यां जलं नयतु।
८. ------------------------ सम्मार्जनीभिः उद्यानं स्वच्छं कुर्वन्तु।
९. -------------------------------- मित्रैः सह नाटकं प्रस्तौमि।
१०. ------------------------------ पञ्चमहाभूतैः शरीरं भवति।

केन
कया
एतेन
एतया
सर्वैः
युष्माभिः
तेन
ताभ्यां
भवतीभ्याम्
एताभिः
तैः

९. **कोष्ठकस्य साहाय्येन गीताश्लोकान् परिशील्य रिक्तस्थानानि पूरयत -**

१. **राज्येन भोगैः जीवितेनवा** नः किम् ? (१.३२)
२. ------------------------- अस्मात् पापात् निवर्तितुं कथं न ज्ञेयम् ? (१.३९)
३. ---------------- वर्णसङ्करकारकैः ----------------------- कुलघ्नानां शाश्वताः कुलधर्माः जातिधर्माः च उत्साद्यन्ते। (१.४३)
४. अहं सङ्ख्ये कथम् --------------------- पूजार्हौ भीष्मं द्रोणं च प्रतियोत्स्यामि ? (२.४)
५. पार्थ ! -------------- ------------ युक्तः कर्मबन्धं प्रहास्यसि। (२.३९)
६. ----------------- भोगैश्वर्यप्रसक्तानां बुद्धिः समाधौ न विधीयते। (२.४४)
७. विधेयात्मा तु रागद्वेषवियुक्तैः --- विषयान् चरन् प्रसादम् अधिगच्छति। (२.६४)
८. त्वं व्यामिश्रेण इव ----------------------- मे बुद्धिं मोहयसि। (३.२)
९. स्वां प्रकृतिम् अधिष्ठाय --------------------------- सम्भवामि। (४.६)
१०. अपरे ब्रह्माग्नौ ------------------ एव यज्ञम् उपजुह्वति। (४.२५)
११. तत् ------------------------ परिप्रश्नेन -------------------- च विद्धि। (४.३४)
१२. भवान् सर्वं वृजिनं ------------------------------- एव सन्तरिष्यति। (४.३६)
१३. --------------- जन्तवः मुह्यन्ति। (५.१५)
१४. ------------------------- निरुद्धं चित्तम् उपरमते। (६.२०)
१५. सः ------------------ -------------------- युक्तः तस्याः राधनम् ईहते। (७.२२)

१६. नित्ययुक्ताः ---------------------- माम् उपासते । (९.१४)

१७. अन्ये मां -------------------------- एकत्वेन पृथक्त्वेन बहुधा यजन्तः उपासते । (९.१५)

१८. ते मां ----------------------- न तु अभिजानन्ति । (९.२४)

१९. त्वम् एवं ---------------------------- कर्मबन्धनैः मोक्ष्यसे । (९.२८)

२०. अहं प्रीयमाणाय ते ------------------------------ वक्ष्यामि । (१०.१)

२१. सः मर्त्येषु --------------------------- प्रमुच्यते । (१०.३)

२२. अहं भास्वता --------------------------- तमः नाशयामि । (१०.११)

२३. आत्मनः विभूतिं योगं च ---------------------------- भूयः कथय । (१०.१८)

२४. माम् ---------------------------------- आप्तुम् इच्छ । (१२.९)

२५. --------------------------------- यः मुक्तः स च मे प्रियः । (१२.१५)

२६. यः ------------------------- सह पुरुषं प्रकृतिं च वेत्ति सः न अभिजायते । (१३.२३)

२७. केचित् -------------- अन्ये साङ्ख्येन -----------, अपरे ----------- आत्मानं पश्यन्ति । (१३.२४)

२८. तत्र अनामयं सत्त्वं ------------------------ --------------------- च बध्नाति । (१४.६)

२९. तत् --------------------------- देहिनं निबध्नाति । (१४.७)

३०. --------- ------------------- एतान् त्रीन् गुणान् अतीतः भवति ? (१४.२१)

३१. यः -------------- -------------- मां सेवते सः ब्रह्मभूयाय कल्पते । (१४.२६)

३२. सः सर्ववित् मां -------------------------------- भजति । (१५.१९)

३३. कामक्रोधपरायणाः -------------------------- अर्थसञ्चयान् ईहन्ते । (१६.१२)

३४. ते दम्भेन अविधिपूर्वकं --------------------------- यजन्ते । (१६.१७)

३५. तमोद्वारैः ----------------- त्रिभिः विमुक्तः नरः आत्मनः श्रेयः आचरति । (१६.२२)

३६. मूढग्राहेण आत्मनः -------------------- यत् तपः क्रियते तत् तामसम् । (१७.१९)

३७. योगेन यया --------------- मनः प्राणेन्द्रियक्रियाः धारयते सा धृतिः सात्त्विकी । (१८.३३)

३८. विगतस्पृहः ------------------------- परमां नैष्कर्म्यसिद्धिम् अधिगच्छति । (१८.४९)

३९. ईश्वरः सर्वभूतानि ------------------------ भ्रामयन् सर्वभूतानां हृद्देशे तिष्ठति । (१८.६१)

४०. --------------------------- तम् एव शरणं गच्छ । (१८.६२)

द्रौणिः दण्डयितुं योग्यः

तुमुन्-प्रत्ययः

३६

उच्चैः पठत जानीत च -

द्रौणिः (अश्वत्थामा) द्रौपद्याः पुत्रान् हत्वा वनं प्रति गतवान्। एतं विषयं ज्ञात्वा द्रौपदी उच्चैः रोदनम् आरब्धवती। तदा पाण्डवाः द्रौपदीं **सान्त्वयितुं** शिबिरम् आगतवन्तः।

अर्जुनः उक्तवान् - "अहं भवत्याः अश्रूणि तदा एव **मार्जयितुं** प्रयत्नं करिष्यामि यदा तं दुष्टं शरैः **हन्तुं** प्रभविष्यामि" इति। सः श्रीकृष्णेन सह गुरुपुत्रं द्रौणिं **मारयितुं** वनं गतवान्। द्रौणिः अर्जुनं दृष्ट्वा प्राणान् **रक्षितुं** यत्र तत्र धावितवान्। परन्तु 'प्राणान् **पातुम्** असमर्थः अस्मि' इति विचिन्त्य सः ब्रह्मास्त्रं प्रक्षिप्तवान्। अस्त्रं **शमयितुम्** असमर्थः अर्जुनः किं कर्तव्यम् इति **ज्ञातुम्** अशक्तः जातः।"

तदा कृष्णः उक्तवान् - "इदानीं **भेतुम्** अवसरः नास्ति। द्रौणिः एतत् अस्त्रं केवलं **प्रहर्तुं** जानाति, परन्तु **संहर्तुं** न जानाति। एतस्य प्रतीकारं **कर्तुं** ब्रह्मास्त्रम् एव शरणम्। भवान् ब्रह्मास्त्रं ब्रह्मास्त्रेण **संहर्तुं** शक्नोति। अतः भीतिं विना ब्रह्मास्त्रं **क्षेप्तुं** सिद्धः भवतु। श्रीकृष्णस्य आज्ञया तस्य ब्रह्मास्त्रं **निवारयितुम्** अर्जुनः अपि ब्रह्मास्त्रं क्षिप्तवान्। ततः सः द्रौणिं **ग्रहीतुं** शीघ्रं धावितवान्। गृहीत्वा शिबिरं प्रति **नेतुं** च यत्तवान्। तदा श्रीकृष्णः अर्जुनम् उक्तवान् - "त्वम् एतं **त्रातुं** न अर्हसि। यतः सेनापतिपदं **प्राप्तुम्** एषः तव पुत्रान् मारितवान्। एषः दण्डनीयः अस्ति।" एवं बहुकिमपि कथितं चेत् अपि गुरुपुत्रं **हन्तुम्** अर्जुनस्य इच्छा नासीत्।

उभौ रज्ज्वा बद्धं द्रौणिम् आनीय द्रौपद्यै समर्पितवन्तौ। तं दृष्ट्वा सा उक्तवती - "एतं मुञ्चन्तु। एषः ब्राह्मणः, अस्माकं पूजनीयः च। अतः एषः **मोक्तुं** योग्यः अस्ति।

तदा श्रीकृष्णः उक्तवान् - "एषः ब्राह्मणः अधमः अस्ति चेत् अपि वयम् एतं **हन्तुं** न शक्नुमः। परन्तु एषः दुष्कृत्यकारणात् **दण्डयितुं** योग्यः" इति उक्त्वा श्रीकृष्णः द्रोणेः मणिं **निष्कासयितुम्** आदिष्टवान्। अर्जुनः श्रीकृष्णस्य एतत् वचनं श्रुत्वा द्रौणेः मणिं स्वीकृत्य तं शिबिरात् बहिः निष्कासितवान्।

अभ्यासः

१. अस्मिन् पाठे आगतानि वर्णाङ्कितानि तुमुन्नन्तपदानि रिक्तस्थानेषु लिखत -

----------------	----------------	----------------	----------------
----------------	----------------	----------------	----------------
----------------	----------------	----------------	----------------
----------------	----------------	----------------	----------------
----------------	----------------	----------------	----------------

अवधेयम्

खादितुम्, पठितुम्, कर्तुम्, वक्तुम् एतेषु शब्देषु **'तुमुन्'** इति प्रत्ययः योजितः अस्ति। एकस्याः क्रियायाः अपेक्षायाम् इच्छायां वा यदि अन्या काचित् क्रिया भवति तर्हि अपेक्षितक्रियायाः प्रदर्शनाय **'तुमुन्'** इति प्रत्ययस्य उपयोगः भवति। यथा -

रामः चषकं स्वीकरोति। दुग्धं **पिबति**। रामः दुग्धं **पातुं** चषकं स्वीकरोति।

अत्र रामस्य दुग्धपाने इच्छा अस्ति। अतः सः चषक-स्वीकरणरूपाम् अन्यां क्रियाम् अपि करोति।

अथवा **'किमर्थम्'** इति प्रश्नस्य यत् उत्तरं भवति तत्र प्रायः **'तुमुन्'** इति प्रत्ययस्य उपयोगः भवति।

यथा - रामः **किमर्थं** चषकं स्वीकरोति ? रामः दुग्धं **पातुं** चषकं स्वीकरोति।

तुमुन्-प्रत्ययान्तानि रूपाणि

धातुः	लट्लकारस्य रूपम्	तुमन्नन्तं रूपम्	धातुः	लट्लकारस्य रूपम्	तुमन्नन्तं रूपम्
ज्ञा	जानाति	ज्ञातुम्	सह्	सहते	सोढुम्
पा	पिबति	पातुम्	चल्	चलति	चलितुम्
स्था	तिष्ठति	स्थातुम्	वच्	वक्ति	वक्तुम्
उद्+स्था	उत्तिष्ठति	उत्थातुम्	रक्ष्	रक्षति	रक्षितुम्
दा	ददाति	दातुम्	आ+नन्द्	आनन्दति	आनन्दितुम्
ध्मा	धमति	ध्मातुम्	आ+रभ्	आरभते	आरब्धुम्
हा	जहाति	हातुम्	त्यज्	त्यजति	त्यक्तुम्
श्रि	श्रयति	श्रयितुम्	भ्रम्	भ्रमति	भ्रमितुम्
स्थापि	स्थापयति	स्थापयितुम्	हस्	हसति	हसितुम्
नी	नयति	नेतुम्	खाद्	खादति	खादितुम्
श्रु	शृणोति	श्रोतुम्	धाव्	धावति	धावितुम्
भू	भवति	भवितुम्	लिख्	लिखति	लेखितुम्
अभि+भू	अभिभवति	अभिभवितुम्	छिद्	छिनत्ति	छेत्तुम्

कृ	करोति	कर्तुम्	प्र+विश्	प्रविशति	प्रवेष्टुम्
गै	गायति	गातुम्	जीव्	जीवति	जीवितुम्
वद्	वदति	वदितुम्	नि+युज्	नियुनक्ति	नियोक्तुम्
पत्	पतति	पतितुम्	नृत्	नृत्यति	नर्तितुम्
लभ्	लभते	लब्धुम्	दृश्	पश्यति	द्रष्टुम्
गम्	गच्छति	गन्तुम्	खेल्	खेलति	खेलितुम्
अधि+गम्	अधिगच्छति	अधिगन्तुम्	कथ्	कथयति	कथयितुम्
हन्	हन्ति	हन्तुम्	चिन्त्	चिन्तयति	चिन्तयितुम्

२. यथोदाहरणं तुमुन्नन्तं रूपम् उपयुज्य वाक्यानि लिखत -

यथा - रामः गृहं गच्छति, जलं पिबति। रामः जलं पातुं गृहं गच्छति।

१. बालकः प्रश्नं पृच्छति। अवगच्छति। ------------- अवगन्तुं ---------------------------।

२. सेवकः आज्ञां स्वीकरोति। प्रविशति। --।

३. तौ आपणं गच्छतः। वस्तूनि स्वीकुरुतः। --।

४. ते मन्दिरं गच्छन्ति। रथोत्सवं पश्यन्ति। --।

५. त्वं लेखनीं क्रीणासि। पुस्तकं लिखसि। --।

६. युवां विद्यालयं गच्छथः। पुस्तकं पठथः। --।

७. यूयं क्रीडाङ्गणं गच्छथ। खेलिष्यथ। --।

८. अहं प्रयत्नं करिष्यामि। दुर्वचनानि त्यक्ष्यामि। --।

९. आवाम् आवर्षं सम्यक् पठिष्यावः। उत्तमान् अङ्कान् प्राप्स्यावः।

--।

१०. वयम् अरण्यं गच्छामः। भ्रमिष्यामः। --।

११. कथावाचकः आसने उपविशति। वक्ति। --।

१२. कौशलः आसनम् इष्टवान्। तिष्ठति। --।

१३. बालाः क्रीडन्ति। आनन्दन्ति। --।

१४. मित्राणि आगच्छन्ति। गानं शृण्वन्ति। --।

३. तालिकायां विद्यमानानि पदानि दृष्ट्वा यथोदाहरणं वाक्यानि लिखत -

छात्राः	पठन्ति --------------- एकान्तस्थलं	गच्छन्ति ।
	पृच्छन्ति --------------- शिक्षकस्य समीपं	
	शेरते --------------- प्रकोष्ठं	
	चिन्तयन्ति --------------- अध्यापकस्य समीपं	
	भ्रमन्ति --------------- पत्तनं	
	मिलन्ति --------------- गोष्ठीं	
	वैष्णोदेवीं गच्छन्ति --------------- रेलस्थानकं	
	स्वपन्ति --------------- शयनस्थलं	
	हवामहलं पश्यन्ति --------------- जयपुरं	
	कृष्णम् अर्चन्ति --------------- वृन्दावनं	

यथा - छात्राः **पठितुम्** एकान्तस्थलं गच्छन्ति ।

१. छात्राः --- ।

२. छात्राः -------------- शयितुम् --- ।

३. छात्राः --- ।

४. छात्राः --- ।

५. छात्राः --------------------------- मेलितुं ------------------------------- ।

६. छात्राः --- ।

७. छात्राः ------------------ स्वप्तुं --- ।

८. छात्राः --- ।

९. छात्राः --- ।

४. कोष्ठकस्य साहाय्येन गीताश्लोकान् परिशील्य रिक्तस्थानानि पूरयत -

१. ------------------ न शक्नोमि । (१.३०)

२. एतान् --------------- न इच्छामि । (१.३५)

३. वयं स्वबान्धवान् धार्तराष्ट्रान् ---------------------- न अर्हाः । (१.३७)

४. अस्माभिः अस्मात् पापात् ------------------------- कथं न ज्ञेयम् ? (१.३९)

५. वयं राज्यसुखलोभेन स्वजनं ------------------------ उद्यताः । (१.४५)

६. गुरून् अहत्वा भैक्ष्यं ------------------------ अपि इह लोके श्रेयः। (२.५)

७. अस्य अव्ययस्य विनाशं ------------------------ कश्चित् अपि न अर्हति। (२.१७)

८. त्वम् एवं ----------------------------- न अर्हसि। (२.२६)

९. स्वधर्मं च अवेक्ष्य अपि ------------------------------ न अर्हसि। (२.३१)

१०. लोकसङ्ग्रहम् अपि सम्पश्यन् ----------------------- अर्हसि एव। (३.२०)

११. संन्यासः तु अयोगतः ---------------------- दुःखम्। (५.६)

१२. यः कामक्रोधोद्भवं वेगं --------------------- शक्नोति सः नरः युक्तः। (५.२३)

१३. यतता वश्यात्मना तु उपायतः ------------------------ शक्यः। (६.३६)

१४. मे संशयम् अशेषतः ----------------------- अर्हसि। (६.३९)

१५. इदं धर्म्यं ---------------------- सुसुखम् अव्ययम्। (९.२)

१६. ताः दिव्याः आत्मविभूतयः अशेषेण ---------------------- अर्हसि। (१०.१६)

१७. ते ऐश्वरं रूपं ------------------------- इच्छामि। (११.३)

१८. मया ------------------------ शक्यम् इति यदि मन्यसे ततः त्वम् आत्मानम् मे दर्शय। (११.४)

१९. कृत्स्नं जगत् अन्यत् च यत् ------------------------ इच्छसि तत् सर्वम् इह मम देहे पश्य। (११.७)

२०. अनेन स्वचक्षुषा एव मां ------------------------- न शक्यसे। (११.८)

२१. भवन्तम् आद्यं --------------------------- इच्छामि। (११.३१)

२२. लोकान् ---------------------------- इह प्रवृत्तः। (११.३२)

२३. विश्वमूर्ते अहं किरीटिनं गदिनं चक्रहस्तं त्वां तथा एव ----------------------- इच्छामि। (११.४६)

२४. इज्यया च न ------------------------ शक्यः यथा मां दृष्टवान् असि। (११.५३)

२५. अहम् अनन्यया भक्त्या तु एवंविधः तत्त्वेन ------------- च ----------- च शक्यः। (११.५४)

२६. मयि चित्तं स्थिरं ------------------------------ न शक्नोषि। (१२.९)

२७. एतत् अपि ---------------------- अशक्तः असि। (१२.११)

२८. शास्त्रविधानोक्तं कर्म ज्ञात्वा इह --------------------- अर्हसि। (१६.२४)

२९. संन्यासस्य त्यागस्य च तत्त्वं पृथक् ------------------------- इच्छामि। (१८.१)

३०. अशेषतः कर्माणि ----------------------- नहि शक्यम्। (१८.११)

अधिक-अभ्यासाय लौकिकम् एतत् सम्भाषणम् उच्चैः पठत -

दिलीपः मित्र ! चिकित्सालयं **गन्तुम्** इच्छामि ।

रामकृष्णः : किमर्थम् ?

दिलीपः मम कर्णवेदना अस्ति । एतां **सोढुं** न शक्नोमि, अतः औषधं **स्वीकर्तुम्** इच्छामि ।

रामकृष्णः : अहम् अपि आपणं गच्छामि । भवान् अपि मया सह **चलितुम्** इच्छति चेत् चलतु । अहं वैद्यं सर्वं **वक्तुं** शक्नोमि । भवान् तु पीडया सर्वं **वक्तुं** न शक्नोति । (मिलित्वा सह गच्छतः ।)

दिलीपः पूर्वं किञ्चित् फलरसं **पातुम्** इच्छामि । यतः तत्र विलम्बः **भवितुम्** अर्हति ।

रामकृष्णः : तथैव भवतु । (फलरसं पीत्वा चिकित्सालयं गच्छतः ।)

रामकृष्णः : वैद्यमहोदय ! मम मित्रस्य कर्णे वेदना अस्ति । वेदनया इदानीम् एषः सम्यक् **भोक्तुं** न शक्नोति । **शयितुं, हसितुं, श्रोतुम्** अपि न शक्नोति । कृपया वेदनायाः सम्यक् चिकित्सां करोतु ।

वैद्यः भवतु ! वेदनायाः कृते औषधं **दातुं** शक्नोमि । परन्तु तेन केचन नियमाः पालनीयाः भवन्ति । यथा - यदि एषः आम्लं **खादितुं** प्रयत्नं न करोति, **खेलितुं, भ्रमितुं,** गातुं वा प्रयत्नं न करोति तर्हि शीघ्रं लाभं **प्राप्तुं** शक्नोति ।

दिलीपः अस्तु महोदय ! तथैव प्रयासं करोमि ।

(वैद्यः औषधस्य नाम **लेखितुं** लेखनीं स्वीकरोति । लिखित्वा पत्रं ददाति ।)

रामकृष्णः : एतानि औषधानि कुत्र **लब्धुं** शक्नोमि ?

वैद्यः समीपे एव लघुः औषधालयः अस्ति । भवान् **ज्ञातुं** शक्नोति । तत्र क्रीणातु दिनद्वयानन्तरं पुनः आगच्छताम् ।

दिलीपः अस्तु । मिलामः महोदय !

कुन्त्याः वरयाचना

अतः **३७**

उच्चैः पठत -

कुरुक्षेत्रयुद्धं समाप्तम् आसीत् । **अतः** युधिष्ठिरः सिंहासने अभिषिक्तः । श्रीकृष्णः स्वनगरं गन्तुम् उद्युक्तः अभवत् । **अतः** कुन्ती दुःखिता जाता । सा श्रीकृष्णम् उक्तवती - "हे कृष्ण ! कमपि वरं याचामि । **अतः** कृपया माम् अनुगृह्णातु" इति ।

श्रीकृष्णस्य महत् आश्चर्यं जातम् । **अतः** सः उक्तवान् "पितृभगिनि ! इदानीं वरयाचनस्य आवश्यकता एव नास्ति । **अतः** भवत्याः वचनं श्रुत्वा आश्चर्यम् अनुभवामि । इदानीं भवत्याः पुत्रः चक्रवर्ती अस्ति । **अतः** तस्य माता भवती सुखिनी अस्ति । भवत्याः सर्वाणि अपि कष्टपूर्णानि दिनानि अतीतानि सन्ति । **अतः** सुखेन तिष्ठतु भवती । किम् अन्यत् वाञ्छति ?" इति ।

तदा कुन्ती उक्तवती - "कृष्ण ! कष्टदिनानि अतीतानि इति भवान् वदति । **अतः** एव मम चिन्ता । **अतः** अहं वरं याचामि, मह्यं कष्टं ददातु" इति ।

कृष्णः इतोऽपि आश्चर्येण पृच्छति - "पितृभगिनि ! एवं किमर्थम् ?" इति ।

कुन्ती वदति - "यदा अस्माकं कष्टं भवति तदा वयं निरन्तरं भवन्तं स्मरामः । भवान् अपि अत्र उपस्थितः भूत्वा अस्मान् रक्षति । कष्टप्रसङ्गेषु एव भवतः सान्निध्यं प्राप्यते । **अतः** 'मह्यं कष्टं ददातु' इति अहं प्रार्थितवती ।" **अतः एव** उक्तम् अस्ति -

विपदो नैव विपदः सम्पदो नैव सम्पदः ।
विपद् विस्मरणं विष्णोः सम्पन्नारायणस्मृतिः ॥

अवधेयम्

श्रीकृष्णः विश्वरूपं दर्शितवान् । **अतः** अर्जुनस्य मोहः नष्टः ।
अत्र अर्जुनस्य मोहनाशः कार्यम् अस्ति । विश्वरूपदर्शनं कारणम् अस्ति । यत्र एतादृशं कारणवाक्यं पूर्वम् उच्यते, कार्यवाक्यं च अनन्तरम् उच्यते तत्र कार्यवाक्ये '**अतः**' इति अव्ययपदं योज्यते ।
यथा - दुर्योधनः अन्याय्यम् आचरितवान् । **अतः** दुर्गतिं प्राप्तवान् ।

उच्चैः पठत जानीत च -

१. दुर्योधनः पाण्डवेभ्यः भूमिं दातुं न इच्छति स्म । **अतः** महाभारतयुद्धं प्रवृत्तम् ।
२. कर्णः दुर्योधनस्य मित्रम् असीत् । **अतः** सः तस्मै अङ्गराज्यं दत्तवान् ।
३. दुर्योधनः पाण्डवानां शान्तिप्रस्तावं न अङ्गीकृतवान् । **अतः** विदुरः धृतराष्ट्रम् उक्तवान्-'कुलक्षेमाय भवान् दुर्योधनं शीघ्रं त्यजतु' इति ।
४. धृतराष्ट्रः मोहवशात् कलिरूपं दुर्योधनं न त्यक्तवान् । **अतः** विदुरः स्वयं तत्र आयुधानि त्यक्त्वा तीर्थयात्रार्थं गतवान् ।

५. महाभारतयुद्धसमये विदुरः तत्र नासीत्। **अतः** कौरवाणां नाशः अभवत्।

६. भीमः दुर्योधनं हतवान्। **अतः** धृतराष्ट्रः भीमं हन्तुम् इच्छति स्म।

७. युद्धे कर्णः अपि मृतः। **अतः** कुन्ती एकान्तस्थले गत्वा रोदिति स्म।

८. कर्णः पाण्डवानां भ्राता आसीत्। **अतः** युधिष्ठिरः तस्मै अपि पिण्डदानं करोति।

९. पाण्डवाः स्वस्य हितम् अहितञ्च सर्वं कृष्णाय समर्पितवन्तः। **अतः** महाभारतयुद्धान्ते अपि सर्वे कुशलिनः आसन्।

१०. कृष्णः स्वलोकं गतवान्। **अतः** पाण्डवाः अपि स्वर्गारोहणं कृतवन्तः।

अभ्यासः

१. वरयाचनायाः प्रसङ्गं पठित्वा अधो लिखितानां प्रश्नानाम् उत्तराणि लिखत -

१. श्रीकृष्णस्य महत् आश्चर्यं जातम्, अतः सः किम् उक्तवान्?

-- ।

२. कष्टं ददातु इति कुन्ती किमर्थं प्रार्थितवती?

-- ।

३. कृष्णः यदा किम् अन्यत् इच्छति इति उक्तवान् तदा कुन्ती किम् उक्तवती?

-- ।

४. कुन्ती किमर्थं दुःखिता जाता?

-- ।

५. अतः एव किम् उक्तम् अस्ति?

-- ।

२. 'अतः' इति पदं प्रयुज्य यथोदाहरणं वाक्यानि पूरयत -

यथा - श्रीकृष्णः विदुरं स्मरति। **अतः** विदुरः धन्यः अस्ति।

१. रामः ऋषीन् 'शबर्याः गृहं कुत्र'? इति पृच्छति। -------------------- शबरी धन्या।

२. श्रीकृष्णः ईश्वरः अस्ति। --------------------- सः मुखे ब्रह्माण्डं दर्शयति।

३. कलिः विष्णुरातस्य चरणं गृहीतवान्। --------------------- सः तं क्षाम्यति।

४. मया कर्म कृतम्। ---------------------- फलं प्राप्तम्।

५. प्रह्लादः ईश्वरस्मरणं करोति। --------------------- सः न बिभेति।

६. सूरदासः सर्वदा कृष्णं स्मरति स्म। ---------------------- तस्मै भगवान् दर्शनं दत्तवान्।

७. रत्नावली तुलसीदासं भर्त्सितवती। ------------------ तुलसीदासः कविपुङ्गवः जातः।

८. अर्जुनः वदति मोहः नष्टः इति। ------------------ कृष्णः अग्रे न श्रावयति।

९. श्रीकृष्णः गीतोपदेशं दत्तवान्। --------------------- अर्जुनस्य मोहभङ्गः जातः।

१०. श्रीकृष्णः गीताम् उपदिष्टवान्। ---------------- गीतावाक्यानि अद्वितीयानि सन्ति।

यतः



तारकाः सम्यक् दृश्यन्ते,

यतः आकाशे मेघाः न सन्ति।

अवधेयम्

१. सः व्यायामं करोति, यतः आरोग्यम् इच्छति।

२. अहम् उष्णं जलं पातुम् इच्छामि, यतः शैत्यम् अस्ति।

अत्र वाक्यद्वये कार्यवाक्यं प्रथमम् उक्तम्, कारणवाक्यं च अनन्तरम् अस्ति। '**यतः**' इति अव्ययस्य प्रयोगः कारणवाक्येन सह कृतः अस्ति। एवमेव अन्यानि अपि वाक्यानि पश्यन्तु।

उच्चैः पठत जानीत च -

१. कृषकः क्षेत्रे धान्यं वपति। **यतः** सः बहुधान्यम् इच्छति।

२. समाजसेवकाः समाजसेवां कुर्वन्ति। **यतः** ते मानवतायाः धर्मं जानन्ति।

३. एते छात्राः योग्याः सन्ति। **यतः** एते अध्ययनशीलाः सन्ति।

४. अहं भानुना सह गच्छामि। **यतः** सः स्वयानेन गच्छति।

५. वयम् एव अद्य छात्रान् पाठयामः। **यतः** गुरोः अनारोग्यम् अस्ति।

६. मित्रस्य गृहं गच्छामि। **यतः** अद्य तस्य जन्मदिनम् अस्ति।

७. गोपालाय पुस्तकं ददामि। **यतः** सः सम्यक् पठति।

८. वृक्षात् फलानि पतितानि सन्ति। **यतः** तानि पक्वानि।

९. माता पुत्रस्य कृते कन्दुकम् आनयति। **यतः** तस्मै कन्दुकक्रीडा रोचते।

१०. अयं लेखः मम नास्ति। **यतः** अत्र मम वाक्यानि न सन्ति।

३. यथोदाहरणं 'यतः' इति अव्ययं योजयित्वा वाक्यानि पूरयत -

यथा - भक्तः शिवस्य उपासनां करोति, **यतः** विद्याम् इच्छति।

१. राघवः इन्द्रस्य उपासनां करोति, ---------------- सः स्वर्गेण सदृशम् ऐश्वर्यम् इच्छति।

२. जनाः धन्वन्तरेः पूजनं कुर्वन्ति, ---------------- दीर्घायुः इच्छन्ति।

३. उर्वश्याः उपासनां करोषि, ----------------- सुन्दरतां कामयसे।

४. उमायाः उपासनां कुरुथः, ----------------- दाम्पत्यसुखम् इच्छथः।

५. ऋषीणाम् उपासनां कुरुथ, ----------------- वाणीं प्रमाणीकर्तुम् इच्छथ।

६. प्रजापतीनाम् उपासनां करोमि, ----------------- आधिपत्यम् इच्छामि।

७. गायत्र्याः उपासनां कुर्वः, ----------------- ब्रह्मतेजः इच्छावः।

८. ईश्वरस्य उपासनां कुर्मः, ------------------ कल्याणम् इच्छामः।

९. सर्वे कृष्णस्य उपासनां कुर्वन्ति, ----------------- सर्वविधसुखम् इच्छन्ति।

१०. ऋषयः अश्विनीकुमारयोः पूजनं कुर्वन्ति, -------------- आरोग्यम् इच्छन्ति।

हे कृष्ण !

सम्बोधनम् ३८



हे **कृष्ण** ! त्राहि माम् ।

हे **पार्थ** ! कर्णं मारय ।

वत्स ! किमर्थं धावसि ?

भगवद्गीतायाः एकादश-अध्यायस्य एतं श्लोकं परिशीलयत -

कस्माच्च ते न नमेरन् **महात्मन्** गरीयसे ब्रह्मणोऽप्यादिकर्त्रे ।
अनन्त देवेश जगन्निवास त्वमक्षरं सदसत्तत्परं यत् ॥११.३७॥

एतयोः श्लोकयोः सम्बोधनपदानि परिशीलयत -

गङ्गे च **यमुने** चैव **गोदावरि सरस्वति** ।
नर्मदे सिन्धु कावेरि जलेऽस्मिन् सन्निधिं कुरु ॥

हे कृष्ण द्वारकावासिन् क्वासि क्वासि **महाभुज** ।
कौरवैः परिभूतां मां किं न जानासि **केशव** ॥

अवधेयम्

- सम्बोधनरूपस्य प्रयोगः सूचनार्थं भवति । सामान्यतः एतदर्थम् (!) इति चिह्नस्य, अल्पविरामचिह्नस्य (,) वा उपयोगः भवति । यथा - **मित्र !, सखि !, पुत्रि !, पुत्र !** इति ।
- सम्बोधनरूपात् पूर्वं **'भोः, हे, रे, अये, अयि'** इत्यादीनि अव्ययानि अपि कदाचित् प्रयुज्यन्ते ।

  यथा - हे मित्र !
- **सामान्यसम्बोधनानि**

  पुरुषम् उद्दिश्य = **मित्र !**, महिलाम् उद्दिश्य = **सखि ! भगिनि !**, सामान्यम् = **भोः ! अयि भोः !**

❖ आदरसूचनार्थं नामसूचकपदेन सह पुंलिङ्गे प्रायः **'वर्यः, महोदयः, महाशयः, महाभागः'** इत्येते शब्दाः योज्यन्ते । यथा - **राजेशवर्य !, सुधीरवर्य !, राकेशमहाशय !, आशुतोषमहाभाग !** स्त्रीलिङ्गे प्रायः **'वर्या, महोदया, भगिनी'** इत्येते शब्दाः योज्यन्ते । यथा - **लतावर्ये !, रेखामहोदये !, लक्ष्मीभगिनि !**

❖ नामनिर्देशं विना
पुंलिङ्गे = **मान्य !, आर्य !, श्रीमन् !** इत्यादीनि प्रयुज्यन्ते । स्त्रीलिङ्गे = **मान्ये !, आर्ये !, भगिनि !** इत्यादीनि प्रयुज्यन्ते ।

सम्बोधनरूपाणि

पदम्	एकवचनम्	द्विवचनम्	बहुवचनम्
पुत्रः	पुत्र !	पुत्रौ !	पुत्राः !
मान्या	मान्ये !	मान्ये !	मान्याः !
अम्बा	अम्ब !	अम्बे !	अम्बाः !
लक्ष्मीः	लक्ष्मि !	लक्ष्म्यौ !	लक्ष्म्यः !
गौरी	गौरि !	गौर्यौ !	गौर्यः !
पिता	पितः !	पितरौ !	पितरः !
माता	मातः !	मातरौ !	मातरः !
मुनिः	मुने !	मुनी !	मुनयः !
गुरुः	गुरो !	गुरू !	गुरवः !
मित्रम्	मित्र !	मित्रे !	मित्राणि !

अभ्यासः

१. मञ्जूषातः 'श्रीकृष्णस्य' 'अर्जुनस्य' च सम्बोधनरूपाणि पृथक् कृत्वा लिखत -

केशव, पार्थ, अनघ, परन्तप, भारत, मधुसूदन, धनञ्जय, वार्ष्णेय, जनार्दन, माधव, कुरुसत्तम, कुरुनन्दन, महाबाहो, पुरुषोत्तम, भगवन्, कुरुश्रेष्ठ, गुडाकेश, कमलपत्राक्ष, विष्णो, अच्युत, सव्यसाचिन्, सखे, विश्वमूर्ते, भरतर्षभ, पाण्डव, कौन्तेय

यथा - श्रीकृष्णः - केशव, ...

.... ।

अर्जुनः - पार्थ, ...

.... ।

२. गीतातः श्लोकान् परिशील्य सम्बोधनपदानि श्लोकवाक्यैः सह यथोचितं योजयत -

१. **मामकाः पाण्डवाश्चैव किमकुर्वत (१.१)**	धनञ्जय !
२. सेनयोरुभयोर्मध्ये रथं स्थापय मे (१.२१)	केशव !
३. हृषीकेशं तदा वाक्यमिदमाह (१.२१)	अनघ !
४. एवमुक्तो हृषीकेशो गुडाकेशेन (१.२४)	द्विजोत्तम !
५. क्षुद्रं हृदयदौर्बल्यं त्यक्त्वोत्तिष्ठ (२.३)	महीपते !
६. कथं भीष्ममहं सङ्ख्ये द्रोणं च (२.४)	पार्थ !
७. इषुभिः प्रति योत्स्यामि पूजार्हौ (२.४)	**सञ्जय !**
८. अस्माकं तु विशिष्टा ये तान्निबोध (१.७)	अर्जुन !
९. निमित्तानि च पश्यामि विपरीतानि (१.३१)	मधुसूदन !
१०. न काङ्क्षे विजयं (१.३२)	परन्तप !
११. यं हि न व्यथयन्त्येते पुरुषं (२.१५)	जनार्दन !
१२. योगस्थः कुरु कर्माणि सङ्गं त्यक्त्वा (२.४८)	अच्युत !
१३. निहत्य धार्तराष्ट्रान्नः का प्रीतिः स्याद् (१.३६)	कौन्तेय !
१४. प्रजहाति यदा कामान् सर्वान् (२.५५)	कृष्ण !
१५. लोकेऽस्मिन् द्विविधा निष्ठा पुरा प्रोक्ता मया (३.३)	पुरुषर्षभ !
१६. यस्त्विन्द्रियाणि मनसा नियम्यारभते (३.७)	भारत !



'यतो धर्मः ततो जयः' **इति** नियतेः विधानं **परिपालयितुं** द्वापरयुगे यदा महाभारतयुद्धम् अभवत् **तदा** तस्मिन् युद्धे कौरवपाण्डवयोः **पक्षतः** अनेके योद्धारः योद्धुम् आगच्छन्। पाण्डवसेनायाम् अर्जुनस्य सारथिः **साक्षात्** भगवान् श्रीकृष्णः **एव** आसीत्। युद्धात् **प्राक्** अर्जुनस्य 'योत्स्यमानान् अवेक्षे अहं ये एते **अत्र** समागताः' **इति** इच्छाकारणात् सारथिः श्रीकृष्णः उभयोः सेनयोः **मध्ये** रथं स्थापितवान्। अर्जुनः **स्वपुरतः** आचार्यान् मातुलान् बान्धवादीन् **च** दृष्ट्वा श्रीकृष्णम् अवदत् - "एते **तु** मम बान्धवाः। **अतः** एतान् कथं मारयिष्यामि ?" **इति**। **ततः परं** सः चापं शरं **च** त्यक्त्वा रथस्य पृष्ठभागे उपविष्टवान्। तम् अर्जुनं **तथा** दृष्ट्वा श्रीकृष्णः कथयति **यत् - अहो** ! भवान् **इव** क्षत्रियः युद्धक्षेत्रम् **आगत्य इत्थं** मोहग्रस्तः भवति **चेत् ततः अपि** दुःखतरं **किं वा** स्यात् ? **कुतः** त्वम् अस्मिन् कल्मषे पतितः। **भोः** ! **यथा** भवान् पश्यति वास्तविकं **तथा** नास्ति। **यतः** भवान् **यत्** द्रष्टुं **न** शक्नोति **तदपि** अहं पश्यामि। एते **तु** म्रियन्ते **एव** भवान् **केवलं निमित्तमात्रं** भवतु। यः मनुष्यः **इह** लोके जन्म प्राप्नोति तस्य मृत्युः **अपि** निश्चितः। **यतः** -

जातस्य **हि** ध्रुवो मृत्युर्ध्रुवं जन्म मृतस्य **च**।
तस्मादपरिहार्येऽर्थे **न** त्वं शोचितुमर्हसि॥ (२.२७)

अवधेयम्

सदृशं त्रिषु लिङ्गेषु सर्वासु च विभक्तिषु ।
वचनेषु च सर्वेषु यन्न व्येति तदव्ययम् ॥

यः शब्दः त्रिषु लिङ्गेषु, (स्त्रीलिङ्गे, पुंलिङ्गे नपुंसकलिङ्गे च) सर्वासु विभक्तिषु (सप्तसु अपि विभक्तिषु) सर्वेषु वचनेषु च (एकवचने, द्विवचने बहुवचने च) समानः एव भवेत्, यस्य रूपे किञ्चित् अपि परिवर्तनं न भवेत्, सः शब्दः '**अव्ययम्**' इति उच्यते । यथा - **अत्र, तत्र, क्व, कुत्र, इह, यावत्, तावत्, यदि, तर्हि, यद्यपि, तथापि, न, चेत्** इत्यादयः । वाक्यप्रयोगः यथा -

रामः **अत्र** पठति ।	सीता **अत्र** पठति ।	मित्रम् **अत्र** पठति ।
पात्रम् **अत्र** स्थापयतु ।	गृहात् **अत्र** आगच्छतु ।	मन्दिरे **अत्र** उपविशतु ।
बालकः **अत्र** पठति ।	बालकौ **अत्र** पठतः ।	बालकाः **अत्र** पठन्ति ।

सर्वत्र '**अत्र**' इति अव्ययस्य प्रयोगः समानः एव अस्ति । कुत्रापि परिवर्तनं न दृश्यते ।

अभ्यासः

१. पाठानुगुणं यथोदाहरणं उत्तराणि लिखत -

यथा - महाभारतयुद्धं किमर्थम् अभवत् ?
नियतेः विधानं परिपालयितुं महाभारतयुद्धम् अभवत् ।

१. अर्जुनस्य सारथिः कः आसीत् ? -- ।
२. श्रीकृष्णः कुत्र रथं स्थापितवान् ? -- ।
३. अर्जुनः स्वपुरतः कां दृष्टवान् ? -- ।
४. वास्तविकं किं नास्ति ? -- ।
५. कस्य मृत्युः निश्चितः ? -- ।

२. पाठात् अव्ययानि चित्वा रिक्तस्थानानि पूरयत -

१. ------------ धर्मः ---------------------- जयः ।
२. अर्जुनस्य सारथिः ------------ भगवान् श्रीकृष्णः ------------ आसीत् ।
३. अर्जुनः ------------- आचार्यान् मातुलान् बान्धवादीन् ----------- दृष्ट्वा कृष्णम् अवदत् ।
४. ततः ----------- सः चापं शरं च ---------- रथस्य पृष्ठभागे उपविष्टवान् ।
५. ----------- भवान् ----------- क्षत्रियः युद्धक्षेत्रम् आगत्य --------- मोहग्रस्तः भवति ।
६. ------------ त्वम् अस्मिन् कल्मषे पतितः ।

७. वास्तविकं ------------ नास्ति ।

८. ---------- भवान् ----------- द्रष्टुं ----------- शक्नोति ------------ अहं पश्यामि ।

९. भवान् -------------------- भवतु ।

१०. जातस्य -------- ध्रुवो मृत्युः ।

अवधेयम्

यत्र कार्यकारणभावः भवति तत्र '**यदि-तर्हि**' इति अव्ययद्वयस्य प्रयोगः भवति ।

यथा - **यदि** भवान् श्रमं करिष्यति **तर्हि** सफलतां प्राप्स्यति ।

अत्र सफलताप्राप्तिः कार्यम् अस्ति, श्रमः च कारणम् अस्ति ।

'**यदि-तर्हि**' इत्यस्य स्थाने '**चेत्**' इत्यस्य अपि प्रयोगं कर्तुं शक्यते ।

यथा - **यदि** कृष्णः वंशीं वादयति **तर्हि** गोपिकाः नृत्यन्ति ।

कृष्णः वंशीं वादयति **चेत्** गोपिकाः नृत्यन्ति ।

उच्चैः पठत अवगच्छत च -

१. **यदि** पिता गमिष्यति **तर्हि** अहम् अपि गमिष्यामि ।
पिता गमिष्यति **चेत्** अहम् अपि गमिष्यामि ।

२. **यदि** अन्धकारः भवति **तर्हि** विद्युत् ज्वलति ।
अन्धकारः भवति **चेत्** विद्युत् ज्वलति ।

३. **यदि** शिक्षकः लेखयति **तर्हि** छात्राः लिखन्ति ।
शिक्षकः लेखयति **चेत्** छात्राः लिखन्ति ।

४. **यदि** उत्सवः भवति **तर्हि** जनाः मन्दिरं गच्छन्ति ।
उत्सवः भवति **चेत्** जनाः मन्दिरं गच्छन्ति ।

अवधेयम्

'**यावत्-तावत्**', '**यद्यपि-तथापि**', '**यदि-तर्हि**' एतेषाम् अव्ययपदानां प्रायः युगपत् प्रयोगः भवति ।

यथा - **यावत्** धर्मः अस्ति **तावत्** सृष्टिः अस्ति । **यद्यपि** सः निर्धनः **तथापि** स्वधर्मं न त्यजति ।

यदि भवान् श्रमं करिष्यति **तर्हि** सफलः भविष्यति ।

३. यथोदाहरणं 'यावत्-तावत्' इति अव्ययद्वयस्य प्रयोगं कृत्वा रिक्तस्थानानि पूरयत -

यथा - **यावत्** रात्रिः अस्ति **तावत्** चन्द्रः अस्ति ।

१. --------------- सूर्यास्तं न भवति ---------------- बालाः क्रीडन्ति ।

२. ------------------ सूर्यः अस्ति ------------------ प्रकाशः भवति ।

३. --------------- श्रीकृष्णः अस्ति ---------------- पाण्डवान् कोऽपि जेतुं न शक्नोति ।

४. ---------------- सुवृष्टिः भवति --------------- सुभिक्षम् अपि भवति ।

५. ---------------- सरोवरे जलम् अस्ति --------------- मीनाः जीवन्ति ।

६. ------------------ विद्युत् अस्ति -------------------------- व्यजनं चलति।

७. ------------------ बालाः क्रीडन्ति ----------------- कोलाहलः भवति।

८. जनाः ------------- जीवन्ति ---------------- व्यस्ताः एव भवन्ति।

९. -------------- आत्मज्ञानं न भवति ---------------- मोक्षः न भवति।

१०. -------------- योगी भोजनं करोति ----------------- मौनं भवति।

४. यथोदाहरणं 'यद्यपि तथापि' इति अव्ययद्वयस्य प्रयोगं कृत्वा रिक्तस्थानानि पूरयत -

यथा - **यद्यपि** युधिष्ठिरः राजा आसीत् **तथापि** विनयशीलः आसीत्।

१. ------------- धृतराष्ट्रः उचितं जानाति स्म ------------- वक्तुं न शक्नोति स्म।

२. ------------- कर्णः महारथी आसीत् --------------- वाणीसंयमं न करोति स्म।

३. ------------- दुर्योधनः अधर्मं जानाति स्म --------------- तं न त्यजति स्म।

४. ------------- सः संस्कृतज्ञः ---------------- अन्याः भाषा जानाति।

५. ------------- द्रौपदी राजकन्या आसीत् ---------------- विराटनगरे सेवाकार्यं कृतवती।

६. -------------- जलं जीवनम् अस्ति ---------------- जनाः तस्य दुरुपयोगं कुर्वन्ति।

७. -------------- भारती गृहस्थमहिला आसीत् ----------- विदुषी आसीत्।

८. -------------- द्रोणाचार्यः ब्राह्मणः आसीत् -------------- युद्धं करोति स्म।

९. -------------- रावणः पण्डितः आसीत् -------------- अधर्मम् आचरति स्म।

१०. -------------- सः निर्धनः ---------------- सत्यवादी अस्ति।

५. 'यदि-तर्हि' इति अव्ययद्वयस्य प्रयोगं कृत्वा यथोदाहरणं रिक्तस्थानानि पूरयत -

यथा - **यदि** सः श्रमं करिष्यति **तर्हि** सफलतां प्राप्स्यति।

१. ----------- उत्सवः भवति --------------- जनाः नृत्यन्ति।

२. --------- सः अपराधं करिष्यति ------------- दण्डं प्राप्स्यति।

३. ------------ त्वं पठसि -------------- तव अनुजः अपि पठति।

४. ---------- सुनीता गायति ------------- निर्मला अपि गायति।

५. ------------ मम मित्रम् आगमिष्यति ----------- अहं तेन सह उद्यानं गमिष्यामि।

६. ---------- जनाः सम्यक् व्यायामं कुर्वन्ति -------------- स्वस्थाः भवन्ति।

७. ---------- भवान् सुकर्म करोति ----------- यशः प्राप्नोति।

८. ---------- छात्रः पठति -------------- उत्तीर्णः भवति।

९. ---------- जनः परदुःखं द्रक्ष्यति ---------- स्वदुःखं विस्मरिष्यति।

१०. ---------- पार्श्वे धनम् अस्ति ------------ अनेकानि मित्राणि भवन्ति।

अवधेयम्

> **'नो चेत्'** इत्यस्य अव्ययस्य अर्थः भवति - **'अन्यथा'** ।
> यथा - मम पुस्तकं देहि, **नो चेत्** गुरवे निवेदयिष्यामि ।
> शीघ्रं चलतु, **नो चेत्** माता तर्जयिष्यति ।

६. यथोदाहरणं 'नो चेत्' इत्यस्य अव्ययस्य प्रयोगं कृत्वा वाक्यानि पूरयत -

यथा - औषधं स्वीकरोतु, **नो चेत्** अनारोग्यं वर्धते ।

१. मनसा पठतु, ------------------ अनुत्तीर्णः भविष्यति ।
२. परिश्रमं करोतु, ------------------- असफलः भविष्यति ।
३. सम्यक् व्यायामं करोतु, ---------------- शरीरहानिः भविष्यति ।
४. लोभं त्यजतु, ----------------- नरके पतिष्यति ।
५. गीतां पठतु, ---------------- जीवनदर्शनं ज्ञातुं न शक्ष्यति ।
६. श्रीकृष्णं भजतु, ------------------ मुक्तिं प्राप्तुं न शक्ष्यति ।
७. दूरवाणीं करोतु, ----------------- मातुः संशयः वर्धिष्यते ।
८. वृक्षाः रक्षणीयाः, ------------------ दुर्भिक्षं भविष्यति ।
९. दिव्यास्त्रं संहरतु, ----------------- राष्ट्रस्य नाशः भविष्यति ।
१०. शक्यं चेत् अद्य मिलामः, ---------------- श्वः मेलिष्यामः ।

७. यथोदाहरणं कोष्ठकात् युक्तं रूपं चित्वा रिक्तस्थले लिखत -

यथा - सः संस्कृतेन **एव** भाषते । (यदा, तथापि, खलु, एव)

१. माधुरी श्वः कार्यक्रमार्थम् आगच्छति ---------------- ? (खलु, किन्तु, चेत्, तर्हि)
२. यद्यपि श्रेष्ठाः शयनं न कुर्वन्ति -------------- स्वप्नान् पश्यन्ति । (तर्हि, तथा, तथापि, च)
३. शिवभक्ताः "शिवाय नमः" --------------------- वदन्ति । (चेत्, यथा, तावत्, इति)
४. --------------- सहस्ररूप्यकैः उत्तमां शाटिकां क्रीणामि । (खलु, प्रायशः, यावत्, यत्)
५. श्यामला अद्य रोटिकाः -------------------- पक्ववती । (यदि, यद्यपि, अपि, अतः)
६. यद्यपि श्रीकान्तः वेगेन धावितवान् ---------------- यानं न प्राप्तवान् । (तदा, तावत्, तर्हि, तथापि)
७. भवान् उत्तमं कार्यं करोतु --------------- फलस्य अपेक्षा मास्तु । (किन्तु, यतोहि, नो चेत्, अतः)
८. वयं गीतां पठामः -------------- ज्ञानं प्राप्नुमः । (चेत्, नो चेत्, यतोहि, यावत्)
९. ----------- पिपासा भवति, तदा जलं पिबतु । (यदि, यतोहि, यदा, यतः)
१०. गणेशाय मोदकं, जम्बूफलं, जपाकुसुमं, दूर्वाङ्कुरः ------- रोचन्ते । (खलु, इति, यतः, च)

विष्णुभक्तः अम्बरीषः

एतां कथाम् उच्चैः पठत अवगच्छत च -

महाराजः अम्बरीषः विष्णुभक्तः आसीत्। सः सर्वदा एकादशीव्रतपालनं करोति स्म। एकदा कार्त्तिकमासस्य एकादश्यां सः उपवासं कृतवान्। द्वादश्यां व्रतान्तसमये दैवात् महर्षिः दुर्वासाः तत्र सम्प्राप्तः। अम्बरीषः चिन्तितवान् - 'अयं सुयोगः! इदं मम सौभाग्यं यत् अद्य ईश्वरस्य कृपया महर्षिः आगतः' इति। अतः सः अर्घ्यपाद्यादिभिः मुनिं सत्कृतवान्। व्रतान्ते भोजनाय तं निवेदितवान् - "हे ऋषिवर! मम निमन्त्रणं स्वीकरोतु" इति।

तदा महर्षिः दुर्वासाः अवदत् - "सम्प्रति अहं नित्यकर्म सम्पादयितुं यमुनातटं गच्छामि। सन्ध्यादिकं समाप्य तव भोजनप्रसादं ग्रहीष्यामि" इति। ततः सः यमुनातटं गतवान्। केनचित् कारणेन ततः प्रत्यागमने तस्य विलम्बः अभवत्।

अत्र व्रतान्तभोजनकालस्य अतिक्रमणं न भवेत् इति भयात् अम्बरीषः शास्त्रोक्तनिर्णयानुसारेण जलपानेन एव व्रतान्तभोजनस्य विधिं सम्पादितवान्। तस्मिन् एव समये महर्षिः दुर्वासाः यमुनातटात् प्रत्यागतः। अम्बरीषं दृष्ट्वा सः क्रोधाभिभूतः अभवत्। कारणम् अज्ञात्वा एव सः स्वजटाभिः एकं कालपुरुषं सृष्टवान्। तं कालपुरुषम् अम्बरीषस्य मारणाय प्रेषितवान् च।

एतद् ज्ञात्वा भगवान् विष्णुः क्रोधाविष्टः अभवत्। सः कालपुरुषस्य मारणाय ऋषये अभयदानाय च सुदर्शनचक्रं प्रेरितवान्।

सुदर्शनचक्रं कालपुरुषं हत्वा महर्षेः पृष्ठतः अधावत्। चक्रात् भीत्वा महर्षिः त्रिषु अपि लोकेषु भ्रमितवान्। शिवस्य ब्रह्मदेवस्य च समीपं गत्वा प्राणरक्षणाय निवेदितवान्। परं कोऽपि तस्य रक्षणे समर्थः नासीत्। सर्वेऽपि तं 'भवान् विष्णोः एव शरणं गच्छतु' इति उक्तवन्तः। अन्ततः महर्षिः दुर्वासाः विष्णुं शरणं गत्वा प्राणरक्षां याचितवान्। परन्तु विष्णुः अपि महर्षिं न रक्षितवान्। सः उक्तवान् - "भवान् यस्य अपराधं कृतवान्, तम् एव शरणं गच्छतु। सः एव भवतः रक्षणं कर्तुं शक्नोति। यतो हि अहं तु भक्ताधीनः अस्मि" इति।

अन्ततः महर्षिः दुर्वासाः अम्बरीषं शरणं गतवान्, उक्तवान् च - "भोः अम्बरीष! रक्ष माम्।" अम्बरीषः सुदर्शनचक्रस्य स्तुतिं कृत्वा महर्षेः प्राणरक्षां कृत्वा तं नतवान्। अनन्तरं महर्षये भोजनं च दत्तवान्। भोजनानन्तरं महर्षिः महाराजाय आशीर्वादं दत्त्वा हरिस्मरणे लीनः सन् स्वस्थानं गतवान्।

अभ्यासः

१. कथानुगुणं प्रश्नानाम् उत्तराणि लिखत -

१. विष्णुभक्तः कः आसीत् ? --- ।

२. महर्षिः स्वजटाभिः कं सृष्टवान् ? --- ।

३. सः कैः मुनिं सत्कृतवान् ? --- ।

४. महर्षिः तं कालपुरुषं किमर्थं प्रेषितवान् ? --- ।

५. महर्षिः दुर्वासाः कुतः प्रत्यागतः ? --- ।

६. सुदर्शनचक्रं कालपुरुषं हत्वा कस्य पृष्ठतः अधावत् ? --- ।

७. चक्रात् भीत्वा महर्षिः कुत्र भ्रमितवान् ? --- ।

२. निर्देशानुसारं रूपाणि परिवर्त्य यथोदाहरणं लिखत -

पदम्	विभक्तिः	प्रथमान्तं रूपम्	निर्देशम्	परिवर्तनम्
१. सेनयोः	**षष्ठी**	**सेना**	**पञ्चमी ब.व.**	**सेनाभ्यः**
२. मुनिना			सम्बोधनम् ब.व.	
३. गीतायाम्			तृतीया ए.व.	
४. पितुः			सप्तमी द्विव.	
५. स्वसा			चतुर्थी ए.व.	
६. मह्यम्			षष्ठी ब.व.	
७. नदीषु			द्वितीया ब.व.	
८. यज्ञात्			सप्तमी ब.व.	
९. नेतरि			प्रथमा ब.व.	
१०. वध्वोः			षष्ठी ए.व.	
११. सेनापतये			द्वितीया द्विव.	
१२. युवयोः			तृतीया ब.व.	
१३. धेनुभिः			सप्तमी ए.व.	
१४. गतयः			चतुर्थी ब.व.	

१५. भ्रातृन्			पञ्चमी द्विव.	
१६. इन्द्रियाणि			द्वितीया ए.व.	
१७. अग्नयः			सम्बोधनम् ब.व.	
१८. शङ्खानाम्			प्रथमा द्विव.	
१९. एतेभ्यः			षष्ठी द्विव.	
२०. विधात्रे			तृतीया ब.व.	
२१. चम्वै			सप्तमी ए.व.	
२२. गजैः			चतुर्थी द्विव.	

३. कोष्ठके प्रदत्तस्य पदस्य उचितं विभक्त्यन्तं रूपं प्रयुज्य यथोदाहरणं वाक्यानि पूरयत -

यथा - सैनिकाः **रणाङ्गणात्** शिबिरम् आगच्छन्ति। (रणाङ्गणम्)

१. ------------------------ नमः इति भक्ताः वदन्ति। (शिवः)

२. ------------------------- सह सख्यं मास्तु। (दुर्जनः)

३. वस्त्रप्रसारणार्थं बहिः ------------------------ बद्धाः सन्ति। (रज्जुः)

४. हे ---------------------- ! विषयं ज्ञात्वा अग्रे पठतु। (मीनाक्षी)

५. सर्वे --------------------------- पठित्वा प्रश्नान् जानन्तु। (पत्रिका)

६. सेवकाः ------------------------------ आम्रवृक्षान् सिञ्चन्ति। (वाटिका)

७. बाणभट्टः ------------------------------- लिखितवान्। (कादम्बरी)

८. --------------------------- पत्नी उत्तरा। (अभिमन्युः)

९. ---------------------------- विमानेन सञ्चारं कुर्वन्ति। (नेता)

१०. भवती ---------------------------- कम् अपि निर्णयं मा स्वीकरोतु। (त्वरा)

११. राघवः ------------------------------ स्मरणिकां दत्तवान्। (अतिथिः)

१२. बालाः ------------------------------ भीताः भवन्ति। (सर्पः)

१३. जनकस्य -------------------------------- अतीव प्रीतिः आसीत्। (दुहिता)

१४. ---------------------------- माधुर्यम् अवर्णनीयम् अस्ति। (अभिज्ञानशाकुन्तलम्)

१५. भवान् ----------------------- पूर्वं शर्करां खादतु। (गमनम्)

४. मञ्जूषायां प्रदत्तानां पदानाम् उचितविभक्तिप्रयोगेण यथोदाहरणं रिक्तस्थानानि पूरयत -

यथा - बालकौ **हस्तौ** प्रक्षाल्य भोजनं कृतवन्तौ।

मञ्जूषा
हस्तः
पुत्रः
पाठः
लेखनी
मोदकम्
कष्टम्
राघवेन्द्रः
बालकाः
विवादः
वित्तकोषः

१. भारती भवत्याः ---------------- वात्सल्यं प्रदर्शितवती।

२. सः ---------------------- पठितुं पुस्तकं स्वीकरिष्यति।

३. --------------------------------- विना कथं लिखामि।

४. तेभ्यः भोजने -------------------------------- रोचन्ते।

५. मनोजः ------------------------------ धनम् अर्जयति।

६. ---------------------------- कुटुम्बजनाः कुत्र वसन्ति।

७. कार्यक्रमस्य आयोजनं ---------------------- अभवत्।

८. चर्चा -------------------------------------- मा भवतु।

९. आरक्षकाः चोरेभ्यः -------------------------- रक्षन्ति।

उत्तराणि

पाठः - १

१. १. मम । मम । नाम एकलव्यः । २. मम । किम् । मम, सुभद्रा । ३. मम । भवतः नाम । मम नाम । ४. मम । भवतः नाम । मम, भीमः।

२. १. भवतः नाम किम् ? मम नाम प्रकाशः । २. भवतः नाम किम् ? मम नाम दिनेशः । ३. भवत्याः नाम किम् ? मम नाम पूजा । ४. भवतः नाम किम् ? मम नाम लीलाधरः । ५. भवत्याः नाम किम् ? मम नाम सीता ।

३. मम । भवतः । भवत्याः । मम ।

पाठः - २

१. २. सः व्याघ्रः । एषः शशकः । ३. सः चापः । एषः बाणः । ४. सः मूषकः । एषः सर्पः । ५. सः सैनिकः । एषः बालकः । ६. सः आचार्यः । एषः एकलव्यः । ७. सः आसन्दः । एषः पर्यङ्कः । ८. सः कूपः । एषः घटः ।

२. १. एषा सेना । सा भक्ता । २. एषा प्रज्ञा । सा भावना । ३. एषा भेरी । सा वीणा । ४. एषा सरस्वती । सा पार्वती । ५. एषा रुक्मिणी । सा सत्यभामा । ६.एषा गान्धारी । सा कुन्ती । ७. एषा पृथिवी । सा नदी ।

३. १. एतत् कवचम् । तत् चक्रम् । २. एतत् गाण्डीवम् । तत् अङ्गुलीयकम् । ३. एतत् कमलम् । तत् पत्रम् । ४. एतत् फलम् । तत् कुण्डलम् । ५. एतत् वनम् । तत् उत्तरीयम् ।

४. १. एते बाणाः । ते खड्गाः । २. एते दीपाः । ते यज्ञाः । ३. एते पाण्डवाः । ते कौरवाः । ४. एते रथाः । ते अश्वाः ।

५. १. एताः सेविकाः । ताः गोपिकाः । २. एताः संस्थाः । ताः ज्येष्ठाः । ३. ताः कुलस्त्रियः । ४. एताः विद्यार्थिन्यः । ताः सख्यः ।

६. १. उदकानि । तानि बीजानि । २. शरीराणि । तानि पुस्तकानि । ३. सोपानानि । तानि कमलपत्राणि । ४. तानि शस्त्राणि ।

७. एषः पाषाणः । एषः अश्वः । एते घटाः । एषा शाखा । एताः बालिकाः । एतत् नेत्रम् । एतत् फलम् । एतानि पर्णानि ।

८. सः आकाशः । सः चन्द्रः । सः सूर्यः । ते मार्गाः । ते संशोधकाः । सा पत्रिका । ताः ओषधयः । तत् प्रतिष्ठानम् । तानि कारणानि ।

९. १. क्षेत्राणि २. नद्यः ३. वाहनम् ४. विषयाः ५. क्रिया

पाठः - ३

१. १. एषः कः ? एते के ? २. एषः कः ? एते के ? ३. एषः कः ? एते के ? ५. एषा का ? एताः काः ? ७. एतत् किम् ? एतानि कानि ? ८. एतत् किम् ? एतानि कानि ?

२. १. काः २. कः ३. काः ४. किम् ५. कानि ६. के ७. किम् ८. का ९. काः १०. किम् ?

३. १. कानि नक्षत्राणि ? २. के नायकाः ? ३. काः भेर्यः ? ४. का निष्ठा ? ५. किं हृदयम् ? ६. कः रथः ?

४. कः वीरः ? कः सञ्जयः ? कः धृतराष्ट्रः ? का क्षमा ? का श्रद्धा ? का माला ? किं चक्रम् ? किम् उत्तरीयम् ? किं महाभारतम् ? के गन्धर्वाः ? के पाठकाः ? के सेवकाः ? काः नार्यः ? काः विद्याः ? काः नद्यः ? कानि शस्त्राणि ? कानि शरीराणि ? कानि हृदयानि ?

५. १. कः गाण्डीवः ? एषः गाण्डीवः । २. का कथा ? एषा कथा । ३. किं चक्रम् ? एतत् चक्रम् । ४. के सेवकाः ? एते सेवकाः । ५. काः नद्यः ? एताः नद्यः । ६. कानि गात्राणि ? एतानि गात्राणि । ७. कः धार्तराष्ट्रः ? सः धार्तराष्ट्रः । ८. का कुन्ती ? सा कुन्ती । ९. किं गीतम् ? तत् गीतम् । १०. के अश्वाः ? ते अश्वाः । ११. काः नर्तक्यः? ताः नर्तक्यः । १२. कानि इन्द्रियाणि ? तानि इन्द्रियाणि ।

६. १. का २. का ३. किम् ४. किम् ५. किम् ६. किम्, किम् ७. किम् ८. किम् ९. के १०. का ।

पाठः - ४

१. १. किं द्रोणः ब्राह्मणः ? आम्, द्रोणः ब्राह्मणः । सः क्षत्रियः न । २. किं कृपाचार्यः अमरः ? आम्, कृपाचार्यः अमरः । सः नश्वरः न । ३. किं युधिष्ठिरः सज्जनः ? आम्, युधिष्ठिरः सज्जनः । सः दुर्जनः न । ४. किं कर्णः सूर्यपुत्रः ? आम्, कर्णः सूर्यपुत्रः । सः इन्द्रपुत्रः न । ५. किं भीष्मः विवाहितः ? न, भीष्मः विवाहितः न । सः अविवाहितः । ६. किं गङ्गा व्यासमाता ? न, गङ्गा व्यासमाता न । सा भीष्ममाता ।

२. १. शिरस्त्राणम् अस्ति । २. खड्गः अस्ति । ३. योधः अस्ति । ४. तूणीरः अस्ति । ५. अश्वः अस्ति । ६. गजः अस्ति । ७. छाया अस्ति । ८. ध्वजः अस्ति । ९. रथः अस्ति । १०. चापः अस्ति । ११. खगः अस्ति । १२. मेघः अस्ति । १३. युद्धक्षेत्रम् अस्ति । १४. मृतसैनिकः अस्ति । १५. आकाशः अस्ति ।

१. उपनेत्रं नास्ति। २. वीराङ्गना नास्ति। ३. आतपः नास्ति। ४. सोपानं नास्ति। ५. व्याघ्रः नास्ति।
६. सूर्यः नास्ति। ७. नदी नास्ति। ८. वृक्षः नास्ति। ९. कुन्ती नास्ति। १०. दीपः नास्ति।
११. प्रासादः नास्ति।

पाठः - ५

१. १. धृतराष्ट्रः अत्र अस्ति। २. सञ्जयः अत्र अस्ति। ३. गान्धारी अत्र अस्ति। ४. सिंहासनम् अत्र अस्ति। ५. स्तम्भाः अत्र सन्ति।
७. श्रीकृष्णः तत्र अस्ति। ८. अर्जुनः तत्र अस्ति। ९. गाण्डीवः तत्र अस्ति। १०. रथः तत्र अस्ति। ११. खड्गः तत्र अस्ति।

पाठः - ६

१. १. गजौ, गजाः २. खड्गौ, खड्गाः ३. कुन्तीपुत्रौ, कुन्तीपुत्राः ४. आचार्यौ, आचार्याः।
२. १. क्षत्रियौ, क्षत्रियाः २. सर्पः, सर्पौ ३. मानवः, मानवाः ४. यादवौ, यादवाः ५. शङ्खः, शङ्खाः।
३. १. चटके, चटकाः २. बालिके, बालिकाः ३. गदे, गदाः ४. लते, लताः।
४. १. गुलिके, गुलिकाः २. रोटिका, रोटिकाः ३. भाषा, भाषे ४. शाटिका, शाटिकाः ५. सेविके, सेविकाः।
५. ३. भेरी, भेर्यौ ४. पृथिवी, पृथिव्यः ५. नारी, नार्यौ ६. स्त्रियौ, स्त्रियः ७. ज्यायस्यौ, ज्यायस्यः।
६. १. चक्रे, चक्राणि २. बीजे, बीजानि ३. द्वारे, द्वाराणि ४. पुष्पे, पुष्पाणि।
७. १. विमानम्, विमानानि २. व्यजने, व्यजनानि ३. शस्त्रम्, शस्त्राणि ४. इन्द्रियम्, इन्द्रियाणि ५. नक्षत्रम्, नक्षत्रे
८. २. मीनौ, मीनाः ३. गायकः, गायकाः ४. वानरः, वानरौ ५. वेदः, वेदौ।
९. २. लते, लताः ३. वैद्या, वैद्याः ४. जननी, जनन्यौ ५. पितामह्यौ, पितामह्यः।
१०. २. वने, वनानि ३. लोकयानम्, लोकयाने ४. उपनेत्रम्, उपनेत्राणि ५. गृहम्, गृहे।
११. १. भक्तौ २. नरः, नराः ३. देहौ, देहाः ४. कौन्तेयः, कौन्तेयौ ५. नायकः, नायकौ ६. चापः, चापाः ७. भेर्यौ, भेर्यः
८. शाटिका, शाटिके ९. प्रभा, प्रभाः १०. घटी, घट्यः ११. सौदामन्यौ, सौदामन्यः १२. देवता, देवते १३. अयनम्, अयने
१४. वस्त्रम्, वस्त्राणि १५. वृषभशकटे, वृषभशकटानि १६. धर्मक्षेत्रे, धर्मक्षेत्राणि १७. पुराणम्, पुराणे १८. पात्रम्, पात्राणि।

पाठः - ७

१. २. तौ मीनौ। ३. ते मीनाः। ४. सः गायकः। ५. ते गायकाः। ६. एषः वानरः। एतौ वानरौ। ७. सः वेदः। ८. तौ वेदौ।
२. १. एषः कविः। एते कवयः। २. कपिः। कपयः।
३. २. तौ गुरू। ३. ते गुरवः। ४. सः वटुः। ५. तौ वटू। ६. ते। ७. सः भानुः। ८. तौ। ९. ते भानवः।
४. १. श्रोता। एतौ। एते श्रोतारः। २. एषः नेता। एतौ। एते नेतारः।
५. २. एते लते। ३. एताः लताः। ४. एषा वैद्या। एताः वैद्याः। ५. एषा तिथिः। एते तिथी। एताः।
६. सारिका। एते। सारिकाः। ७. एषा। अजे। एताः अजाः।
६. १. एषा। मूर्तिः। एताः मूत्तयः। २. एषा श्रेणिः। एते श्रेणी। एताः।
७. १. एते पितामह्यौ। एताः पितामह्यः। २. एषा। एते वेण्यौ। वेण्यः।
८. १. एते धेनू। एताः धेनवः। २. एते हनू। एताः हनवः। ३. एषा तनुः। एते। एताः तनवः।
९. १. एते चम्वौ। एताः चम्वः।
१०. १. एषा। एते ननान्दरौ। एताः। २. एषा याता। एते। एताः यातरः।
११. १. ते वने। २. तानि वनानि। ३. एतत् लोकयानम्। एते लोकयाने। ४. तत् उपनेत्रम्। ५. तानि उपनेत्राणि। ६. एतत् गृहम्। एते गृहे।
१२. १. एतत् अक्षि। अक्षिणी। एतानि। २. एतत् दधि। एते। एतानि दधीनि।
१३. २. ते वस्तुनी। ३.तानि वस्तूनि। ४. अम्बु। ते। तानि अम्बूनि।
१४. १. एतौ डमरू २. एते कवयः ३. ते भ्रातरः ४. तौ ऋषी ५. सः वासुकिः।
१५. **एकवचनम्** - अरण्यम्, परशुः, धर्मक्षेत्रम्, भानुः, मणिः, अग्निः, दुहिता, अस्थि।
द्विवचनम् - गुलिके, ऊर्मी, वक्तारौ, रज्जू, चालन्यौ, तनू, दधिनी, गीते।
बहुवचनम् - पुस्तकानि, पुराणानि, मानवाः, वीच्यः, गुरवः, नेतारः, व्यक्तयः, स्वसारः।

पाठः - ८

१. १. अहं प्रभुः। प्रभू। वयम्। २. आवां धर्तारौ। वयं धर्तारः। ३. अहं रुद्रः। वयं रुद्राः। ४. अहं देवगणः। आवां देवगणौ।
५. आवां जनन्यौ। वयं जनन्यः। ६. अहं स्वसा। वयं स्वसारः। ७. अहं देवता। आवां देवते।
९. युवाम् अकर्तारौ। यूयम् अकर्तारः। १०. त्वं साधुः। युवां साधू। ११. त्वं राजपुत्रः। यूयं राजपुत्राः।
१२. ओषधी। युवाम् ओषध्यौ। यूयम्। १३. त्वम्। महाबाहू। यूयं महाबाहवः। १४. त्वं गदाधरः। युवां गदाधरौ।
१५. युवां दास्यौ। यूयं दास्यः। १७. भवान् धनुर्धरः। भवन्तौ। धनुर्धराः। १८. भवान् शत्रुः। भवन्तौ शत्रू।
१९. भवन्तौ अद्वेष्टारौ। भवन्तः अद्वेष्टारः। २०. भवान् विभुः। भवन्तः विभवः। २१. भवान् महानुभावः। भवन्तौ महानुभावौ।
२२. भवान् देवर्षिः। भवन्तौ। देवर्षयः। २३. मुनिः। भवन्तौ मुनी। भवन्तः। २५. भवती विश्वमूर्तिः। भवत्यः विश्वमूर्तयः।
२६. भवती राज्ञी। भवत्यौ राज्ञ्यौ। २७. भवती सेविका। सेविके। भवत्यः। २८. भवत्यौ गुणभोक्त्र्यौ। भवत्यः गुणभोक्त्र्यः।
२९. भवती योगिनी। भवत्यः योगिन्यः। ३०. भवत्यौ शक्ती। भवत्यः शक्तयः। ३१. भवती भक्ता। भवत्यौ भक्ते।

२. १. त्वम् २. भवान् ३. त्वम् ४. भवान् ५. त्वम् ६. भवन्तः ७. वयम् ८. अहम् ९. त्वम्
१०. त्वम् ११. अहम्। त्वम् १२. त्वम् १३. अहम् १४. अहम् १५. अहम् १६. वयम् १७. त्वम्।

पाठः - ९

१. १. अश्वयोः, अश्वानाम् २. बाणस्य, बाणानाम् ३. समुद्रस्य, समुद्रयोः ४. पुत्रस्य, पुत्रयोः ५. सारथ्योः, सारथीनाम्
६. सेनापतेः, सेनापत्योः ७. मुनेः, मुनीनाम् ८. भानोः, भान्वोः ९. शत्र्वोः, शत्रूणाम् १०. हनोः, हनूनाम्
११. विधात्रोः, विधातॄणाम् १२. योद्धुः, योद्ध्रोः १३. नेतुः, नेतॄणाम् १४. वीरयोः, वीराणाम् १५. सेनायाः, सेनानाम्
१६. महिलायाः, महिलयोः १७. तिथ्योः, तिथीनाम् १८. विभूतेः, विभूत्योः १९. नार्याः, नारीणाम् २०. पत्न्योः, पत्नीनाम्
२१. चम्वाः, चमूनाम् २२. अपत्यस्य, अपत्ययोः २३. क्षेत्रयोः, क्षेत्राणाम् २४. इन्द्रियस्य, इन्द्रिययोः।

२. २. महाभारतस्य लेखकः गणेशः। ३.पाण्डवानां ज्येष्ठः युधिष्ठिरः। ४. कर्णस्य रथचालकः शल्यराजः।
५. हस्तिनापुरस्य महाराजः धृतराष्ट्रः। ६. नकुलसहदेवयोः पितरौ अश्विनीकुमारौ। ७. गङ्गायाः पुत्रः देवव्रतः।
८. गान्धार्याः भ्राता शकुनिः। ९. कुन्त्याः वरदाता दुर्वासोमुनिः। १०. मत्स्यराजस्य पत्नी सुदेष्णा।
११. गुरोः द्रोणस्य प्रियशिष्यः अर्जुनः।

३. (क) १. गान्धार्याः पतिः धृतराष्ट्रः। २. अम्बिकायाः पुत्रः धृतराष्ट्रः। ३. पाण्डोः सहोदरः धृतराष्ट्रः।
४. विदुरस्य भ्राता धृतराष्ट्रः। ५. शकुनेः आवुत्तः धृतराष्ट्रः। ६. युधिष्ठिरस्य पितृव्यः धृतराष्ट्रः।
(ख) १. नारायणस्य अवतारः श्रीकृष्णः। २. रुक्मिण्याः पतिः श्रीकृष्णः। ३. वसुदेवस्य पुत्रः श्रीकृष्णः।
४. गीतायाः उपदेशकर्ता श्रीकृष्णः। ५. सुभद्रायाः भ्राता श्रीकृष्णः। ६. सान्दीपनेः शिष्यः श्रीकृष्णः।
७. अभिमन्योः मातुलः श्रीकृष्णः।
(ग) १. कृष्णार्जुनयोः संवादः भगवद्गीता। २. वेदान्तस्य साररूपा भगवद्गीता। ३. अष्टादशाध्यायानां सङ्ग्रहः भगवद्गीता।
४. दुग्धामृतस्य रूपिका भगवद्गीता। ५. महाभारतस्य अंशरूपा भगवद्गीता। ६. अन्यगीतानाम् अतिप्रसिद्धा भगवद्गीता।
७. प्रस्थानत्रय्याः एका भगवद्गीता।
(घ) १. मनोगतानां परित्यक्तः स्थितप्रज्ञः। २. शुभाशुभयोः अद्वेष्टा स्थितप्रज्ञः। ३. इन्द्रियाणां संहर्ता स्थितप्रज्ञः।
४. कर्तव्यानाम् आचरिता स्थितप्रज्ञः। ५. विषयाणाम् अनासक्तः स्थितप्रज्ञः।

४. १. त्रैलोक्यराज्यस्य २. क्षत्रियस्य ३. सर्वभूतानाम् ४. सर्वयज्ञानाम् ५. द्यावापृथिव्योः ६. क्षेत्रक्षेत्रज्ञयोः
७. सुखदुःखानाम् ८. सुकृतस्य ९. नरकस्य १०. राजसस्य ११. परस्य १२. संन्यासस्य, त्यागस्य
१३. शूद्रस्य १४. भूतानाम् १५. दिव्यानाम्, विभूतीनाम् १६. लोकस्य १७. यतीनाम् १८. पाण्डुपुत्राणाम्
१९. सिद्ध्यसिद्ध्योः २०. सम्भावितस्य २१. साङ्ख्यानाम् २२. शुचीनाम् २३. समाधिस्थस्य, स्थितप्रज्ञस्य।

५. २. शङ्खस्य नाम पाञ्चजन्यः। शङ्खस्य नाम देवदत्तः। ३. शिष्यस्य नाम भीमः। शिष्यस्य नाम एकलव्यः।
४. धनुर्धरस्य नाम अर्जुनः। धनुर्धरस्य नाम कर्णः। ५. राजधान्याः नाम हस्तिनापुरम्। राजधान्याः नाम इन्द्रप्रस्थम्।
६. विष्णोः नाम केशवः। विष्णोः नाम माधवः। ७. मातुलस्य नाम शकुनिः। मातुलस्य नाम मद्रराजः।

८. राज्ञ्याः नाम गान्धारी। राज्ञ्याः नाम द्रौपदी । ९. क्रीडायाः नाम द्यूतः। क्रीडायाः नाम आखेटः।
१०. ऋषेः नाम नारदः। ऋषेः नाम व्यासः।

६. १. नक्षत्राणामहम् २. वेदानाम् ३. देवानामस्मि ४. इन्द्रियाणाम् ५. भूतानामस्मि ६. रुद्राणाम् ७. वसूनाम् ८. सेनानीनामहम् ९. महर्षीणाम् १०. यज्ञानाम् ११. स्थावराणाम् १२. सर्ववृक्षाणाम् १३. देवर्षीणां च १४. गन्धर्वाणाम् १५. सिद्धानाम् १६. गजेन्द्राणाम् १७. नराणां च १८. आयुधानामहम् १९. धेनूनामस्मि २०.सर्पाणामस्मि २१. पितॄणाम् २२. मृगाणां च २३. झषाणाम् २४. ऋतूनाम् २५. मुनीनामप्यहम्।

पाठः - १०

२. १. अस्माकम् २. अस्माकम् ३. तस्य ४. तस्य ५. यस्य।, तस्य ६. तस्य ७. तयोः ८. तव ९. एतयोः १०. तयोः ११. तेषाम् १२. तस्य १३. एतस्य १४. तस्य १५. तेषाम् १६. तस्याः १७. तेषाम् १८. तव १९. तव २०. तेषाम् २१. यस्य २२. तस्य २३. आवयोः २४. तव।

३. १. पुस्तकस्य २. भारतीयानाम् ३. गोपिकानाम् ४. कृष्णबलरामयोः ५. गजानाम् ६. भगिन्याः ७. खगयोः।

४. १. तस्य २. यस्य ३. मम ४. तासाम् ५. येषाम् ६. तेषाम् ७. तस्य ८. तव ९. सर्वस्य १०. अस्य ११. यस्य १२. मम १३. एषाम् १४. परस्य १५. एतेषाम्।

५. १. धृतराष्ट्रस्य पितामही सत्यवती। २. कृष्णस्य मातामहः देवकः। ३. अभिमन्योः मातामही देवकी। ४. युधिष्ठिरस्य पितृव्यः विदुरः। ५. दुर्योधनस्य मातुलः शकुनिः। ६. शूरसेनस्य पौत्रः कृष्णः। ७. कुन्तिभोजस्य दौहित्रः भीमः। ८. देवकस्य जामाता वसुदेवः ९. कृष्णस्य भागिनेयः अभिमन्युः। १०. धृष्टद्युम्नस्य आवुत्तः युधिष्ठिरः। ११. बलरामस्य भ्रातृजाया रुक्मिणी। १२. गान्धार्याः देवरः पाण्डुः। १३. विराटस्य श्यालः कीचकः। १४. नकुलस्य पितृव्या गान्धारी। १५. बलरामस्य मातुलानी प्राप्तिः।

पाठः - ११

१. १. दक्षिणतः २. वामतः ३. पृष्ठतः ४. पुरतः ५. उपरि।

२. १. पुरतः २. पृष्ठतः ३. दक्षिणतः ४. वामतः ५. अधः ६. उपरि ७. अन्तः।

३. १. मेघस्य, खगाः। २. शिक्षकस्य, छात्राः। ३. मन्दिरस्य, नदी। ४. धृतराष्ट्रस्य, सञ्जयः। ५. शरीरस्य, आत्मा।

४. १. दक्षिणतः २. वामतः ३. पुरतः ४. पुरतः।

५. १. क्+ऋ+ष्+ण्+अ। २. म्+अ +ह्+आ+भ्+आ+र्+अ+त्+अ। ३. म्+आ+त्+ऋ। ४. प्+र्+अ+क्+ऋ+त्+इ। ५. म्+ओ+ह्+अ। ६. ई+श्+व्+अ+र्+अ। ७. ग्+ल्+आ+न्+इ। ८. य्+उ+द्+ध्+अ। ९. व्+इ+ष्+ण्+उ। १०. ध्+र्+उ+व्+अ। ११. र्+आ+ज्+य्+अ।

६. १. र्+आ+ज्+अ+व्+इ+द्+य्+आ = आकारान्तः। २. क्+औ+र्+अ+व्+अ = अकारान्तः।
३. र्+आ+ज्+अ+स्+ई = ईकारान्तः। ४. क्+उ+ल्+अ+स्+त्र्+ई = ईकारान्तः।
५. प्+अ+ण्+अ+व्+आ+न्+अ+क्+अ = अकारान्तः। ६. व्+इ+ध्+आ+त्+ऋ = ऋकारान्तः।
७. प्+र्+अ+व्+ऋ+त्+त्+इ = इकारान्तः। ८. ऐ+र्+आ+व्+अ+त्+अ = अकारान्तः।
९. भ्+र्+आ+त्+ऋ = ऋकारान्तः। १०. ब्+उ+द्+ध्+इ = इकारान्तः। ११. ध्+ऋ+ष्+ट्+अ+क्+ए+त्+उ = उकारान्तः।

पाठः -१२

१. १. अनुद्वेगकरं वाक्यम् - आवश्यकम्। २. कामः - मास्तु। ३. क्रोधः - मास्तु। ४. लोभः दर्पः - मास्तु। ५. दर्पः - मास्तु। ६. सौम्यत्वम् - आवश्यकम्। ७. मौनम् - आवश्यकम्। ८. ब्रह्मचर्यम् - आवश्यकम्। ९. विधिहीनः यज्ञः - मास्तु। १०. अहङ्कारः - मास्तु।

२. २. श्रीकृष्णस्य कृते पापस्य नाशनम् आवश्यकम्। ३. धृतराष्ट्रस्य कृते केवलं पुत्रप्रेम आवश्यकम्। ४. अर्जुनस्य कृते गाण्डीवम् आवश्यकम्। ५. दुर्योधनस्य कृते हस्तिनापुरम् आवश्यकम्। ६. द्रोणस्य कृते सेनापतिपदम् आवश्यकम्।

३. आवश्यकम्। मास्तु। पर्याप्तम्। मास्तु। आवश्यकम्। धन्यवादः। स्वागतम्।

पाठः -१३

१. तौ विशतः। ते ध्यायन्ति। त्वं गृह्णासि। युवाम् इच्छथः। यूयं पश्यथ।
अहं जानामि। आवां धरावः। वयं सृजामः। भवान् याति। भवन्तौ चरतः।

२. सम्भवावः सम्भवामः। रक्षथः रक्षथ। गच्छतः गच्छन्ति। भजावः भजामः। अर्चथः अर्चथ। पठथः पठथ। तपावः तपामः। भ्रमतः भ्रमन्ति। त्यजतः त्यजन्ति। तरतः तरन्ति। वसथः वसथ। हरतः हरन्ति।

३. हन्वः हन्मः। स्तुतः स्तुवन्ति। ब्रूतः ब्रुवन्ति। चिनुथः चिनुथ। दद्वः दद्मः। बध्नीथः बध्नीथ। प्राप्नुतः प्राप्नुवन्ति। जानीवः जानीमः। धत्तः दधति। भातः भान्ति।

४. १. कुरुतः २. पश्यामि ४. लिखावः ५. धावसि ६. इच्छन्ति ७. ब्रूमः ८. पठति ९. असि १०. नश्यतः ११. पतन्ति १२. जयामि १३. पृच्छसि १४. दहति १५. हरावः १६. आप्नुवन्ति १७. यासि १८. भजामः १९. कथयति २०. गायामि।

५. १. परिशुष्यति २. भ्रमति ३. पश्यामि ४. अनुपश्यामि ५. पश्यन्ति ६. प्रणश्यन्ति ७. प्रदुष्यन्ति ८. भवति।

६. १. मुह्यति २. व्यथयन्ति ३. वेत्ति, मन्यते ४. घातयति, हन्ति ५. संयाति ६. छिन्दन्ति, दहति ७. क्लेदयन्ति, शोषयति ८. पश्यति।

७. १. गृह्णाति २. कुर्वन्ति ३. पश्यन्ति ४. भवति ५. रुदतः ६. नयति ७. भवति।

८. १. चित्तानि पुरुषं विषयेषु बध्नन्ति। २. मुनयः इन्द्रियाणि निगृह्णन्ति। ३. ब्राह्मणाः प्रतिदिनं जुह्वति। ४. भक्ताः शास्त्रवाक्यं शृण्वन्ति। ५. योगिनः ध्यानं कुर्वन्ति। ६. युवत्यः ग्रन्थान् क्रीणन्ति। ७. बालाः फलं चिन्वन्ति।

९. १. युवकः खादति। २. महिला पूजयति। ३. महिलाः क्रीडन्ति। ४. बालकः चिन्तयति। ५. युवती पचति। ६. पुरुषः पश्यति। ७. शिष्याः नमन्ति।

पाठः -१४

१. दुर्योधनः २. युधिष्ठिरः ३. दुष्टः ४. विनयशीलः ५. धृतराष्ट्रः ६. अर्जुनः ७. दुर्योधनः ८. शकुनिः ९. दुर्योधनस्य १०. अर्जुनाय।

२. १. राज्यसञ्चालनम् अनुजः पाण्डुः करोति। २. श्रीकृष्णस्य उपदेशः गीतोपदेशः इति नाम्ना ज्ञायते। ३. पितामहभीष्मः आचार्यद्रोणः कृपाचार्यः च एते सर्वे पूजार्हाः सन्ति। ४. शकुनिः स्वभावेन कुटिलः दुष्टः च अस्ति। ५. दुर्योधनः पाण्डवेभ्यः राज्यार्धं दातुं न इच्छति। ६. शकुनिः द्यूतक्रीडायां छलेन युधिष्ठिरं पराजयते। ७. श्रीकृष्णः उपदेशं दत्त्वा अर्जुनस्य मोहभङ्गं करोति। ८. युद्धभूमौ स्वबान्धवान् दृष्ट्वा अर्जुनः मोहग्रस्तः भवति। ९. द्यूतक्रीडायां पराजिताः पाण्डवाः वनवासं गच्छन्ति। १०. पाण्डवाः द्वादशवर्षाणि वनवासं कुर्वन्ति।

३. १. कः जन्मान्धः अस्ति ? २. पाण्डवाः कति वर्षाणि वनवासं गच्छन्ति ? ३. अर्जुनः कीदृशः भवति ? ४. कः स्वभावेन अतीव दुष्टः अस्ति ? ५. शकुनिः केन युधिष्ठिरं पराजयते ? ६. कस्य मातुलः शकुनिः अस्ति ? ७. अर्जुनः किं परित्यजति ? ८. कौ सहोदरौ स्तः ? ९. कुत्र स्वबान्धवान् दृष्ट्वा अर्जुनः मोहग्रस्तः भवति ? १०. कस्य मृत्योः अनन्तरं कौरवाः पाण्डवेभ्यः ईर्ष्यन्ति ?

४. १. गच्छन्ति २. सन्ति ३. भवति ४. कुर्वन्ति ५. कर्षतः ६. कुर्वन्ति ७. ददाति ८. भजति ९. ईर्ष्यन्ति १०. चरन्ति।

५. १. असि २. अस्मि ३. स्मः ४. स्थः ५. स्तः ६. स्वः ७. स्थ ८. सन्ति।

पाठः -१५

१. **परस्मैपदिधातुरूपाणि -** पश्यति, तिष्ठति, अस्ति, स्मरति, वदति, पतति, कर्षति, स्निह्यति, स्नाति, स्पृशति, रटति, नयति, दिशति, जीवति, गच्छति, पठति, गायति, याति, पिबति, भवति, आप्नोति, पाति।

आत्मनेपदिधातुरूपाणि - लज्जते, कामयते, वर्तते, विद्यते, पलायते, स्मयते, भाषते, द्योतते, कम्पते, म्रियते, जायते, ऊहते, गाहते, मोदते, ईक्षते, सूयते, त्रायते, शेते, राजते, प्रार्थयते, त्वरते, स्पर्धते।

२. १. धनार्थं स्पर्धेते। २. मातरं दृष्ट्वा स्मयन्ते। ३. भारं वोढुं यते। ४. सुखम् अपेक्षते। ५. पुष्पासने विराजेते। ६. विषयान् न उपसेवन्ते। ७. गुरुम् अनुवर्तामहे। ८. विचारान् सङ्गच्छन्ते। ९. श्रीकृष्णं भजावहे। १०. मृगयध्वे। ११. घर्मेण स्विद्येते। १२. वर्धन्ते। १३. युद्धार्थं त्वरन्ते। १४. गणेशाय रोचते। १५. त्वं सर्वान् क्षमसे।

३. १. वन्देते २. त्रायते ३. मन्येथे ४. लभसे ५. ईक्षावहे ६. भाषन्ते ७. मोदन्ते ८. शये ९. आस्तामहे १०. द्योतते ११. खिद्यन्ते १२. कामयध्वे १३. वर्तामहे १४. विद्ये।

पाठः -१६

